ते दानि उभये संमोदिका प्रियमाणा अभीष्टचित्ता । उपतिष्यो पि नालन्द्ग्रामातो कोलितग्रामकं गच्छति कोलितस्य दर्शनाये । कोलितग्रामातो पि कोलितो नालन्द्ग्रामकं गच्छति उपतिष्यस्य दर्शनाये ॥ राजगृहे समसमं गिरियग्रसमाजं नाम पर्वं वर्तति पंचानां तपोशतानां ॥ तत्र दानि पञ्चहि तपोशतेहि पंच उद्यानशतानि । सर्वाणि पंच उद्यानशतानि अनेकेहि जनसहस्रेहि भरितानि भवन्ति दर्शनशतानि वर्तन्ति संगीतिशतानि वर्तन्ति अपराणि च नटनर्तकछल्लमल्लपाणिस्वरकानि डिम्बरवलञ्जककुम्भथूनिकशतानि ॥ ते दानि ब्राह्मणमहाशालपुत्रा उपतिष्यो च [277ᵇ] कोलितो च चतुर्घोटेहि अश्वरथेहि युक्तेहि चेटसहस्रेहि संपरिवारिता गिरियग्रसमाजं प्रेक्षका गता ॥ ते दानि सत्वा सकुशलमूलपुण्या वरपरीत्तगृहा कृताधिकारा पुरिमकेषु सम्यक्संबुद्धेषु प्रत्येकबुद्धश्रावकमहेशाख्येषु च उप्तसत्याधिकारा छिन्नबन्धना भव्योत्पत्तिका आर्यधर्माणां आराधनाये चरमभविकाये हेतुप्रत्ययचारिका सत्वा ॥ तेषामुभयेषां तत्र गिरियग्रसमाजं प्रेक्षन्तानां पौराणेन कुशलमूलेन हेतुमुपदर्शितं ॥ शारिपुत्रस्य तं जनकायं दृष्ट्वा अनित्यसंज्ञा उत्पन्ना इमं एत्तकं जनकायमभ्यन्तरा वर्षशतस्य अनित्यताय सर्वं न भविष्यति ॥ मौद्गल्यायनस्यापि जनकायस्य तस्य हसन्तानां हक्कारं च क्षिपन्तानां दन्तमालानि

4¹. M °moditâ priyamânâ a° BM °bhikshuṇaṃ cittâ | u(M °ttam u)pa°. — 4². M °tishyati | nâladagrâmâto kolito° B °tishyo ti nâladagrâmâ°. — 5. BM °nâladagrâmâ° B °cchati upadarça° M °cchati utpattishyadarça°.

6. B °grihaṃ sama° M °he samasa girimagra ° ma parvataṃ varttati pañcânâṃ ca tapaçatâ° B °cânâṃ capoçataçatânâm ta°. — 7. BM °hi tapota(M °tapa)çate° BM °tâni sa°. — 8. M °dyânaçatânâni ° rçanaçatâni varttati saṃ ° ni varttati parâ° B °gitiçatâni vartanti | apa ° ḍimbalaṃvalambakakumbhatuṇika° M °mbaravalambakakumbhatûṇikaçatâni varttati | saṃgîtiçatâni varttati aparâṇi ca naṭanarttakarillamallapâṇisvarakâni ḍimbaravalambakakumbatûṇikaçatâni | . — 10. BM °putro u° B °to ca câtughâtehi a° M °to ca câturghotehi a° B °vârito gi° M °vârito girimagra° B °kshakâ matâ ‖ M °kshakâ matâḥ | .

12. M °ni satvâḥ kuça ° tyekabuddhamaheçâkhyaçrâvakeshu ca uttapta° BM °tikâ ‖ âryadharmâṇâṃ arâgaṇâye carama(M °ye vacarma)bha° B °tyayabâlikâ satvâ te°. — 15. B °girigra° M °girimagra ° darçayituṃ | B °rçituṃ ‖ .

16. BM çâlipu° B °anityâsaṃ ° tpanno i° M °tpanno so dâni maudgalyâyano çâliputraṃ paridînamukhavarṇṇa dṛishṭvâ âha ‖ imaṃ ekantaṃ jana ° sya avityatâya sarvaṃ bha°. — 18. B mauṅgalyâ° BM °yaṇasyâpi° B °tasya sahantâ° M °hasaṃtânâṃ ha ° naṃ daṃtamâ°.

दृष्ट्वा अस्थिसंज्ञा उत्पन्ना । सो दानि मौद्गल्यायनो शारिपत्रं परिदीनमुखवर्ण दृष्ट्वा आह ॥

मनोज्ञ तन्त्रीस्वरगीतघोषा
त्रिपुष्करस्फोटिकसार्यमाणाः ।
श्रुयन्ति शब्दा मधुरा मनोज्ञा
रंगे भवां किं परिदीनवक्त्रो ॥
हृष्टस्य कालो न हि शोचितस्य
रमितस्य कालो अरतिं जहाहि ।
शृणोहि संगीतिमिवाप्सराणां
हृष्टाननो अस्मिं मनुष्यनन्दने ॥

अथ खलु शारिपुत्रो माणवो मौद्गल्यायनं माणवमेतदुवाच ॥

एते विषयसंरक्ता विषयाश्च चलाचला ।
भवेषु च द्रव्येषु च का रतिर्बालबुद्धिनां ॥
अचिरं मुनिसा सर्वे अतृप्ता कामलोलुपाः ।
व्यस्तगाचा गमिष्यन्ति मृता अस्मपरायणाः ॥
तन्मे संज्ञा न रमेति मौद्गल्यायन न मे रती ।
विपुला प्रतिमा चैव भाविता मतिया रतिः ॥
समयो खु धर्मं चरितुं नरकिन्नरा सुरासुरसुचरा पि ।
कामरतीभिर्लोलिता अतृप्तमनसा गता विलयं ॥
यो वने कायविवेकं रतो अधिगच्छे मदकालोपगतो ।

1. M atha mau° B °mauṅgalyâyaṇo çâliputraṁ paṙidi° M °lyâyaṇa çâliputra âha ‖ . — 3. M °jñatatrasva ° ṭika âryyamâ° B °ṭika âryanâmâ | . — 5. M çrûyasti ça° BM °jñâ raṅge bhavâṁ kiṁ(M °vâ ki) pa°.

7. B hṛishṭhesya kâ ° M hṛishṭesya kâ ° jahohi ‖ . — 9. M °m iva apsa ° BM ° hṛishṭâ narâ(M °râṅya)sya ma° B °nusheṇa nandano ‖ M °ndano ‖ .

11. BM °çâliputro ° mauṅgalyâyaṇamâṇava°. — 12. M °çca calâcalaḥ | . — 13. M caleshu dra° B °veshu dravyeshu kâ° M °rati bâ° BM °nâṁ a°. — 14. BM °cirâ sunise (M °sa ?) sarve° M °lupâ | . — 15. M vyastagâyâ gami°.

16. B etan me° M etaṁ me° BM °mauṅgalyâyana(B °ṇa) me rati(M °ti |) vi°. — 17. B °pratibhâvikâ ramati | yo sa °M °bhâvitâ matiyo ra °. — 18. M samayeshu ca dharmaçaraṇaṁ cari° B °rmaṁ caraṇaṁ cari° M °nnaraḥ ‖ surâsurasucali pi B °râsurasucari pi kâ°. — 19. B °ratibhi lili° M °ratibhirilitâḥ | a° M °gataçça vi° BM °yaṁ samayo khu (M °yeshu) dharmaṁ caraṇaṁ(M °ṇa) caritum yo°. — 20. BM yau(M °jau)vane ° yo kâmavivekarato adhi(M °toḥ dhi)gacchati (B ° ti ‖) madakâlo(M °ro)pagatâ spri°.

स्पृहयन्ति तस्य देवा पि मरुचीर्ण हि दुष्करं चरितं ॥
समानं सुखदुःखेषु रतीषु अरतीषु च ।
यं नैमित्ता प्रशंसन्ति सो हं शारिसुतो भवे ॥

सो दानि शारिपुत्रमाणवको तं मौद्गल्यायनमाणवकमामन्त्रयति ॥ प्रव्रज्या मे अभिप्रेता प्रव्रजिष्यामि ॥ मौद्गल्यायनो आह ॥ यं भवतो दृष्टं तन्मया[278a]- पि दृष्टं अहमपि प्रव्रजिष्यामि ॥ मौद्गल्यायनो आह ॥

या गती भवतो दृष्टा अस्माकमपि रोचति ।
त्वया सार्धं मृतं श्रेयं न च जीवितं त्वया विना ॥

तेन खलु पुन समयेन राजगृहे नगरे संजयो नाम वैरटीपुत्रो परिव्राजको पंचाशपरिवारो परिव्राजकारामे प्रतिवसति ॥ ते दानि शारिपुत्रमौद्गल्यायनमाणवका परिव्राजकारामं गत्वा संजयिस्य वैरटिकापुत्रस्य परिव्राजकस्य सकाशे परिव्राजकप्रव्रज्यां प्रव्रजिता ॥ शारिपुत्रेण सप्ताहप्रव्रजितेन सर्वाणि परिव्राजकशास्त्राणि अधीतानि मौद्गल्यायनेनार्धमासेन सर्वाणि परिव्राजकशास्त्राणि अधीतानि ॥ ते दानि आहन्सुः ॥ नायं धर्मो नैर्याणिको तत्करस्य दुःखक्षयाय संवर्तति गच्छाम पृथक्पृथक्स्वाख्यातं धर्मविनयं पर्येषामः यत्र दुःखस्य अन्तक्रिया प्रवर्तति । यो मं प्रथमतरं स्वाख्यातं धर्मविनयं ..... तेन अपरस्य आख्यातव्यं । ततः सहिता आर्यधर्मविनये प्रव्रजिष्यामः ॥ ते दानि तानि परिव्राजकशास्त्राणि संगीतीकृत्वा राजगृहं प्रविष्टा अन्येन शारिपुत्रो परिव्राजको अन्येन मौद्गल्यायनो ॥

1. M spṛihaṁti | ta° BM °sya daçâ pi maruji(M °ki)rṇṇehi dushkaram âcaritum sa°. — 2. BM °mâna(M °nâ |) sukha ° M °duḥkheshu aratishu câhaṁ nai° B °ca haṁ nai°. — 3. B °mittaṁ praçasanti | so haṁ çâlisuto bhavâ so dâ° M °mittikaṁ praçaṁsati | so haṁ çâliputro bhavân so dâ°. — 4[1]. B °çâliputra mâṇavakâ taṁ° M °çâlipu mâṇavako° BM °mauṅgalyâyaṇamâ° M °kam âtraṁyati | . — 4[2]. M °shyâmîti ‖ . — 5[1]. BM mauṅgalyâyana(B °ṇo) âha ‖ . — 5[2]. B °bhagavato° M °bhavata ishṭaṁ ta°.

6. BM mauṅgalyâyaṇo(M °ṇa) â°. — 7. B °bhagavato ishṭâ 'smâkaṁm a ° M °ishṭo asmâkam abhiro°. — 8. B °rddhaṁ smṛitaṁ° M ° çreyan na ca° BM °vituṁ tva°. — 9. M °nâma veratipu ° paṁcaçataparivâ°. — 10. BM °çâliputro mauṅgalyâyana(B °ṇa)mâ ° jayishya vairaṭikaputra°.

12. BM çâlipu° M °hapravṛijite° BM °mauṅgalyâyanenâpya(B °ṇenâpyâ)rddha°. — 14[2]. B °dharmâ nai° M °dharma nairyâṇiko | tatkasyataradukhakshayâya samvartta ° cchâmi pṛi° B °ryeshâmaḥ° M °antarkriyâ°.

16. M °sya khyâ°. — 17[1]. B tato sa°. — 17[2]. BM °gîtiṁ kṛi ° çâliputro(B °treṇa) pa ° mauṅga° B °yaṇo ‖ .

तेन खलु पुनः समयेन भगवानन्तरागिरिस्मिं यष्टीवने उद्याने यथाभिरम्यं विहरित्वा वेणुवनमनुप्राप्तो तत्रैव विहरति वेणुवने कलन्दकनिवापे महता भिक्षुसंघेन सार्धमर्धत्रयोदशभिर्भिक्षुशतैः ॥ अथ खल्वायुष्मानुपसेनो कल्यस्यैव निवासयित्वा पात्रचीवरमादाय राजगृहनगरे पिण्डाय प्रक्रमे ॥ अद्राक्षीत् शारिपुत्रः परिव्राजको आयुष्मन्तं उपसेनं दूरत एवागच्छन्तं प्रासादिकेन अभिक्रान्तप्रतिक्रान्तेन आलोकितविलोकितेन संमिञ्जितप्रसारितेन संघाटीपात्रचीवरधारणेन नागो विय कारितकारणो अन्तर्गतेहि इन्द्रियेहि अवहिर्गतेन मानसेन स्थितेन धर्मताप्राप्तेन युगमात्रं प्रेक्षमाणो दृष्ट्वा च पुनः अतिरिव मानसं प्रसीदे ॥ कल्याणा पुनरियं प्रव्रजितस्य दृष्टिर्या । यन्नूनाहं तस्य उपसंक्रमेयं ॥ अथ खलु शारिपुत्रो परिव्राजको येनायुष्मानु[278b]पसेनस्तेनोपसंक्रमित्वा आयुष्मता उपसेनेन सार्धं संमोदनीयां कथां संमोदयित्वा सारायणीयां कथां व्यतिसारेत्वा एकान्ते अस्थासि । एकान्तस्थितः शारिपुत्रः परिव्राजको आयुष्मन्तमुपसेनमेतदुवाच ॥ शास्ता भगवानुत आवको ॥ एवमुक्ते आयुष्मानुपसेनो शारिपुत्रं परिव्राजकमेतदुवाच ॥ आवको हं आयुष्मं ॥ एवमुक्ते आयुष्मान्शारिपुत्रो परिव्राजको आयुष्मन्तमुपसेनमेतदुवाच ॥ किंवादी भवतो शास्ता किमाख्यायी कथं पुनः आवकाणां धर्मं देशयति केवरूपा चास्य आवकेषु ओवादानुशासनी बहुलं प्रवर्तनीयं भवति ॥ एवमुक्ते आयुष्मानुपसेनो शारिपुत्रं परिव्राजकमेतदुवाच ॥ अल्पश्रुतो हमस्मि आयुष्मन्तं अर्थमात्रं कल्येयं ॥ एवमुक्ते शारिपुत्रो परिव्राजको आयुष्मन्तमुपसेनमेतदुवाच ॥

अर्थेन मह्यं कारियं किं भोति व्यंजनं बहु ।
अर्थगुरुको ह्यर्थविज्ञो अर्थेनार्थं चिकीर्षति ॥

Dhm. 1.92,17

1. M °traivaṁ vi° BM °ne kala(M °ra)ṇḍakani° B °sârddhaṁm arddhatra° M °sârddha arddhatra°. — 3. B °kâlasyai° M °lyasyeva ni ° re piṇḍiya caritvâ pra° B °me a°. — 4. B °kshit ‖ çâ° M °t çâliputro pari° M °kena abhiprakrânto prati ° tena samiñji° B °tra-ciradhâreṇe° M °no dṛipvâ ca punar atiri° B °side ka°.

8. M kalpânâṁ pu ° sya irshyâ | B °sya iryyâ | . — 9¹. M yaṁ nûnâ°. — 9². BM °çâlipu ° nîyâṁ kathâ saṁmoda(M °dana)yitvâ sarâ(M °çâlâ)paṇiyâṁ(M °niyâ) ka ° sthâsi e°.

12¹. M °sthito çâliputro pa° B °çâlipu° M °sena eta°. — 12². B °n utâ çrâ° M °n utâhi çrâ°. — 13. M °çâlipu°. — 14². M °n çâliputraḥ pari° B °ko âyushmam upa°. — 15. M °khyâhi kathaṁ punaḥ | çrâvakânâṁ dha° B °yati kecarû° M °pâ vâsya° B °rttaniye bha°.

17¹. M °senaḥ çâlipu°. — 17². BM °to ham asmiṁ â°. — 18. M °çâlipu° B °shmam upa°. — 20. M °kiṁ hoti vyañjanakaṁ subahukaṁ artha° B °janaṁ subahukaṁ pi a°.

21. BM °ruko hi arthavijñe arthe° M °rthaṁ viciryati B °rshati va°.

वयमपि एत्तसंभारं वाचाग्रन्थं निरर्थकं ।
आगृह्य बहुभिर्दिवसैः वञ्चिताः पूर्वं वञ्चिता ॥

एवमुक्ते आयुष्मानुपसेनो शारिपुत्रं परिव्राजकमेतदुवाच ॥ प्रतीत्यसमुत्पन्नां धर्मां खल्वायुष्मन्शास्ता उपादाय प्रतिनिःसर्गं विज्ञपेति ॥ अथ खलु शारिपुत्रस्य परिव्राजकस्य तत्रैव पृथिवीप्रदेशे स्थितस्य विरजं विगतमलं धर्मेषु धर्मचक्षुर्विशुद्धं ॥

अथ खलु शारिपुत्रो परिव्राजको प्राप्तधर्मा प्रहीणदृष्टिः तीर्णकांक्षो विगतकथंकथो ऋजुचित्तो मृदुचित्तो कर्मणीयचित्तो निर्वाणप्रवणो निर्वाणप्राग्भारो आयुष्मन्तमुपसेनमेतदुवाच ॥ कहिं आयुष्मं उपसेन शास्ता विहरति ॥ एवमुक्ते आयुष्मानुपसेनो शारिपुत्रं परिव्राजकमेतदवोचत् ॥ शास्ता वेणुवने कलन्दकनिवापे ॥ इत्थं वदित्वान आयुष्मानुपसेनो राजगृहे नगरे पिण्डाय प्रविचरे ॥

शारिपुत्रोपरिव्राजको येन मौद्गल्यायनः परिव्राजकस्तेनोपसंक्रमे । अद्राक्षीत् मौद्गल्यायनो परिव्राजको शारिपुत्रं परिव्राजकं दूरतो एवागच्छन्तं परिशुद्धेन मुखवर्णेन पद्मवर्णेन विप्रसन्नेहि च इन्द्रियेहि दृष्ट्वा च पुनः [279a] शारिपुत्रं परिव्राजकमेतदवोचत् ॥ परिशुद्धो भवतो शारिपुत्रस्य मुखवर्णो पर्यवदातो विप्रसन्नानि च इन्द्रियाणि । अथ खलु ते आयुष्मं शारिपुत्र अमृतमधिगतं अमृतगामी च मार्गो विकसितमिव पद्मं शुद्धं प्रावृतस्य वक्त्रं प्रसन्नमुपशान्तानि इन्द्रियाणि अमृतं समाप्तं क्वचित्ते येन ते तं द्विगुणशुभचिरश्रिमजालं विस्तीर्णं ॥

1. BM °py eta saṁbhâ(B °sadbhâ)raṁ° M °vâcâgraṁ ittha ni°. — 2. B agrihya° M °lvahubhi diva° M °vâñcitâ pûrvaṁ vâñcito e° B °rvaṁ vañcito e°. — 3¹. M °çâlipu°. — 3². M °dharmaṇâṁ° B °tpannânâṁ dharmâṇâṁ kha °shmân | çâstâ° M °yushmân çâ °jñayati ‖ . — 4. BM °çâlipu° M °traivaṁ pri ° deçaṁ sthi°.

7. M °çâlipu° BM °shṭiḥ | ti° B °thaṁkathâ ṛiju° M °thaṁkathâ rituvinto mṛiducinto karmaṇîyacinto ni°. — 9¹. BM °yushmaṁ(M °shmantaṁ) çâriputra çâ°. — 9². M °shmâ upaseto çâlipu°. — 10. M °karaṇḍakani° BM °pe i°.

11. BM itthaṁ vedi° M °tvâ âyu ° pasorâ râja° B °pasono°. — 12¹. M çâliputrâ parivṛirâjako° BM °mauṅgalyâyaṇaḥ(M °no) pari° B °jakos teno°. — 12². M °kshin mauṅgalyâ° B °t maugalyâyano parivrâko çâ° M °ko çâlipu ° ccbatâ dṛishṭvâ pariçu° B °mukhevarṇṇena pa° BM °dmavarṇṇena prasanne° M °ca idriyehi ca dṛi ° naḥ çâliputra pari° tad-uvâca | . — 15. M °bhagavato çâlipu°.

16. M °yushmân çâliputro amṛitam a ° gâminî ca° B °gâmi ca mâ ° kaçitam i ° ddhaṁ vṛittajya vaktraṁ° M ° sya vastraṁ pra° BM °m upagatâni indriyâni tânîndriyâni amṛitarasamâptaṁ | ke(M °kaṁ) cinte yena te taṁ vigu ° cittarasmijâlâṁ(M °lâ) vistîrṇṇa (B °vikarṇṇaṁ ‖).

एवमुक्ते शारिपुत्रो परिव्राजको मौद्गल्यायनमेतदुवाच ॥ अमृतं मे आयुष्मन्महामौद्गल्यायन अधिगतं अमृतगामी च मार्गो ।

यो सो श्रुयति शास्त्रे पुष्पमिव उदुम्बरं वने बुद्धा ।
उत्पद्यन्ति शिरिघना उत्पन्नो लोकप्रद्योतो ॥

एवमुक्ते मौद्गल्यायनो परिव्राजको शारिपुत्रं परिव्राजकमेतदवोचत् ॥ किंवादी आयुष्मं शारिपुत्र शास्ता किमाख्यायी ॥ एवमुक्ते शारिपुत्रो परिव्राजको मौद्गल्यायनमेतदवोचत् ॥

ये धर्मा हेतुप्रभावा हेतुन्तेषां तथागतो आह ।
तेषां च यो निरोध एवंवादी महाश्रमणः ॥

अथ खलु मौद्गल्यायनस्य परिव्राजकस्य तत्रैव पृथिवीप्रदेशे स्थितस्य विरजं विगतमलं धर्मेषु धर्मचक्षु विशुद्धं ॥ अथ खलु मौद्गल्यायनो परिव्राजको प्राप्तधर्मो प्रहीणदृष्टिः तीर्णकांक्षो विगतकथंकथो उद्ग्रमानसचित्तो मृदुचित्तो कर्मणीयचित्तो निर्वाणनिम्नो निर्वाणप्रवणो निर्वाणप्राग्भारो ॥

अथ खलु मौद्गल्यायनो परिव्राजको शारिपुत्रं परिव्राजकमेतदवोचत् ॥ कहिं आयुष्मं शारिपुत्र शास्ता विहरति ॥ एवमुक्ते शारिपुत्रो परिव्राजको मौद्गल्यायनं परिव्राजकमेतदवोचत् ॥ एष आयुष्मं शास्ता वेणुवने विहरति कलन्दकनिवापे महता भिक्षुसंघेन सार्धमर्धचयोदशभिर्भिक्षुशतैः गच्छाम संजयिमामन्त्रेत्वा शास्तारं वेणुवने भगवतो सन्तिके ब्रह्मचर्यं चरिष्यामः ॥ एवमुक्ते मौद्गल्यायनो

1¹. M evaṁm u° BM °çâlipu° B °ko mauṁgalyâ°. — 1². M °yushmân mauṅgalyâ° B °shmân mahâmauṅgalyâ° M °dhigata amṛi° BM °rgo yo°. — 3. B °so çruya° M °so çrûyati | çâstreshu pu° BM °m ivodu° M °mbaro vano buddhân utpadya° B °mbare vane buddhâ u°. — 4. B °utpadya° M °çirivyoma utpa° B °çirighâmo u° lokadyâto ‖ . — 5¹. M °kte mahâmauṅgalyâ° B °mauṅgalyâ° BM °yano parivrâ° M °çâliputra pari° B °putra pari°. — 5². M °çâliputra ° khyâyi | khyâhi ‖ .

6. BM mauṅgalyâ°. — 8. M yo dharmo hetuprabhâvo hetus teshâṁ° B °vâ hetu teshâṁ°. — 9. B °di mahaçra° M °mahaçravaṇaḥ ‖ . — 10. BM mauṅgalyâ° B °kasya | tatrai° M °traivaṁ pri ° kshur viçuddhaṁ ‖ .

11. BM °mauṅgalyâ° M °hinadrishṭis tîrṇṇakâṁkshâ vigatakathaṁkartho° B °thaṁkathâ u° BM °gramanasaṁ citto(M °nto) mṛi° M °rmakaraṇi°. — 14¹. BM °mauṅgalyâ° M °yano çâlipu°. — 14². M °yushma çâlipu°. — 15. M °çâlipu° BM °mauṅgalyâ° M °m etad uvâca | B °cat esha°.

16. B °ti | ka° M °laṇḍakanishâye maha° BM °tvâ çâstrâ(M °stâ) ve° B °shyâmaḥ e°. — 18. BM °mauṅgalyâ° M °çâlipu°.

परिव्राजको शारिपुत्रं परिव्राजकमेतदुवाच ॥ गच्छ आयुष्मं शारिपुत्र इतो वेणुवनं किं मं संजयिना कुदृष्टिना दृष्टेन ॥ शारिपुत्रो तमाह ॥ न हि आयुष्मं मौद्गल्यायन सो पि अस्माकं संजयी बह्वपकरो यं आगम्य वयं गृहातो भिनिष्क्रान्ता ॥

ते दानि परिव्राजकारामं गत्वा संजयिं आमन्त्रेन्ति ॥ गच्छाम भगवति महाश्रमणे ब्रह्मचर्यं चरिष्यामः ॥ एवमुक्ते संज[279ᵇ]यो परिव्राजको शारिपुत्रमौद्गल्यायनां परिव्राजकानेतदुवाच ॥ मा भवन्तो श्रमणस्य गौतमस्य ब्रह्मचर्यं चरथ । इमानि मम पंच परिव्राजकशतानि तेषां भवन्तो अर्धपरिहारा ॥ ते आहन्सुः ॥ न हि गच्छाम वयं भगवति महाश्रमणे ब्रह्मचर्यं चरिष्यामः । स्वाख्यातो भगवता धर्मविनयो विवृतोद्यो छिन्ना पिलोतिका अलमर्थिकस्य अप्रसादेन ॥ ते दानि संजयिमामन्त्रेत्वा परिव्राजकारामातो येन वेणुवनन्तेन प्रणता तानि पि पञ्च परिव्राजकशतानि शारिपुत्रमौद्गल्यायनेहि परिव्राजकेहि सार्धं गच्छन्ति ॥ संजयी शारिपुत्रमाह ॥ एकं न दानि तेहि द्वे वा त्रीणि वा अथ वा चत्वारि अथ सर्वे पंचशता उपतिष्ठो आदाय प्रक्रमति ॥

भगवां वेणुवने भिक्षुणामामन्त्रयति ॥ प्रज्ञपेथ भिक्षवः आसनानि एते शारिपुत्रमौद्गल्यायना परिव्राजका पंचशतपरिवारा आगच्छन्ति तथागतस्यान्तिके ब्रह्मचर्यं चरितुं यो मे भविष्यति श्रावकाणामग्रयुगो भद्रयुगो एको अग्रो महाप्रज्ञानां अपरो अग्रो महर्द्धिकानां ॥ अद्राक्षीच्छारिपुत्रो परिव्राजको भगवन्तं

1. M °yushman çâlipu° BM °kiṁ mâṁ saṁjayanâ(M °jayitvâ) kû°. — 2¹. M çâliputra âha ‖ . — 2². M °yushman mauṅgalyâ° B °mauṅgalyâyaṇa so° BM °pi yushmâkâṁ saṁjayi bahukaro° M °nishkrâṁto | . — 5¹. M °vrâjaka çâliputraṁ kâmaṁ gatvâ sajayî â° B °vrâjakâ kâmaṁ ga° BM °mantreti | . — 5². M °gavato mahâçravaṇe bra° B °mah e°.

6. M °jayi pa ° çâlipu° BM °mauṅgalyâyanaṁ(B °nîṁ) pa°. — 7. M °çravaṇasya° brahmacarmmaṁ cara°. — 8¹. M °rddha pariharet ‖ B °rddha parihara ‖ . — 8². B °âhaṁsuḥ ‖ M °âhatsu. — 9¹. M °hâçravaṇe bra°. — 9². BM °khyâtâ bha° M °dayo pi cchinne pi° B °cchinne pi° M °lothikâ alaṁ arthikisya apraçâdena | .

11. M °vrâjaka ârâ ° ṇatâḥ tâni pi vaṁca pari ° çâlipu° BM °mauṅgalyâ°. — 13¹. BM °çâri(M °li)putra âha ‖ . — 13². B ekaṁ ca dâni duvehi triṇi° M ekaṁ va dâni tehi ive triṇi vâ atha catvâri vâ atha sarve°. — 15¹. B °ne bhikshuṇâmantra° M °ne bhikshuṇâm âmantrayate pra°. — 15². M °kshava âsanâni | ete çâlipu° BM °mauṅgalyâ° M °lmacaryya caritum | mâ me° B °tum | yo° M °grayugo eko agro prajñâ° B °ekâ ago mahâ ° kânâṁ a°.

18. M adrâshita çâlipu° B °kshicchâri° M °eshâgacchato veṇuvana ma °skrito pari ° rmadeça° BM °ntaṁ ‖ â° M °dau kalyâṇa madhye ° svartha su° BM °kevalaṁ paripû° M °ryyaṁ sapra° BM °kâçayituṁ ‖ dvâ° M ° kshaṇohi sa ° çitihi anu° M °vâñ catuhi vaiçâradyohi viçâradaṁ | çateṁdriyo çântamânasaṁ uttamadaçamamathapâramiprâpto° B °uttamadamaça° BM °indriyehi avarhigatena mânase° M °kshamâṇo gu ° hramam iva

दूरतो एवागच्छन्तं वेणुवने महतीये परिषाये पुरस्कृतः परिवृतो धर्मन्देशयन्तं आदौ कल्याणं मध्ये कल्याणं पर्यवसाने कल्याणं स्वर्थं सुव्यंजनं केवलपरिपूर्णं परिशुद्धं पर्यवदातं ब्रह्मचर्यं संप्रकाशयन्तं द्वात्रिंशतीहि महापुरुषलक्षणेहि समन्वागतं आशीतीहि अनुव्यंजनेहि उपशोभितशरीरं अष्टादशेहि आवेणिकेहि बुद्धधर्मेहि समन्वागतं दशहि तथागतबलेहि बलवाञ्चतुर्हि वैशारद्येहि विशारदो शान्तेन्द्रियो शान्तमानसो उत्तमदमथशमथपारमिताप्राप्तो नागो यथा कारितकारणो अन्तर्गतेहि इन्द्रियेहि अवहिर्गतेन मानसेन सुस्थितेन धर्मताप्राप्तेन ऋजुना युगमात्रं प्रेक्षमाणः गुप्तो नागो जितेन्द्रियो ह्रदमिव अच्छो अनाविलो विप्रसन्नो रतनयूपमिव अभ्युन्नतो सुवर्णबिम्बमिव भासमानं तेजराशिमिव श्रिया ज्वलमानं द्वितीयं आदित्यमिव उद्यन्तं असेचनकं अप्रतिकूलं दर्शनाये मुक्तो मुक्तपरिवारो दान्तो दान्तपरिवारो तीर्णो तीर्णपरिवारो पारगतो पारगतपरिवारो स्थलगतो स्थलगतपरिवारो क्षेमप्राप्तो क्षेमप्राप्तपरिवारः श्रमणो श्रमणपरिवारः बाहितपापो बाहितपापपरिवारो ब्राह्मणो ब्राह्मणपरिवारः श्रोत्रियो श्रोत्रियपरिवारः स्नातको स्नातकपरिवारः बाहितपापधर्मो बाहितपापधर्मपरिवारः ॥

अथ खलु शारिपुत्रमौद्गल्यायना परिव्राजका पंचशतपरिवारा येन भगवांस्तेनोपसंक्रमित्वा भगवतः पादौ शिरसा वन्दित्वा एकान्ते अस्थान्सुः ॥ एकमन्ते स्थितो शारिपुत्रो परिव्राजको भगवन्तमेतदवोचत् ॥

उषितं सागरसलिले उषितं गिरिगहनकाननवनेषु ।
अदर्शनात्तुह्यं मुने उषिता स्म चिरं कुतीर्थेषु ॥
कुमार्गा निवृत्ता पथे ते प्रसन्ना महासार्थवाह प्रतीर्णा ।
तं संसारकान्तारमुत्तीर्य धीराः विरक्ता न रज्यन्ति भूयः ॥

अथ खलु शारिपुत्रमौद्गल्यायना परिव्राजका भगवन्तमेतदुवाच ॥ प्रव्राजेतु

a° B °hradam iva kaccho° M °ccho anâviro vipra ° tanayutham iva a ° naṁ tejorâçi° BM °ntam aseca(M °seva)nakaṁ a(B °kam a)pratikulaṁ darçanâye | mukto° M °ktaparivâro çâro çântaparivâro dânto dântaparivâraḥ tirṇṇo tirṇṇaparivâraḥ pâragatoḥ pâragataparivâraḥ stha ° sthalagataparivâraḥ kshe ° ptaparivâraḥ çravaṇo çravaṇaprâptaparivâraḥ bâhitapo bâhitapaparivâraḥ brâhmaṇo°.

15. BM °mauṅgalyâya(M °ye) parivrâ° M °yena bhagavân teno °sthâtsuḥ | B °sthâsuḥ ‖ .

16. M °to çâlipu°. — 18. BM usitâṁ sâ° B °raçali° BM °shitàṁ gi° M °rigraha°. — 19. BM °rçanât tava mu° M °usitâ° BM °shu ku°. — 20. BM °mârganivritta(M °tte ‖) yathe(M °thâ) tava prasa° M °prakirṇṇe B °tirṇṇo saṁ°.

21. BM saṁsâ° B °râḥ ‖ vi° M °jyati bhuyaḥ ‖ B °yaḥ a°. — 22¹. M °çâlipu° BM °mauṅgalyâ° ‖ . — 22². B pravâje ° M pravraje ° saṁpadyetu° B °detu mâṁ suga° M °gataḥ ‖ .

मां भगवानुपसंपादेतु मां सुगतो ॥ अथ खलु भगवां शारिपुत्रमौद्गल्यायनप्रमुखां पंच परिव्राजकशतां एहिभिक्षुकाये आभाषे ॥ एथ भिक्षवः चरथ तथागते ब्रह्मचर्यं ॥ तेषां दानि भगवता एहिभिक्षुकाये आभाष्टानां यं किंचि परिव्राजकलिंगं परिव्राजकगुप्तं परिव्राजकध्वजं परिव्राजककल्पं सर्वेषां समन्तरहितं चिचीवरासानं प्रादुर्भवेन्सुः सुभ्रका च पाचा प्रकृतिस्वभावसंस्थितका च केशा ईर्यापथो सानं संस्थिहे सथथापि नाम वर्षशतोपसंपन्नानां भिक्षूणां । एष आयुष्मन्तानां शारिपुत्रमौद्गल्यायनप्रमुखानां पञ्चशतानां प्रव्रज्या उपसंपदा भिक्षुभावो ॥

अथ खल्वायुष्मां शारिपुत्रो भगवन्तमेतदुवाच ॥ किं भगवं प्रज्ञपेन्तो प्रज्ञपेति किं तिष्ठमानं तिष्ठति किं विभज्यमानं भज्यति किं पटिसंधेन्तं पटिसंधेति ॥ एवमुक्ते भगवानायुष्मन्तं शारिपुत्रमेतदवोचत् ॥ चत्वारो शारिपुत्र धातवः प्रज्ञपेन्ता प्रज्ञपेन्ति चत्वारो धातवः तिष्ठमानावो तिष्ठन्ति चत्वारि धातवो भज्यमानीयो भज्यन्ति चत्वारो पटिसंधेन्ता पटिसंधेन्ति ॥ एवमुक्ते आयुष्मां शारिपुत्रो भगवन्तमेतदवोचत् ॥ किंप्रत्यया भ[280b]गवं तिष्ठति किंप्रत्यया भज्यति किंप्रत्यया सन्धेति किंप्रत्यया न प्रतिसंधेति ॥ एवमुक्ते भगवानायुष्मन्तं शारिपुत्रमेतदवोचत् ॥ किंप्रत्यया शारिपुत्र जायतीति अविद्याप्रत्यया तृष्णाप्रत्यया कर्मप्रत्यया इदंप्रत्यया शारिपुत्र जायति ॥ किंप्रत्यया शारिपुत्र तिष्ठति । आयुःकर्मप्रत्यया आहारप्रत्यया शारिपुत्र तिष्ठति ॥ किंप्रत्यया शारिपुत्र भज्यतीति । आयुर्क्षया कर्मक्षया आहारोपच्छेदा इदंप्रत्यया शारिपुत्र भज्यति ॥ किंप्रत्यया शारिपुत्र प्रतिसंधेति । अविद्याये अप्रहीणत्वात् तृष्णाये वशीकृतत्वात् कर्म चास्य भवति

1. BM °gavaṁ çâri(M °li)putramauṅgalyâ° M °mukhaṁ paṁ° kâye bhâshâve | . — 2. M chi bhikshavaç cara°. — 3. M °bhagavatâ yehi bhi ° shṭânâṁ yat kiñcit parivrâjakaṁ liṁ ° guptiṁ pa° B °guptiḥ pa° BM °lpaṁ | sarve ° râ sanaṁ prâ° M °vetsuḥ | sumbhakâya pâ° B °takâra keçâ ‖ iryâ° M °çâ iryyâ ° sadyathâpi ° çatosapannâ°.

6. M °çâlipu° BM °mauṅgalyâ ° nâṁ pañcânâṁ(M °nâṁ parivrâjakaçatânâṁ) pra°. — 8¹. M °çâlipu°. — 8². M °gavân prajñapento° B °gavâṁ pra° BM °tishṭa(M °shṭha)mânaṁ kiṁ vi° M °naṁ bhajyati kiṁ patisarvantaṁ paṭisaṁbaṁdhaṁti | B °jjati kiṁ paṭisaṁvantaṁ saṁpaṭisandheti kiṁ apatisaṁdheti ‖ . — 9. M °çâlipu°. — 10. B catvâra çâ° jñapento prajñapeti ca° M °çâliputra dhâtavo prajñapyento prajñapemi catvâro dhâtavo ti° BM °nâvo tishṭhanti(B °nti ‖) kiṁpratyayâ çâri(M °li)putra(B °trâ) catvâri dhâtavo bha° B °sandhento pa° M °tvâri pâṭhisarvanto paṭisaṁbaṁdheti | .

12. M °kte bhaga° (l. 14). — 14. M °çâlipu°. — 15. M °çâliputrâ jâniti a° B °putrâ jâtîti° M °çâlipu°. — 16¹. M °çâliputra tishṭhaṁtiḥ. — 16². BM °âkâra° M °çâlipu°. — 17¹. M °çâliputra bhakshatiti | . — 17². M âyuḥkshayâ karma° BM °ccheda i° M °çâlipu°. — 18. M °çâlipu° BM °ti avi°. — 19. B °praṇatvât tri° M °prahîtvât tri° B °kritatvât ‖ ka° M °kṛitatvâ karma câ ° ti pakshaḥ a° B °pakshaṁ | a° M °çâlipu ° BM °saṁveti ‖ .

IMPRIMERIE NATIONALE.

पङ्कं अस्ति इदंप्रत्यया शारिपुत्र प्रतिसंधेति ॥ किंप्रत्यया शारिपुत्र न प्रतिसंधेतीति । अविद्याये प्रहीणत्वात्तृष्णाये व्यन्तीकृतत्वात्कर्म नास्य भवति पङ्कं नास्ति इदंप्रत्यया शारिपुत्र न प्रतिसंधेति ॥ चक्षुश्च शारिपुत्र आध्यात्मिकमायतनं अपरिभिन्नं भवति रूपो च बाहिरं आयतनं चक्षुषः आभासमागतं भवति । मनापासेचनसमुत्थानकं तस्य ततो निदानं उत्पद्यति प्रीतिसुखसौमनस्यं इन्द्रियाणि च प्रीणयति । ये पि शारिपुत्र धर्मा प्रतीत्य उत्पादयंते प्रीतिसुखसौमनस्यं इन्द्रियाणि च प्रीणयन्ति ते पि शारिपुत्र धर्मा जाता भूता संस्कृता वेदयिता प्रतीत्य समुत्पन्ना नैवात्मा नैवात्मनीया शून्या आत्मेन वा आत्मनीयेन वा ॥ अथ एवमन्यत्र कर्म चैव कर्मविपाकं च हेतुं चैव हेतुसमुत्पन्ना च धर्मा ॥ एवं श्रोत्रं घ्राणं जिह्वा कायो मनश्च शारिपुत्र आध्यात्मिकमायतनं अपरिभिन्नं भवति धर्मा च बाहिरमायतनं मनस्य आभासमागता भवन्ति । मनापासेचनसमुत्थानं तस्य ततो निदानमुत्पद्यति प्रीतिसौमनस्यं इन्द्रियाणि च प्रीणयति ॥ ये शारिपुत्र धर्मा प्रतीत्य उत्पादयन्ति प्रीतिसुखसौमनस्यं इन्द्रियाणि च प्रीणयन्ति ते शारिपुत्र धर्मा जाता भूता संस्कृता वेदयिता प्रतीत्य समुत्पन्ना नैवात्मा नैवात्मनीया शून्या आत्मेन वा आत्मनीयेन वा । अथ एवं अन्यत्र कर्म चैव कर्मविपा[281ᵃ]कं च हेतुस्चैव हेतुसमुत्पन्ना च धर्माः ॥

इदमवोचद्भगवानिमस्मिं पुनर्व्याकरणे भाष्यमाणे सर्वेषां शारिपुत्रमौद्गल्यायन-

1. M °çâlipu° BM °saṁveti°. — 2. M °hînatvâ tṛishṇâ ° ntikṛitatvâ karma câsya° B °t karmaṅ câsya bhavati | pa° BM °pakshaṁ nâ° M °çâlipu° BM °saṁveti | . — 3. M °çâliputra adhyâtmakam â° B °m âyataṇaṁ | apalibhi ° hinaṁ âya° M °kshusho âbhâsam âyatanaṁ bha° B °ti ma°. — 4. B manapâsemanasa° M °sesanasamutthânikâ tasya° B °nakâ tasya tato niyatiṁ u° M °niryâtaṁ u° B °ṇayanti | .

6. B ce pi çâ° M °çâliputra dharmaṁ ca pra° B °dharma pra° BM °utpadyan(M °dyaṁ)-te prî° M °sukhaṁ sau ° ṇi prîṇayati | te° B °yanti | te° M °çâlipu° BM °tra dharmâ pratityan(M °tya)ti prîtisaumanasyaṁ indriyâṇi ca prîṇayan(M °yaṁ)ti te pi çâri(M °li)putra dharma jâtâ prabhûtaṁ sasaṁ(M °ta saṁ)skṛi° B °veṭayi° M °yito pra° BM °tpanno naivâtmanaivâtmanîyo çûnyâ âtmyena(M °tmano) vâ âtmanî°. — 8. M °enam anyatra karmaṁ ca evaṁ karmavi° B °kaṁ na he° BM °caiva hetuṁ samu° M °dharmam e° B °rmâ e°. — 9. B °çrotuṁ ghrâ° M °çrotaṁ ghrâ ° çâliputro â° BM °ti | dha° M °rmâ va bâhiraya° B °hiṇam â° M °gato bhavaṁti.

11. BM manâpo(M °pâ) saumanasyaṁ sthânâṁ(M °ni)yâ tasya° M °tataḥ ni ° nasya idriyâni ca°. — 12. M °çâliputrasya dha ° tîtya dyaṁti prîtisu° B °tîtya dharmâ utpadyanti prîtisu° M °idriyâṇi° B °ṇayati | te° M °ṇayati | ye çâliputrasya dharmâ jâ° BM °skṛitâ cetayi(M °si)tâ° M °tmâ naivaṁtmanîyâ° B °tmena vâ âtmîye° M °tmanâyena°. — 15. M °tra karma caivaṁ karma ° çcaitusamutpannâç ca dha°.

17. B °vân imesmiṁ° M °puna vyâ ° çâlipu° BM °mauṅgalyâ° M °vebhya cittâ°.

प्रमुखानां भिक्षुशतानां अनुपादायाश्रवेभ्यश्चित्तानि विमुक्तानि । आयुष्मांश्च महामौद्गल्यायनो सप्ताहोपसम्पन्नो ऋद्धिबलतां ऋद्धिवशितां च अनुप्राप्तो चत्वारि च प्रतिसंविदानि साक्षीकरे । आयुष्मां च शारिपुत्रो अर्धमासं प्रव्रजितो अर्धमासोपसंपन्नो अभिज्ञावशितां प्रज्ञापारमितां च अनुप्राप्तो चत्वारि च प्रतिसंविदानि साक्षीकरे । आयुष्मां च मौद्गल्यायनो अचिरप्रव्रजितो अचिरोपसंपन्नो तिस्रो विद्या साक्षीकरे दिव्यं चक्षुः पूर्वनिवासं आश्रवक्षयं ॥ इत्यमेतं श्रुयति ॥ दीर्घनखस्य परिव्राजकस्य सूत्रं कर्तव्यं ॥

भिक्षू भगवन्तमाहन्सुः ॥ पञ्च भगवं कथं भगवता आयुष्मत्शारिपुत्रमौद्गल्यायनप्रमुखानि पञ्च भिक्षुशतानि संजयिपरिव्राजकस्य दारुणेषु दृष्टिगतेषु विनिवर्तयित्वा अनवराग्रातो जातिजरामरणसंसारगहनकान्तारातो तारिता ॥ भगवानाह ॥ न भिक्षवो एतरहिं एव मम एते शारिपुत्रमौद्गल्यायनप्रमुखा पंच भिक्षुशता संजयिस्य परिव्राजकस्य दारुणेषु दृष्टिगतेषु विनिवर्तयित्वा अनवराग्रातो जातीजरामरणसंसारगहनकान्तारातो तारिता ॥ अन्यदापि एते मया दारुणातो राजसीद्वीपातो राजसीनां हस्तगता विनिवर्तयित्वा क्षेमेण महासमुद्रातो उत्तारयित्वा जंबुद्वीपे प्रतिष्ठापिता ॥ भिक्षू आहन्सुः ॥ अन्यदापि भगवन् ॥ भगवानाह ॥ अन्यदापि भिक्षवः ॥

भूतपूर्वं भिक्षव अतीतमध्वानं जंबुद्वीपातो पंच वाणिजशतानि समुद्रनावाये महन्तं समुद्रमवगाढा धनस्य अर्थं । तेषां तं यानपात्रं समुद्रमध्ये गतं मकरेण

1. M °yushmâṁ ca ma° BM °mauṅgalyâ° M °vasi tâṁ ca anupraṇâpaṇe catvâri aprâ° B °tvâri ra pra° BM °kare itthaṁ etaṁ çru(M °çrû)yati dirghanakhasya parivrâjakasya sû(M °su)traṁ kṛitvâ tasya bhagavato vyâkaraṇe bhâshyamâṇe dirghanakhasya parivrâjakasya tatraiva pṛithivipradeçe sthitasya virajaṁ vigatamalaṁ dharmeshu dharmacakshur viçuddhaṁ ‖ shashṭinâṁ bhikshû(M °kshu)ṇâm(M °ṇâṁ) anupâdâçravebhyaç cittâni vimu-(M °ni mu)ktâni | âyu°. — 3. M °çâlipu° B °nno bhijñâṁ vaçitâṁ prajñâvarṇṇitâṁ prajñâ° M °tâṁ cânu°. — 5. M âyushmatâṁ ca° BM °mauṅgalyâ ° kare | di° kshayaṁ i°.

7. M °kasya sutraṁ°. — 8¹. M bhikshur bhaga ° hatsuḥ | B °nsuḥ pa°. — 8². M °gavan kathaṁ° BM °shmatâṁ çâ° M °çâlipu° BM °mauṅgalyâ° B °mukhânâṁ pa° M °mukhâṁ pa° BM °kshuçatânâṁ saṁ° B °vrâjaka dṛishṭigate avini° M °dârûṇeshu dṛi ° to jâtijarâ° B °sâragraha° M °sâragrahaṇakâṁtârâ° B °rito ‖ .

11. BM °tarahiṁ(M °hi) evaṁ mama ete çâri(M °li)putramauṅgalyâ ° jayishya pari° M °dârûṇe ° rttayitvâ jâtijarâ° B °sâragrahaṇakâ° M °sâragrahaṇakâṁtârotâ taritâ | B °to tânitâ ‖ . — 13. B anyedâ° BM °stagatâto vi ° B°rttayitvâ kshame°. — 15². M bhikshu âhatsuḥ | .

16². M °kshavo ‖ B °vaḥ bhû°. — 17. B °rvaṁ ati° M °kshavaḥ ati° BM °naṁ bhikshavo jaṁ° M °ṇijakaçatâ ° ye mahâsamum avagâ° B °mahatâ samu° M °arthâya te° B °arthâ te°. — 18. B °taṁ matkare° M °taṁ makarasya matsya°.

मत्स्यजातेन भिन्नं ॥ ते दानि तेन यानपात्रेण विपन्नेन देवदेवां नमस्यन्ति यो यहिं देवे अभिप्रसन्नो । केचिच्छिवं नमस्यन्ति केचिद्वैश्रवणं नमस्यन्ति केचित्स्कन्दं केचिद्वरुणं के[281b]चिद्यमं केचित्कुवेरं केचिच्चक्रं केचिद्ब्रह्मं केचिद्दश दिशां नमस्यन्ति यथा इतो महासमुद्रातो जीवन्ता उत्तरेम ॥ ते दानि तेन यानपात्रेण विपन्नेन नानाप्रकाराणि स्रवानि आदाय समुद्रमध्ये पतिता केचिद् घटिमादाय केचित्फलकं केचिद्लाबुश्रेणियं । केचित्परस्परस्य जीवितादू व्यपरोपेत्वा तं कुणपं आलम्बन्ति न महासमुद्रो मृतकुणपेन सार्धं संवसति अथ खलु तं कुणपं क्षिप्रमेव स्थलं वा द्वीपं वा क्षिपति ततः वयं पि एतेन कुणपेन सार्धं द्वीपं वा स्थलं वा उत्तरिष्यामः ॥ ते दानि वाणिजका तत्र महासमुद्रे स्रवन्ता वातेन राक्षसीद्वीपं क्षिप्ता ॥ ते तहिं राक्षसीद्वीपे नानाप्रकाराणि नानाद्रुमसहस्राणि पश्यन्ति । यथा यथा च वातेन तल्लीरमल्लीपियन्ति ततो ततो प्रमदाशतानि पश्यन्ति मानापिकानि दर्शनीयानि नानारंगरक्तवसनानि सालंकारभूषितानि आमुक्तमणिकुण्डलानि विचरन्त्यो काचिन्नववधुकाकारा काचिदेवप्रसूतिकाकारा काचिन्मध्यमस्त्रीकाकारा बहूनि राक्षसीशतानि मानुषीरूपाणि अभिनिर्मिणित्वा । समुद्रं ओतरित्वा एकमेको वाणिजको गृहीतो ॥ स्वागतमार्यपुत्राणां आर्यपुत्रा अस्माकमपतिकानां पतिका भविष्यथ अनाथानां नाथा भविष्यथ अबन्धूनां बन्धू भविष्यथ । अस्माकं पि स्वामिका महासमुद्रे विपन्नयानपात्रा सर्वे अनयातो व्यसनमापन्नाः । ध्रुवमस्माकं जलधरो प्रसन्नो येन यूयं इमं द्वीपमानीता ॥ ताहि ते वाणिजा अंशेहि आरूपिता समुद्रातो उत्तारिता स्थले प्रतिष्ठापयित्वा तेषां

1. M tadânîm̃ tena° BM °syanti | yo ° nno ke°. — 2. M kecicchinnam̃ namasyanti kecid vai° B °çramaṇam̃ namasyanti | ke° BM °t skandham̃ ke° M °ruṇa kecid ya ° ram̃ kecicchatram̃ kecid bra° BM °çâm̃ namasyanti | ya° M °drâto java ° remâ. — 4. M °dramadhyam̃ pa° B °tâ kecid vṛittim â° M °kam̃ kecid âlâmbuçreṇiyam̃ B °yam̃ ke°.

6. M kecit puraspa ° vitâd yam̃paro ° kunapam̃° B °nti na mṛitasamu° M °mudrâto mṛitakûpeṇa sâ° B °rddham̃ samvasati ‖ a° M °tam̃ mṛitakuṇa° B °pati | ta° M °tato vayam̃° shyâmi | . — 9. M °tra mahasa ° kshiptvâ. — 10. BM te tahim̃(M °tarhi) râkshasidvipe kshiptâ te tahim̃(M °hi) râkshasi(M °si)dvipe°.

11. M yathâ yathâ ca tâvena tam̃ tilam âtṛipiyam̃ti | tathâ tathâ tato pra° B °yanti | ta ° çyanti | mânâyikâ° M °çyati mânâpikâpikâpi darçaṇiyânâm̃ ragarakta ° lam̃kâlabhû ° caranto cit na va cadhûtakâkarâ kâcid evam̃ sutikâkârâ kâcit madhyamastrokâkârâ ba° B °kâcin na ca vadhûkâkârâ kâciddevam̃ prasû ° cid adyamantṛikâkârâ° BM °bahuni râ° M °rûpam abhi° BM °tvâ sa°. — 14. M °dram̃ ottari ° meka vâ° BM °to svâ°. — 15. M °nâm̃ âryyaputra asmâ° BM °kâ bhavishyatha | anâthânâm̃ nâthâ(M °tho) bhavishyatha | a°.

17. M °pâtro sarve ° m âpano. — 18¹. M °nitâḥ | B °tâ tehi te° — 18². BM tehi te vâṇijâm̃ am̃çe° M °rûpinâ sa ° uttaritâ° B °shâm̃ vâṇikânâm̃°.

वाणिजकानां समाश्वासयन्ति ॥ मा आर्यपुत्रा उत्कण्ठथ मा परितप्यथ महारतनद्वीपं आर्यपुत्रा अनुप्राप्ताः बहुरत्नमनन्तरत्नं बहुअन्नपानं बहुपुष्पफलं बहुगन्धमाल्यविलेपनं बहुवस्त्रं बहुाभरणप्रावरणं । इह आर्यपुत्रा अस्माभिः क्रीडन्ता रमन्ता प्रविचारयन्ता मधुवासवं च पिबन्ता आदीनवपराङ्मुखा सुखानि अनुभवथ ॥ ते दानि वाणिजा आहन्सुः ॥ मर्षथ मुहूर्तं याव शोकं विनोदेमः ॥

ते दानि सर्वे पंच वाणिजकशता तासां स्त्रीणां मूलातो एकान्तं प्रत्युत्क्रान्ता एकान्तं प्रत्युत्क्रमित्वा रोदेन्सुः शोचेन्सुः परिदेवे[282a]न्सुः ॥ हा अम्बे हा तात हा पुत्र हा भ्राता हा भगिनी हा चित्रजम्बूद्वीपिकाहो उद्यानवराहो ॥ रोदित्वा शोचित्वा परिदेवित्वा परस्परस्य समाश्वासेत्वा स्वकस्वकानि स्त्रीयो अङ्गीना । ताभिः स्त्रीभिः सार्धं महारहेण मार्गेण हरितशाद्वलितेन अपगततृणकण्टकखण्डकेन अपगतशर्करकठल्येन नीरजेन समेन अविसमेन महावनषण्डमनुप्राप्ता सर्वपुष्पफलोपेतं । सर्वोतुकानि सर्वकालिकानि तत्र वनखण्डे पुष्पाणि नानाप्रकाराणि सुरभीणि सुगन्धानि सर्वोतुकानि सर्वकालिकानि तत्र वनखण्डे नानाप्रकाराणि पत्रचूर्णानि गन्धरसोपेतानि क्षुद्रमधुसदृशानि वापीयो च पुष्करिणीयो च सुखसलिलानि हंसकारण्डवरुतानि उत्पलपद्मकुमुदपुण्डरीकसंछन्नानि ॥ ततो वनातो निर्गम्य तासां राक्षसीनां भवनानि अद्दशेन्सुः उद्दीप्तानि महेशाख्यानि श्वेतानि पाण्डराणि तुषारसन्निभानि निर्यूहसिंहपंजरगवाक्षतारारचन्द्रसुविचित्राणि राक्षसीनगरं च वैश्रवणभवनसंनिभं पश्यन्ति ॥ ते दानि वाणिजका ताहि राक्षसीहि द्वीपे प्रवेशिता स्वकस्वकानि भवनानि दिव्यविमानसन्निभानि ॥ ते दानि वाणि-

1. M °putro utkaṁṭha mâ pa° B °tkaṇḍatha mâ pa ° ptâḥ | ba° M °ntaravana bahua ° ndhamâlyam̃ vilepanam̃ vastram̃ ° prâvaram̃ | B °ṇam̃ i°. — 3. M °kṛiḍatâ ramantâ paricârayatâ madhu° B °bantâm̃ âdinaparâm̃mukhâni anu° M °bantâm âdinavam̃ parânmukhâni anu° B °tha te°. — 5¹. M tadâni vânijâ âhatsuḥ | . — 5². M marshata muhurtam̃°.

6. M °vânijaçatâni tâsâm̃° BM °to ekântâ pratyutkrâ(B °tyukrâ)ntâ ekântapratyutkra(B °tyukra)mi ° detsuḥ çoce(M °tsuḥ çocate)tsuḥ paridevetsuḥ ‖ . — 7. BM °tâte hâ putra (B °tre) hâ bhrâ° M °dvipakâ udyâ° BM °râho ro°. — 8. B °samâsetvâ svaka° M °çvâsatvâ svakâsvakâ° BM °ni strîmûlâtâ(M °to) | . — 10. BM tâbhi strîbhiḥ sârddham̃(M °rddha) ma° M °mâgeṇa ° çâvali° B °triṇakaṇṭhakakha° M °ṇṭakakham̃ḍakeṇa apa° B °çarkkalakaṭhalyana ni° M °thallaka nijalena samena visamena ma° B °viçamena ma° M °hâvanakham̃ḍam̃ anuprâptaḥ | sa° B °pto | sa° BM °lopetâ sa°.

12. BM sarvodakâni ° surabhiṇi(M °mîni) sugandhâni sarvodakâni sa° M °cûrṇṇagandha° B °pushkiri° M °pushkaraṇîye ca su° B °sukhaçalilâ° BM °varûtâni u° M °rikasacchannâ°. — 15. M °vanâm̃to nirgamya tâtâsâm̃° BM °çetsuḥ ‖ u° M °dvikshâmi mahe° B °kshyâni ma° M °çvetâni pam̃ḍulâni tu° B °sim̃shaṁjara° M °vâkshamârâ°. — 18. BM °dvipam̃ praveçi(M °pravâsi)tâ° M °divyâvimânasanibhâ°. — 19. M °neshu pam̃çyati paryyakâni

जका तेषु राक्षसीभवनेषु पश्यन्ति पर्यंकानि सुप्रच्छन्नानि लोमशृगोनिकास्तरणानि अवदातपटप्रत्यास्तरणानि उभयतोलोहितबिम्बोहनानि सुवर्णमयानि रूप्यमयानि दन्तमयानि अशोकवनिकादेशरमणीयानि सर्वपुष्पफलोपेतानि व्यायामशालानि सुरमणीयानि अन्नपानभोजनविधानानि सुप्रणीतानि ॥

तेषां दानि रतनामयेषु भद्रपीठेषु निषीदापयित्वा कल्पकेहि केशश्मश्रूणि कारितानि व्यायामशालेषु व्यायामकारापितानि स्नानशालेषु च स्नापयित्वा धौतमृष्टानि गात्राणि प्राञ्जयित्वा लोहितचन्दनकालानुसारेहि विलिप्तानि कृत्वा महारहाणि च परिवारयित्वा वरमाल्यदामेहि चालंकृतानि महारहाणि च भक्तोपधानानि उपनामितानि प्रत्यग्राणि च प्रणीतानि खादनीयभोजनानि उपनामितानि नानाप्रकाराणि च व्यंजनप्रकाराणि उपनामितानि खण्डाग्राणि लवणाग्राणि [282b] मधुराग्राणि तिक्ताग्राणि कटुकाग्राणि काषायाणि नानाप्रकाराणि मान्सप्रकाराणि उपनामितानि तद्यथा वराहमान्सानि मत्स्यमान्सानि तित्तिरमान्सानि वर्तकमान्सानि लावकमान्सानि कपिंजलमान्सानि एणेयमान्सानि ॥ विविधेषु च सानं नृत्यगीतवाद्यप्रकारेषु अभिरमापेन्ति मृदंगवाद्येषु आलिंगवाद्येषु सिन्धववाद्येषु पणववाद्येषु एकादशिकावाद्येषु वीणावाद्येषु नकुलकवाद्येषु सुघोषवाद्येषु भाण्डकवाद्येषु च वेणुकवाद्येषु अपरा प्रणेन्सुः । अपरा तु मधुरं प्रगायेन्सुः ॥ यदा जानेन्सुः ता राक्षसीयो संविश्वस्ता इमे वाणिजका अस्माभिरिति ततो सानं संवृद्धानि रत्नकोशानि संप्रदर्शेन्सुः । आर्यपुत्राणां वयं च प्रणीतं च सारं । मधुरं च आसनं प्रज्ञापेन्सुः । अभिरमन्तु आर्यपुत्राः इह रतनद्वीपे

su° B °ptâni çodaçaçoṇikâsta° M °ptâni shoḍaçoçoṇikâsta ° patrapra° BM °lohitabi(B °mi)mbopahatâni(B °ni |) su° M °nikânivadeça°.

5. M te dâni ratnama° BM °çmaçruṇi kâ° M °ritâni vyâyâmaçâlcshu ca vyâyâmakârâpi° BM °dhautapâ(M °pa)trâṇi gâ° M °trâṇi pâmcayitvâ lo ° ndanakârânu° B °lânuçâlchi° parivâpayitvâ va° M °mehi ca ahâkṛi° dhânâni upanâpitâni pratyapâtâni ca praṇi° B °tyapraṇi ca praṇi° M °khâdanikhâdaniyabhojaniyâni ca upa° ni mânâprakâ° lavaṇâprâṇi° B °ṇâgrâṇi | madhu° M °madhurâgrâṇi madhurâgrâṇi tiktâ° BM °nsaprakârâṇi upanâmitâni | tadyathâ || varâ° M °tittibamânsâti vakamâ° B °vakshyakamâ° BM °nsâni lâ° B °ṇeyasânsâni ||.

13. M °dheshu ca | sâtaṁ nṛi ° dyapravâdyeshu abhiramâpyeti mṛigaṁgavâdyeshu â° BM °paṇa(M °ça)vavâdyeshu | e° M °kulakavâdye sughoshavâdyeshu veṇu° B °bhâṭaka° M °aparâ prâpuṇetsuḥ a° B °ṇetsuḥ ||.

16. M °râ pi ma ° gâyetsuḥ B °gâretsuḥ | . — 17. B °jânetsuḥ tâ° M °jânetsuḥ tâḥ râ° B °visvasto | i° M °çvabho i° B °r iti | ta° BM °sânaṁ(B °naṁ sânaṁ) sâvṛi° M °ratanako° B °pradaçetsuḥ | M °rçetsuḥ | . — 18. BM °vayaṁ vâ pra° B °sânaṁ ma°. — 19¹. BM °naṁ ca prâpe(M °ye)tsuḥ a°. — 19². B °manta â° M °mantâ â° BM °trâḥ | iha rana(M °tna)dvi° M °ruputrâ pi pramatto hi pi âryyaputreṇa nagara° B °api pramehi pi âryaputre nagara ° rgeṇa ganta°.

नन्दनगता वा मरुपुत्रा अपि तु प्रमत्तेहि पि आर्यपुत्रेहि नगरस्य दक्षिणेन मार्गेण न गन्तव्यं ॥

अथ खलु भिक्षवो यस्तेषां पंचानां वाणिजकशतानां सार्थवाहो पण्डितो सप्रज्ञजातिको तस्य एतदभूषि ॥ किं नु खलु इमा स्त्रियो अस्माकं नगरस्य दक्षिणातो मार्गातो वारेन्ति । यन्नूनाहं जानेयं नगरस्य दक्षिणेन किं चात्र कथं वा ति ॥ अथ खलु भिक्षवः सार्थवाहो स्त्रियः शयिता वा मत्तप्रमत्ता वा विदित्वान असिपट्टमादाय नगरातो निर्गम्य तं दक्षिणं मार्गमनुगच्छे । यथा यथा च गच्छति तथा पश्यति आकाशे शरणं च प्रतिभयं बह्वनां च पुरुषाणां रवन्तानां शब्दं शृणोति ॥ सो दानि तेषां पुरुषाणां तं शब्दमनुसरन्तो पश्यति अयोमयं नगरं ताम्रप्राकारपरिक्षिप्तं ॥ सो दानि तस्य नगरस्य द्वारं मार्गन्तो समन्तेन प्रदक्षिणीकरोति न च तं द्वारं पश्यति बह्वनां च पुरुषाणां रवन्तानां शब्दं शृणोति ॥ हा अम्बेति क्रन्दन्ति हा ताता ति क्रन्दन्ति हा पुत्रेति क्रन्दन्ति हा भ्रातेति क्रन्दन्ति हा स्वसेति क्रन्दन्ति जम्बूद्वीपकाहो उद्यानवराहो ति क्रन्दन्ति ॥ सो तं शब्दं शृणन्तो तं नगरं पर्यागच्छन्तो नगरस्य उत्तरे पार्श्वे प्राकारस्य अनुश्रिष्टं उच्चं शिरीषवृक्षं पश्यति । सो दानि शिरीषवृक्षमभिरुहित्वा नगरे पुरुष[283a]शतानि पश्यति सोपवासिकानां दीर्घकेशनखश्मश्रूणां पूतिखण्डवसनानां वातातपदग्धत्वचमान्सानां कृष्णानां मलिनानां मलिनकेशानां क्षुत्पिपासासमर्पितानां । नखलीहि पानीयार्थं भूमिं खनन्ति पृथिवीतो उत्कृष्यन्ति दौर्बल्येन पुनर्धरणां पतन्ति ॥ ते दानि तस्य शिरीषस्य शाखापत्रपलाशशब्दं श्रुत्वा सर्वे अंजलिं कृत्वा उत्थिता ॥ को आर्यपुत्रो देवो वा नागो वा किन्नरो वा गन्धर्वो वा यक्षो वा कुम्भाण्डो वा ते वयं शरणं गताः । इतो संबन्धनातो दुःखितानि मोचेहि यथा मं पुनः स्वदे-

3. M °kshavaḥ ya ° ṇijaça° BM °prajñâjâ° M °ko tasyaitad a°. — 4. M kin tu kha° BM °imâṁ stri° M °rgâto cârenti | .

6. M °kshavo sâ ° ho tâṁ stri° BM °çayito va matta(M °ntâ) pramattâ(M °ntà)nâṁ vidi° M °sipatram â°. — 7. BM °cchati atha pa° B °kâçañçara° M °kâça çabdaṁ ca pra°. — 9. M °ṇâṁ ravantânâṁ ça ° nusmaranto° BM °çyati | a°. — 10. B sâ dâ° M °rgako sa° BM °roti | na° M °çabdânâṁ çri°.

11. BM °mbe kiṁ krandanti | hâ tâtâ kiṁ krandanti hâ pu° B °tra kiṁ krandanti çvâkoçe ti kra° M °tra ti krandaṁti hâ bhrâteti krâṁdaṁti hâ putreti kraṁdaṁti svâsakoçeti krandanti jambudvi°. — 13. M °bdaṁ çriṇvanto ° garasyottare° B °anuçishṭaṁ | u° M °rishaṁ vri° B °ti so°. — 15. B °çyati | sâ so° M °çyati | susvâsopa° B °çrûṇâṁ yottikhaṇḍavaçânâṁ vâ° M °ṇâṁ yontikhaṇḍavanasânâṁ vâ° BM °tpipâsasama ° nâṁ na°.

17. B nakharihi° BM °yârthe bhû° M °tkrippani dau° B °shyanti | dau ° tanti te°. — 19. BM °trapalâ(M °la)çaṁ çabdaṁ° M °kritatvâ u° B °tthitâ ko°. — 20. M °nâgo vâ gandharvo vâ kinnaro vâ yaksho ° te vamo ça° B °te vayo ça°.

21. BM °thâ mâṁ pu°.

शवासो भवेय मित्रज्ञातिसमागमो च भवेय ॥ अथ खलु स सार्थवाहो शिरीषगतो अश्रुपूर्णनयनो तां वाणिजकानेतदुवाच ॥ नाहं देवो न यक्षो न किन्नरो न गन्धर्वो न शक्रो न ब्रह्मा न विरूढको महाराजो वयं पि जम्बुद्वीपातो धनार्थाय यानपात्रेण समुद्रमवगाढा विपन्नयानपात्राः । एताहि स्त्रीहि उद्भृता वाणिजकशतानि । ततः अस्माभिः सार्धं क्रीडन्ति रमन्ति प्रविचारेन्ति अपि सानं च यं अप्रियं न करोम ता चास्माकं विप्रियं नेच्छन्ति ॥ ते दानि अभ्यन्तरवाणिजका आहन्सुः ॥ वयं पि मारिष जम्बूद्वीपातो धनार्थाय यानपात्रेण समुद्रमवगाढा अस्माकं पि सागरमध्ये गतानां यानपात्रं विपन्नं । ततः मं एताहि स्त्रीहि उद्भृता पंच वाणिजकशतानि अस्माकं पि सार्धं क्रीडन्ति रमन्ति प्रविचारयन्ति यथा एतरहि युष्माभिः सार्धं । यदा युष्माकं यानपात्रो विपन्नो वातेन च येन राक्षसीद्वीपं तेन चिन्नो ततः एताहि राक्षसीहि यूयं दृष्टा अस्माकं पंचानां वाणिजकशतानां अड्डातिया वाणिजकशता आखायिता ये अस्माकं मूलातो दारका जाता ते पि सानं खायिता वयं अड्डातिया वाणिजशता इह ताम्रनगरे प्रचिन्ना । न एता मारिष मानुषिका राक्षसीयो एतायो ॥

सो दानि सार्थवाहो शिरीषगतो तेषामभ्यन्तरिमकानां वाणिजकानां ताम्रनगरप्रचिन्नानां तं वचनं श्रुत्वा भीतो त्रस्तो संविग्नो अंजलिं कृत्वा पृच्छति ॥ आचिक्षथ किं उपायं यथाहं तासां राक्षसीनां मूलातो स्वस्तिना मुंच्येय ॥ ते दानि आहन्सुः ॥ कार्तिकपूर्णमास्यां केशी नामाश्वरा[283b]जा उत्तरकुरुद्वीपातो अकृष्टोप्तं शालिं अकणं अतुषं सुरभितण्डुलफलं परिभुंजित्वा इमं राक्षसीद्वीपमागच्छति । सो इहागत्वा त्रीणि वारां मानुषिकाय वाचाय शब्दं करोति । को इह महासमुद्रस्य पारं गन्तुमिच्छति अहं स्वस्तिना उत्तारयिष्यामि । तं हयराजं शरणं

1. M °ṇijakâm̃ eta°. — 2. M °dhanârthaya° B °gâdhâ vi° BM °pannâ yânapâtrâḥ (M °trâ) | . — 4. B °ddhṛito vâ° BM °ni ta°. — 5. M °asmâbhi sâ ° câreti api sânam̃ vayam̃ a° BM °priyam̃ karoma na câ(M °ma ‖ na co)smâkam̃°.

6. M °âha | . — 7. M °jambudvi° B °nâm̃ pânapâ ° nnam̃ ta°. — 8. M tato me ekâbhi strî° B °taḥ me etâ° M °ṇijaçatâ° B °tâni kasmâ° BM °kam̃ pi sârddham̃ e(M °rddhan) tâbhiḥ strîbhiḥ kri° M °manti paricârayanti | yathâ etarhi yushmâbhi sâ° BM °rddham̃ ya°. — 10. M °dvipe te° BM °na kshiptâ ta° B °drishṭvâ kasmâ° BM °cânâm̃ vâṇija(B °jaka)çatânâm̃ âvṛi(M °vṛittima vâṇijaçatânâm̃ âvṛi)ttiya vâṇija(B °jaka)çatâ khâditâ te (B °tân âkhâyitâ ye) pya ° dârakajâ° M °nam̃ khâyitâḥ vayam̃ ca aṭṭâtiya vâṇi° B °yam̃ âṭṭâtiya vâṇi° M °kshiptâḥ ‖ .

14. M na etâm̃ mâri° B °risha mânashikâ°. — 15. M °teshâm̃m abhya ° am̃jali kṛi°.

16. M âvishyatha kim upâ° BM °thâ ca tâsâm̃° B °mûlato°. — 17. M °hatsuḥ | . — 18. BM °keço nâ° M °rṇṇamâsyâ ke ° liṁ açaṇam̃ atu °ṇḍulam̃ pha° B °sidvipam̃m â°. — 20¹. M °tvâ triṇi°. — 20². M °uttarishyâ° BM °mi tam̃°.

प्रपद्यथ । सो युष्माकं इतो राक्षसीद्वीपातो समुद्रस्य पारं प्रापयिष्यति ॥ तेषां पंचानां वाणिजकशतानां यो वा तस्य हयराजस्य बालेष्ववलंबिष्यति अन्यतरान्यतरे वा अंगजाते तेषां पि च पुरुषाणां परस्परस्य अवलंबिष्यति महाकारपृष्ठिस्थितस्य अनुलम्पिष्यति शतं वा सहस्रं वा अनुपूर्वेण जम्बुद्वीपं प्रापयिष्यति । एषो व उपायो इतो राक्षसीद्वीपातो स्वस्तिना जंबुद्वीपं गमनाय नास्ति अन्यो ॥ सो दानि सार्थवाहो तेषामवरुद्धानां वाणिजकानामाह ॥ आगच्छथ यूयमपि सर्वे जम्बुद्वीपं गमिष्यामः । एवं तावत् नगरप्राकारं लंघयथ हेष्ठतो वा खनथ ॥ ते तं आहन्सुः ॥ न त्वं जानासि कीदृशो राक्षसीनगरं नातो वयं शक्ष्यामः लंघयितुं । तुम्हे पुनः यदि इच्छथ पलायथ एवं वो मोक्षो भविष्यति । अथ दानि ताम्रनगरे प्रक्षिप्यथ नास्ति वो मोक्षो ॥ गच्छथ यूयं क्षेमेण स्वकं देशं अमुके च नगरे अस्माकं पितुज्ञातयो तेषां अस्माकं वचनेन पृच्छित्वा वक्तव्यं देथ दानानि करोथ पुण्यानि । अपि खण्डकपालेन कुलेकुलेषु भिक्षेन्ता जंबूद्वीपे वसथ मा च पुनः समुद्रं ओतरिष्यथ यक्षेमान्येदृशानि दुःखानि परस्य वा प्रेष्यकर्म कृत्वा जीविकां कल्पेथ मा च समुद्रमवतरणाय चित्तं करोथ यच इमानि एवंरूपाणि दुःखानि ॥ सो दानि आह ॥ मारिष आत्मना गमिष्यामि पुरा मे राक्षसी शयिता विबुध्येत मा मे जानेया इह आगमनं ॥ सो दानि सार्थवाहो ततो शिरीषातो ओतरति इमेहि च अभ्यन्तरिमकेहि वाणिजकेहि खादिता वयं राक्षसीहि अविधाविधा ति विक्रुष्टं इदमस्माकं पश्चिमं ज्ञातीनां दर्शनमिति ॥

सो दानि सार्थवाहो ततो शिरीषातो ओतरित्वा यथागतेन मार्गेण गत्वा तच राक्षसीये शयने शयितो ॥ सो त[284a]च शयनगतो चिन्तयति ॥ कथमेतेषां

1¹. M °kshasidvi° B °ti te°. — 1². BM te purushâḥ pam̃ ° râjasya câle(M °re)shvavalam̃bishyati | anyatarâ° M °re shu aṅgajâ° BM °sparasya anulam̃bi(M °lagnayi)shyam̃ti | mahâ° M °kâlaprishṭesmi° B °prishṭismi ° gnishyanti ça° M °gnishyam̃ti | ça ° dvipam̃ proshayishyati | B °yishyanti | . — 4. BM esho ca u°. — 5. BM °teshâm̃m a°.

6. M °shyâmi | . — 7¹. M °tâvan naga ° ghayitha he° B °heshṭato ° natha te°. — 7². B teshâm âha° M teshâm̃m âhatsuḥ ‖ . — 8. M °tvam̃ yânâsi° B °nagarâto va° M °nagarâto ti vayam̃ çakyâmaḥ° B °maḥ ‖ lam̃ ° tum̃ tumhe°. — 9¹. M tushphe pu ° vam̃ sho moksho°. — 9². M °mokshâ B °ksho ga°. — 10. BM gacchatha | yû ° kam̃ pitur jñâta° B °pricchetha va° M °pricchatha va°.

12. M °na kulokuleshu bhikshetâmbudvi ° dram̃ ottarishyatha | yatre ° parasparo preshyakarma kṛi° BM °rotha yathâ yatra°. — 15². M °âtmavo ga° B °âmavo gamishyâmi ‖ pu ° kshasayitâ vi° M °kshasaçayitâni bu°.

16. B °tato ca çishâto° M °tato çirshâto otaritvâ vâbhya° B °ima ca abhya° BM °ntarama° B °dito vayam̃° M °ditâḥ va° BM °sihi âvi(M °bhi)dhâvidhâ trivikushṭam i°. — 19. B °kshasidvipe çaya° M °sipe çayana çayi°. — 20¹. M °tapra ça°. — 20². B kathaṁm etc° M °t kârya sam̃° B °drishṭvo ca çru° B °dhyetsuḥ e° M °turyo kâ° B °kâryâ ya°.

वाणिजकानां एतत्कार्यं संबोधेयं यथा मे स्वयं दृष्टो च श्रुतो च न च इमे राचसी बुध्येन्सुः एषो च तुज्यो कार्यो ॥ यदि एतेषां वाणिजकानां इदानीं एव असंप्राप्तेन हयराजेन एतं कार्यं आचिचिष्यामि ततो एतेषां पंचानां वाणिजकशतानां अन्यतरान्यतरो वाणिजको मत्तो वा प्रमत्तो वा राचसीनामाचिचेया ततो अनुतप्यनीयं भवेत्सर्वे च अनयातो व्यसनमापद्येम ॥ तच पण्डिता प्रशंसन्ति । यस्य कस्यचि गुह्यं समाख्यातं दुर्लभा ते सत्पुरुषा ये शक्नोन्ति गुह्यं धारयितुं ॥ यं नूनाहं स्वयमेव एतं गुह्यं धारयेयं यावत्कौमुदी चातुर्मासी ततः सामं हयराजेन इमं राचसीद्वीपमनुप्राप्तेन एतमादीनवं आचिचिष्यामि ॥ सो दानि तं गुह्यं स्वकहृदयेन धारयति न कस्य चि आचिचति यावत्कौमुदी चातुर्मासी ॥ कौमुदी च उपस्थिता हयराजो राचसीद्वीपमनुप्राप्तो । ततो सार्थवाहेन तेषां पंचानां वाणिजकशतानामारोचितं ॥ मा अद्य प्रमादं करोथ स्त्रीषु वा अन्नपानेन वा गीतवाद्येन वा अस्मि किञ्चिदर्थमाचो यो भवद्भिहि मम सकाशातो श्रोतव्यो । अमुको प्रदेशो प्रतिगुप्तो तच सर्वे समागच्छथ ताहि स्त्रीहि शयितहि ॥

ते दानि सर्वे वाणिजकशता ताहि स्त्रीहि शयितहि तच प्रतिगुप्तप्रदेशे सर्वे समागता समागच्छित्वा तं सार्थवाहं पृच्छन्ति ॥ जल्पथ सार्थवाह यं ते किंचिद्दृष्टं वा श्रुतं वा ॥ सार्थवाहो तेषां वाणिजकानां वर्तमानीं सर्वामाचिचति ॥ एतं मम एवं चित्तमुत्पन्नं किस्य एता स्त्रियो अस्माकं नगरस्य दचिणपंथातो निवारेन्ति । ततः कौतूहलेन महता सहसोपिनीये शयितायें असिपत्रं गृह्य नगरस्य दचिणेन पन्थेन गतो ॥ तच मे ताम्रमयं नगरं दृष्टं अद्वारं न चास्य द्वारं पश्यामि बन्धुजनस्य च क्रन्दनशब्दं शृणोमि ॥ सो हन्तं नगरं अनुप्रदचिणीकरोन्तो

2. M °ryam ânicchishyâ° B °âcikshyâ° BM °mi | tato e° M °ro vânijakâ matto° BM °sinâm âcaksheyâ(M °ya) tato a(M °to')nu° M °padyiyâmah | . — 5. M °tra pamḍitâ praçamsamti ya° B °paṇḍi praçasanti | .

6. M °cid guhyam samâkhyântam || durllabhâ ya satpu° B °khyântam dullabhâ° M °knotti gu° B °tum yam°. — 7. M °m evam etam° BM °yeyam | yâ° B °tah smenam °knotti gu° B °tum yam°. — 8. BM °svakamhṛi° M °sya cid âcikshishyati | yâ° B °âcishyati°. — 9. M °sthitâh ha ° prâptah ta°. — 10. M °citâm | .

11. M °prasâdam° B °rotha | stri° M °gita vâ asti° B °gitavâdye vâ asti° M °tro vo yo bhavantohi° B °bhavente° BM °çrotavyâ | . — 13. M °ko padeço° B °tha || tâ° M °tha | tâbhi stribhih çayibhâbhih B °yitâhi te°. — 14. M °kaçatâni tâbhi stribhih çayitâbhis tatra ° guptopadeçe° B °rveṇa samâga° M °rveṇa samâgatocchitvâ° BM °pricchati ja°. — 15. M °kimci drishtam°.

16. M °rttamânim savam âci° B °sarvam âci°. — 17. M etam mamevam° B °cittamm u° BM °sya ete stri° M °kshinepam°. — 18. M tato kau° B °hato siyinidhiye çayitâe a° M °hato sipitidhiye ça ° ṇena patthena ga°. — 19. B °drishṭvam a° M °shṭam advâram câ ° krandaçabdam°.

तस्य नगरस्य उत्तरे पार्श्वे उच्चशिरीषमद्राचीत् । सो हं तं शिरीषं अभिरुहित्वा तन्नगरमवलोकेमि ॥ तच च मे बहूनि वाणिजकशतानि उपरुद्धानि दृष्टानि शुष्कानि धमनीसन्ततवातातपदग्धत्वचमान्सानि कृष्णानि मलिनकेशानि पानीयार्थं नखलीहि भूमिं खनन्ति चुत्पिपासासमर्पितानि । अपराणि कंकालशतानि वि[284b]चिप्तानि दशदिशो विकीर्णानि । तच च अमुकातो अमुकातो नगरातो अमुको च अमुको च वाणिजो ते च वाणिजा सर्वे व आगता । तेषां वाणिजकानामाचिचितो ॥ ये तच जीवन्ति राचसीहि खादितावशेषा अपरे पि अद्भुतियमाचाणि वाणिजकशतानि ये एताहि राचसीहि खादिता ॥ ततो एता न मानुषिका सर्वाः एता राचसीयो ॥ यदि वयं यत्नं न करोम स्वदेशगमनाय एवमेव सर्वे अनयातो व्यसनमापद्यिष्याम एतेन राचसीगणेन ॥ यदि इच्छथ राचसीनां हस्तातो मोचं चेमेण च जम्बुद्वीपं गमनाय केशी अश्वराजा उत्तरकुरुद्वीपातो अकृष्टोप्तं शालिं भुंजित्वा अकणं अतुषं सुरभितण्डुलफलं कार्तिकपूर्णमास्यां इह राचसीद्वीपमागच्छति इमस्य राचसीद्वीपस्य उत्तरपार्श्वेण समुद्रतीरे स्थित्वा को पारगामीति घोषेति । ततस्तच हयराजस्य समीपं गच्छामः । सो स्माकं चेमेण स्वदेशं प्रापयिष्यति ॥

ते दानि पंच वाणिजकशता सार्थवाहेन सार्धं राचसीनगरस्य उत्तरपार्श्वे गता ॥ तेहि केशी अश्वराजा समुद्रतीरे तिष्ठन्तो दृष्टो ग्रीवमुन्नामेत्वा को पारगामीति घोषन्तो ॥ ते दानि सर्वे पंच वाणिजकशता कृतांजलिपुटा तं केशिमश्वराजमुपसंक्रान्ता ॥ महाकारुणिक तव शरणागता स्म वयं पारगामी गतो अस्माकं तारे-

2. BM °drishṭvâni çu° B °santantavâ° M °santaptavâtâpada° B °malinake ° rthaṁ nakharihi bhûmi khananti | kshu° M °miṁ khanamti kshu° BM °tpipâsasama°. — 4. BM °ni karaṁ(M °laṁ)kaçatâ ° ptâni diçodiça viki(M °sti)rṇṇâ° B °ni ta°. — 5. BM tatra ca amukâto nagarâ(B °râto amukâto nagarâ)to amuko(M °kâ) ca amuko(B °kâ) ca vâ(M °ca pâ)ṇijo tathâ amuko(B °mukâto) pi nagarâto tena vâṇijâ sarveṇa mârgeṇa te°.

6. M °kshitâ B °kshitâye | ta°. — 7. B tatra° M °nti râkshasihi khyâditâ 'vaçe° BM °re pi attatiya° M °etâbhi râkshasibhi khyâditâh B °ditâ ta°. — 8. M °to ete mânu° B °to etena mâ° M °sarve etâm râ° B °rvâh | etâ râ° BM °yo ya°. — 9. M °nâya | evaṁm evaṁ sarvem a° B °m evaṁ sarve° M °padishyâmah || ete râ° B °shyâma | e ° ṇena ya°. — 10. M yadi dricchatha || râ ° kshaṁ kshameṇa ca° B °kshaṁ kshamena ca ° rudvipâto âkri ° liṁ cavitvâ° M °liṁ cyavitvâ ° ṇḍulaṁpha ° iha râkshasidvipasya uttareṇa pârçve° B °iha râkshasidvipaṁm âgacchati i ° ttare pârçve°.

14¹. M tato tatah ha°. — 14². M so 'smâ° BM °kaṁ kshamena sva°.

16. M °nî sarve paṁca vânijaçatâni sârtha ° ttare pârçve gatâh B °gatâ te°. — 17. BM tchi çokehi açva ° shṭhato(B °shṭhanto |) drishṭvâ gri° M °tvâ kah pâ ° ghoshaṁte | . — 18. M ṇijaçatâ ° çvagajaṁ upa°. — 19. M °çaraṇagatâ sma° B °gâmiṁgatâ a° M °migatâh a°.

हि ॥ सो दानि अश्वराजा तेषां वाणिजकानां समनुशासति ॥ यं वेलं अहं इतो राक्षसीद्वीपातो युष्माकं गृहीत्वा चिष्कृत्यं हीषित्वा खगपथेन प्रक्रमिष्यं ततो राक्षसीयो ये युष्माकं भवन्ति दारका वा दारिका वा तानि आदाय आगमिष्यन्ति बह्वनि करुणकरुणानि प्रलपिष्यन्ति मा आर्यपुत्रा परवचनेनास्माकं परित्यजथ मा च इमं रमणीयं रत्नद्वीपं बज्ररत्नमनन्तरत्नं परित्यजथ ॥ ततः युष्माभिः तेषां राक्षसीनां वचनं नाभिश्रद्धितव्यं यो च तेषां वचनं अभिश्रद्धिष्यति सापेक्षो भविष्यति एषा मे भार्या एषो मे पुत्रो एषा मे धीता ति भूयो राक्षसीनां वशमागता भविष्यन्ति मम पृष्ठतो धरण्यां प्रपतिष्यन्ति । ये च तेषां राक्षसीनां वचनं नाभिश्रद्धिष्यन्ति [285ª] न मे एषा भार्या न मे एषो पुत्रो न मे एषा धीता ति ये च निरपेक्षा भविष्यन्ति ते बालमपिश्लिष्टा मे स्वस्तिना जंबुद्वीपं गमिष्यन्ति ॥

एवं भिक्षवः स केशी अश्वराजा तेषां वाणिजकशतानां समनुशासित्वा चिष्कृत्वो हीषित्वा सर्वं वाणिजगणं आदाय खगपथेन प्रक्रान्तो ॥ ता राक्षसीयो तस्य केशिस्य अश्वराजस्य हीषणशब्दं श्रुत्वा स्वकस्वकानि दारकदारिकानि आदाय आगता । मा आर्यपुत्रा परवचनेन अस्माकं परित्यजथ मा च इमं रमणीयं रतनद्वीपं बज्ररत्नं अनन्तरत्नं परित्यजथ ॥ ये खलु भिक्षवः तेषां वाणिजानां राक्षसीनां मूले सापेक्षा अभूत्सुः ते दानि पृष्ठतो महिं पतिता ये निरपेक्षा अभूत्सुः ते स्वस्तिना राक्षसीद्वीपातो जंबुद्वीपमनुप्राप्ता ॥

स्यात्खलु पुनः भिक्षवः युष्माकमेवमस्यादन्यः स तेन कालेन तेन समयेन केशी अश्वराजा अभूषि । नैतदेवं द्रष्टव्यं । तत्कस्य हेतोः । अहं स भिक्षवः तेन

1¹. M °nuçâsayati | . — 1². BM °lañ ahan te i ° pâto asmâkañ° B °tritkṛittyañ hi° M °tyañ hîshi° B °shitvâ shagapathena krami° BM °shyañ | ta° M °siyo yo yushmâñkañ bhavati | dâra° B °bhavati dâra° M °rikâ kâ tâ° BM °mishyanti | bahuni karuṇa° B °ni ca yalapi° M °ni ca palâyishyañti | mâ â° BM °putra para° M °kañ parityajatha mâ ca imâni dârakadârikâni parityajatha | mâ ca imañ° BM °huratnam a(B °m e)nantaraṁ parityajatha | . — 5. M °shmâbhis teshâñ ° nâñ vacananaṁ nâ° BM °ksho bhavishyati ‖ eshâ me bhâ ° tro esho me dhî° M °tâni bhûyaḥ râ° BM °çam âgatâ bhavishyanti ma° B °pṛishṭato dha° M °dharaṇyañ pra°.

8. BM °dhishyanti(M °nti |) na me bhâ° M °ryâ na me putro esho na me yeshâ dhitâni ye ça ni ° vishyati me bâlam açli° B °vishyanti | te° M °svasti jambûdvî°.

11. M °kshavo sa ke ° ṇijaça° B °shkṛittyâ hi° M °shkṛitvâ hishîtvâ sarvañ°. — 12. M tâḥ râ° BM °keçishya a° M °jasya bhîshaṇa ° dâya gatâ â° B °tâ mâ°. — 14. M âryya° BM °kañ parityaja(M °jya)tha | mâ ca sva° M °ni parityajatha | mâ ca i ° yañ ratnadvî ° tnañ paritvajathâ ‖ . — 15. M °kshasânâñ mûle çâpekshâ abhûtsuḥ | te dâ° B °pṛishṭato ma° M °mahî patitâḥ ye nirapekshâ abhûtsu te sva° B °titâ | ye nirapekshâ abhûnsuḥ | te sva°.

18. BM °shi nai°. — 19². M °hetor ahañ°. — 19³. M °lena tena ke° B °bhûshiḥ ‖ .

12². M ato de ° kavarehi pra° B °veniya°. — 13¹. M °âṇantâm. — 13². M °veçiyantâm api° B °veçiyantânâm apyidhâ ° dethah ‖ . — 14. BM °jño kâko bra° B °gurushaṁ a° M °marsha sam°. — 15. M °sho kâko dhûrto mu° B °sâhasriko° M °stehi purushehi na ça° B °çakyeti ra° M °tum | anantaram dri°.

16¹. BM °ttam yo°. — 16². B °lliyeyan tasya° M °lliyeyah tasya vipulam abhicchâdanam tasya dadeyam° B °cchâdayam tasya dadayeyam sa°.

अपरा दानि चेटी राज्ञो ब्रह्मदत्तस्य अर्पयतो स्वकाये देवीये कबलं आदाय वस्त्रेहि अपिहित्वा गच्छति । सा दानि तेन काकेन दृष्टा । तस्य एतदभूषि । कथं अतो चेटीय हस्तातो भोजनं हरेयं । यन्नूनाहं अस्या चेटीये नासाये लग्नेयं ततः सा चेटी चस्या इमं भोजनं उज्झिष्यति ततो अहं यं तं भोजनं गृह्य गमिष्यामि ॥ सो दानि येनाभूद्दासी ओपतित्वा ताये चेटीये नासे लग्नो । तच नासे व्रणो चतो । चेटीये भीताये भोजनमुज्झित्वा सो काको उभयेहि हस्तेहि गृहीतो ॥ सा दानि चेटी काकमादाय नासाय रुधिरेण घरन्तेन राज्ञो ब्रह्मदत्तस्य उपसंक्रान्ता । अयं सो दुष्टकाकः गृहीतो ॥ सो दानि राजा ब्रह्मदत्तो तस्या चेटीये प्रीतो संवृत्तो । शोभनं ते कृतं यं त्वया एषो काको गृहीतो ॥ तेन दानि राज्ञा ब्रह्मदत्तेन ताये चेटीये विपुलो आच्छादो दिन्नो ॥ सो च काको परिभाषियति । न शोभनं यं त्वं राजकुलं पि धर्षयसि ॥ सो दानि काको राजानं ब्रह्मदत्तं गाथाये अध्यभाषे ॥

वाराणस्यां महाराज काकराजा निवासितो ।
अशीतिकाकसहस्रेहि सुपाचो परिवारितो ॥
तस्य दोहलिनी भार्या सुपार्श्वा मान्समिच्छति ।
राज्ञो महानसे पक्वं प्रत्यग्रं राजभोजनं ॥
तस्याहं वचनं श्रुत्वा करन्तो अनुशासनीं ।
भर्तुरपचितिं कृत्वा नासाये अकरि व्रणं ॥

अथ खलु भिक्षवः राजा ब्रह्मदत्तो तस्य काकराजामात्यस्य प्रीतो संवृत्तो । इमस्य काकराजामात्यस्य तस्य काकराजस्य सकाशातो नैव ग्रामो न भोगो नापि

1. M apara dâ ° sya aparakâte sva° B °sya apakâte sva°. — 2¹. BM °kâlena dṛishṭvâ ta°. — 2². M tasyaita°. — 3¹. B °reyaṁ ya°. — 3². BM yannû(M yaṁ nû)nâhaṁ asya ca ye nâsâ ° gneyaṁ | tataḥ° B °ujhishya° M °ujhishyati tataḥ a° BM °haṁ yato bhojanaṁ gṛi°. — 5¹. B °ni yenâbuddhasyo o° M °ni yenâbudhasya o ° nâso la° BM °gno ta°. — 5². M °vraṇo kshâṇo B °kshaṇo ce°.

6. M °bhojanaṁ âjhitvâ ‖ so° B °bhojanam ojhitvâ ‖ so° BM °stehi sâ dâ°. — 7. B °ti kâkâṁm â° BM °nâçâya ru° B °krânto | M °krântâḥ ‖ . — 8¹. M °so deva dusto kâko gṛi°. — 8². BM °tasya ce° B °vṛitto ço°. — 9¹. M sobhanaṁ° BM °to te°. — 9². M °râjño bra°. — 10. M °shiyanti | B °yati na ço°.

11¹. M na sobhana yaṁ° B °dharshayesi | . — 11². B °ko râjñaṁ bra° M °ko râjaṁbra°. — 13. BM °kâjarâjanivâsiko ‖ (M °site). — 14. B °suyâtro° M °suprâpto pa°. — 15. M °doharinî bhâryâ supârçve mâ°.

18. M bhartu apacituṁ kṛi° B bhartuṁ apacintiṁ kṛitvâ nâçâye akari praṇaṁ | M °nâçâyeshu kari vraṇa ‖ . — 19. M °kshavo râjâ brahmadanto tasya kâkasya râjâmâ° B °tto i°. — 20. M imaṁsya kâkarâjâ ° pi ca atya kvaci° BM °ttiḥ sva°.

च अन्या काचिद्वृत्तिः । स्वकेन तुण्डेन वृत्तिं पर्येषन्तो आत्मत्यागं तस्य काकराजस्य कार्यं करोति ॥ अथ भिक्षवो राजा ब्रह्मदत्तो अमात्यपार्षद्यां गाथाये अध्य[299b]भाषे ॥

एतादृशो अरहति राजभोगं हि भुंजितुं ।
यथायं काकराजस्य प्रभ्रु आमरणाद्विजो ॥

तस्य दानि काकस्य राज्ञा ब्रह्मदत्तेन दैवसिकं राजभोजनं अनुज्ञातं । राजभोजनस्य प्रत्यग्रस्य नानाप्रकारस्य पूरं भाजनं कृत्वा तस्य काकस्य अर्थाये एकान्ते क्षिप्यति अतः तं दैवसिकं स्वयं च भुंजेसि काकराजस्य च हरेसि ॥ परिवारस्य आणत्तं । न केनचिदेतस्य काकस्य राजकुलं गच्छन्तस्य वा आगतस्य वा किंचिद्व्याघातं उत्पादयितव्यं ॥

भगवानाह ॥ स्यात्खलु पुनर्भिक्षवो युष्माकमेवमस्यादन्यः स तेन कालेन तेन समयेन सुपाचो नाम काकराजा अभूषि । न खल्वेवं द्रष्टव्यं । तत्कस्य हेतोः । अहं स काकराजो अभूषि ॥ या काकराजस्य भार्या सुपार्श्वा नाम सा एषा यशोधरा अभूषि ॥ यश्च काकराजस्य अशीतीनां काकसहस्राणाममात्यो अभूषि एष स कालोदायी स्थविरः ॥ यो भूद्राजा ब्रह्मदत्तः स एष राजा शुद्धोदनो अभूषि ॥ तदापि एषो एतेन प्रसादितो एतरहिं पि एष एतेन प्रसादितः ॥

काकजातकं समाप्तं ॥

भिक्षू भगवन्तमाहन्सुः ॥ पश्य भगवन् कथमियं महाप्रजापती भगवतो शोकेन अन्धा संजाता भगवन्तं चागम्य अनन्धा संजाता ॥ भगवानाह ॥ न भिक्षवो एतरहिमेव एषा महाप्रजापती मम शोकेन कारुण्येन च अन्धा संजाता मम एव

1. B °vṛittiyaṁ pa° M °ttiṁ saṁparye°. — 2. M atha khalu bhi°. — 4. BM °ço aharati(B °ti |) râjabhogâṁ(M °gaṁ |) hi ° tuṁ ya°. — 5. BM °sya prâṇamâraṇâdvijo | .

6¹. M °kâkarâjño bra° B °ttena devasi° M °anusâjñâtaṁ | . — 6². M râjabhâjanasya pratyaṁgra° BM °prakâraṁtasya pûraṁ bhojanaṁ° M °ekânte prakshipati ato taṁ dai ° harati | . — 8. M °âṇantaṁ B °ttaṁ na°. — 9. M °gacchantaṁsya vâ â° B °cchantaṁ tasya vâ agantasya vâ kiṁcid vyâ° M °kiṁ vidyâghrâtaṁ u°.

11². M °kshavaḥ yu° B °bhûshi na kha°. — 12¹. M °vaṁ taṁ devaṁ drashṭu tat ka°. — 13¹. M °râjâ a°. — 13². M so dâni kâka ° rçvâ nâma esho yaço ° abhû yo°. — 14. M yasya kâkarâ ° çitinâṁ° BM °shi ‖ e° M °sthaviro B °raḥ yo°. — 15. M °hmadanto sa°.

16. M °hiṁ pi esha etena prasâditar iti ‖ . — 17. M iti çrîmahâvastuavadâne kâ°. — 18¹. M bhikshur bhaga ° m âhaṁsuḥ ‖ . — 18². M °saṁjâto ‖ . — 19². BM °him evam eshâ ° runye(M °ne)na ca saṁjâtâ(M °to) mama eva° M °jâto ‖ .

चागम्य अनन्धा संजाता । अन्यदाप्येषा महाप्रजापती मम आगम्य अनन्धा संजाता ॥ भिक्षू आहन्सुः ॥ अन्यदापि भगवन् ॥ भगवानाह ॥ अन्यदापि भिक्षवः ॥

भूतपूर्वं भिक्षवः अतीतमध्वाने हिमवन्तपार्श्वे चण्डगिरिर्नाम पर्वतो तस्य दानि पार्श्वे महन्तो वनखण्डो वृक्षसहस्रेहि पुष्पफलोपेतेहि संछन्नो पद्मिनीहि च आश्रमेहि च उपेतो ऋषिगणानुचीर्णो प्रान्तो प्रविविक्तो ॥ तत्र महान्तं हस्तियूथं प्रतिवसति षड्दन्तकुलं ॥ तहिं आजनियो हस्तिपोतो जातो षड्दन्तो इन्द्रगोपकवर्णो सप्तांगसुप्रतिष्ठितो कुमुदवर्णो । सो यदा संवर्धितो तदा मातां गुरुगौरवेण प्रेम्नेन च परिचरति । तस्या पूर्वं भोजनं पानीयं च दत्त्वा पश्चादात्मना परिभुंजति कालेन च तां कालेन उद्वतशरीराया वन[300a]लताया परिमार्जति स्नापयति ॥ एवं सो हस्तिपोतो सावहितं प्रसादेन प्रेम्नेन च गौरवेण च सर्वकालं जनेत्रिं परिचरति ॥ सो दानि कदाचित्तां मातुं स्नापयित्वा परिविषित्वा आसितां ज्ञात्वा गजगणेन सार्धं चरन्तो वाह्येन निर्गतो ॥ सो दानि मृगलुब्धकेहि मृगव्यं अखन्तेहि दृष्टो तेहि गत्वा काशिराज्ञो निवेदितं । देव अमुत्र वनखण्डे एदृशो गजपोतको प्रतिवसति प्रासादिको दर्शनीयो देवस्य योग्यो भवेय ॥

अथ खलु भिक्षवः काशिराजा तेषां लुब्धकानां श्रुत्वा सबलवाहनो तं वनखण्डमागमे ॥ तेन स हस्तिपोतो वनखण्डातो निगृह्य अपराहि करेणुहि परिवारितो वाराणसीं प्रवेशितो हस्तिशालायां च थापितो ॥ तस्य दानि राज्ञो

1. B °pyesho mahâ° M °pyeshâm̃ mahâ°. — 2¹. BM bhikshu â° M °hamsuḥ ‖ . — 2². B °dâbhi bha° M °gavân ‖ . — 2⁴. M etacahim evam̃ eshâ mahâprajâpati mama çokena kâruṇyena ca samjâto mama eva câgamya anandhâ samjâtâḥ ‖ anyadâpyesha mihâprajâpatiḥ mama âgamya anandhâ samjâtâḥ ‖ bhikshu âhamsuḥ ‖ anyadâpi bhagavan‖ bhagavân âha ‖ anyadâpi bhikshavo bhû° B °kshavaḥ bhû°. — 4. M °ntapârçve cam̃dagiri nâma parvato ‖ tasya ° rçve mahamto vana° B °ni pârçve mahato vanakhaṇde vṛi° M °phalepe ° çramehi ye u° B °ṛishiga° BM °kto ta°.

6. M °ti ‖ shaddam̃taku° B °lam̃ ta°. — 7. M tehi â ° poto japto sha ° saptâge su° BM °pratishṭito ° rṇṇo so°. — 8. M °to ntadâ so tâm̃ gu° B °dâ mâtâ gu° M °ṇa ca pre°. — 9. BM tasya pû ° ca datvâ pa ° bhum̃janti kâ ° rirâ yâva na (M °nna) lâbhâyâm̃ pa ° rjati sthâpayati | .

11. B °stipâto sarvehito pra° M °stiposo sarvehitam̃ pra ° premanena ca gau° B °janestrim̃ pa°. — 12. BM °cit tam̃ mâ ° viçitvâ âsitam̃ jñâ° M °ṇena ca sâ° BM °hyeṇa ni°. — 13. B °vyam̃ aṇthakehi dṛishṭvâ te° M °vyam̃ akam̃thakehi dṛishṭâ te ° râjñâ ni°. — 14. M °amuka vana ° gajayoto pra° B °gajapâtako ° ti ‖ prâ° M °veyâ ‖ .

16. M °kshavo kâçi ° balo savâha° B °balo havâha ° khaṇḍa âgame te° M °khaṇḍa âgamantena so ha°. — 17. B °vanashaṇḍâ° M °vanakhaṇḍâto ° apare kareṇu° B °apare vareṇu° BM °veçitvâ hastiçâ ° ca dhâvito ta°.

भवति । भद्रको मे अयं यानो भविष्यतीति ॥ सो दानि सर्वसत्कारेहि सत्क्रियति स्वयं राजा तस्य भोजनं च पानीयं च ददाति । तस्य तं सर्वसत्कारं न प्रीणयति शोकेन तां मातरं अनुस्मरन्तस्य गम्भीरं च निश्वसति अश्रूणि च पातयति शुष्यति च मिलायति च ॥ सो दानि राजा प्रेम्नानुगतो अंजलिं प्रगृह्येत्वा तं गजपोतं पृच्छति ॥ सर्वसत्कारेहि ते गजोत्तम सत्करोमि अथ च पुनस्त्वं शुष्यसि च मिलायसि च परिहायसि च वर्णरूपतो न च ते पश्यामि उद्ग्रमात्तमनं प्रहृष्टमुखवर्णं । देहि मे वाचं आख्याहि केन ते उपकरणेन वैकल्यं उपस्थापयिष्यामि प्रियो च मे त्वं गजोत्तम मनापो च आख्याहि मे केन त्वं परिहायसि भोजनं च पानीयं च न प्रतीच्छसि ॥ सो दानि गजपोतो राज्ञा पृच्छीयमानो मानुषिकाये वाचाये आह ॥ देव न मे केनचिद्वैकल्यं उपकरणेन नैवमाहारेण मम कृत्यं मम माता तहिं वनखण्डे प्रतिवसति जीर्णा वृद्धा गतवया चक्षुर्विहीना दुर्बलकाया यदा विज्ञाप्राप्तो स्मि नाभिजानामि मातुर्पूर्वं अदत्त्वा भोजनं वा पानं वा स्वयं परिभुंजितुं । एष मे समादानो मम मरणं इहैव भविष्यति । न पुनरहं अदत्त्वा माताये स्वयं परिभुंजेयं भोजनं वा पानीयं वा ॥ सो दानि काशिराजा धार्मिको च सकृपो च परानुग्रहप्रवृत्तो च । तस्य एतदभूषि । आश्चर्यमिदं इमस्य हस्तिपोतस्य याव मातृज्ञो च धार्मिको च आजानेयो च यस्य अद्य एत्तकानि दिव[300b]सानि भोजनं अप्रतीच्छन्तस्य पानीयमपिबन्तस्य मातृशोकेन । एकत्येषु मनुष्येषु नैते गुणा सुलभरूपा ये इमस्य गजपोतस्य । नैतमस्माकं साधु न प्रतिरूपं यं वयं इमानेवरूपा कल्याणसत्वा विहेठाम ॥ सो दानि महामात्राणामाह ॥ मुंचथ एतं हस्तिपोतं गच्छतु वनखण्डं यतो स्माभि आनीतो मातृवर्तको मातरे

1². M °hi satkriya°. — 2. B °nayati | çokena tam̃ mâ° M °nayati keçena tam̃ mâ° BM °çvasati açruṇi(M °niya) ca pâ°. — 4. M °gṛihitvâ°. — 5. M °roti ‖ atha° B °romi | atha° M °çushyati ca milâyati ca pari° B °shyasi ca pilâ° M °rṇṇarupâto° BM °çyâmi | u ° rṇṇam̃ de°.

7. M °cam̃ âkhâhi kena te upaka ° me kenâ tvam̃° B °me kena tva pa ° yasi ‖ bho ° pâṇiyam̃ ca pra° M °yam̃ ca pra°. — 9. M °pṛicchimâno°. — 10. B °him̃ vanashaṇḍe° M °him̃ vanakham̃ḍe pra ° ti ‖ jîrṇṇo vṛi° B °jîrṇṇo vṛi° M °vayâ cakshuḥvihîno du° B °pto smim̃ nâbhi° M °mi ‖ mâtu pûrvam̃° BM °adatvâ bho°.

13¹. M evam̃ me samâdânam̃ mama mara ° haivam̃ bha°. — 13². BM adatvâ mâ° M °pânam̃ vâ ‖ . — 14. M °satkṛipo° B °kṛipâ ca pa° BM °tto ca ta°. — 15¹. M °bhûshiḥ ‖ B °shi â°. — 15². M °yâvat pâtṛijño ca sârmi° BM °ko ca âyâne° M °yo ca asya adya° BM °praticca° M °pâniyam epi pibentasya mâ° BM °kena e°.

17. M eshashyesha ma° BM °shyeshu caite°. — 18. B neta° M na eta° BM °imâm evarûpâ° M °ṇasatvâḥ vi°. — 19. BM °m âbansuḥ ‖ . — 20. M mum̃cati hastipotam̃ râcchatu vanakham̃ḍa yato smâbhir ânito mâtavako mâtare sagapâcchatu mâm iha° BM °shyati | ta° B °rthako a° M °rthakam adharmeṇa samujyema ‖ .

समागच्छतु मा इह अनाहारो मरिष्यति ततो वयं निरर्थका अधर्मेण संयुज्येम ॥ सो दानि राजाणत्तीये तस्सैव वनखण्डस्स समीपे नेत्वा मुक्को ॥

सो दानि तं वनखण्डं गत्वा नैवाहारं करोति न पानीयं पिबति तां मातरं मार्गति ॥ तस्स दानि सा माता शोकेन रुद्यमाना च तं पुत्रकं अपश्यन्ती अन्धीभूता ॥ सो दानि गजपोतको तां मातरं अलभन्तो पर्वतशिखरमभिरुहित्वा कुंजररावं मुंचति । तस्स महान्तं कुंजररावं मुंचतो ताये मातरे तं स्वरं प्रत्यभिज्ञातं पुत्रस्स मे एषो स्वरो ति ताये पि महानिनादं मुक्तं ॥ ततः तेन मातुस्वरो प्रत्यभिज्ञातो ॥ सो दानि तस्सा मातु मूले उपसंक्रमे ॥ तस्स सा माता उदकह्रदस्स मूले आसति अन्धा परिभ्रमन्ती पुत्रशब्दं श्रुत्वा रेणुगुण्ठितशरीरा ॥ सो दानि गजपोतको ततः ततो वनलतां सुकुमारां भंजित्वा तां मातरं परिमार्जेति रेणुं चास्या शरीरातो अपनेति । ततः च उदकह्रदातो शुण्डं उदकस्स पूरेत्वा हृष्टो तुष्टो आत्तमनो प्रीतिसौमनस्सजातो तां मातां स्नापेति ॥ सा दानि स्नाता च तानि च अक्षीणि धौतानि सर्वमलं अचितं अशुच्यपगतं विमला चास्या परिशुद्धा दृष्टी संवृत्ता ॥ सा दानि हस्तिनिका तं पुत्रकं पश्यित्वा प्रीतिसौमनस्सजाता पृच्छति । पुत्र कहिं सि गतो मम मेक्षित्वा अनाथाये दुर्बलचक्षुयेति ॥ सो तस्सा माताये तां प्रकृतिं विस्तरेण आचिक्षति यथा गृहीतो यथा च ओसृष्टो ॥ सा तं पुत्रकं आह ॥ एवं पुत्र आनन्दतु काशिराजा सपरिवारो यथा अद्य तव दृष्ट्वा अहं नन्दामि ॥

स्यात्खलु भिक्षवः युष्माकमेवमस्यादन्यः स तेन कालेन तेन समयेन काशिराजा अभूषि । न खल्वेतदेवं द्रष्टव्यं । तत्कस्य हेतोः । एषो नन्दो मम

2. M °râjâ âṇa° B °nashaṇḍesya° M °nakhamḍesya samîpe nîtvâ°. — 3. BM °bati tam̃ mâta° B °ram̃ mâgati | . — 4. M °nâ cam̃ tam̃ pu ° paçyam̃ti a°. — 5. M °ni râjapotako mâtaram̃° B °kuñjaravârâm̃ mum̃cati ta°.

6. BM °mum̃cato tasya tâye mâ° M °ro ti | tâme pi° B °ninâda mu°. — 8¹. BM °tasya mâ°. — 8². M °mâtâr uda° B °bhramanti pu° M °bhramati pu°. — 9. M °ni râjapotako tato tataḥ shalanatâm̃ sukumâlâm̃ bham̃° BM °tvâ tam̃ mâta° M °ṇum̃ câtra ça° B °câsya ça°.

11. M tataḥ udakahra° B °sya pure° M °âtamo prî° B °jâto tân mâtâm̃°. — 12. BM °akshi(M °kshi)ṇi dhotâni sarvam alam̃(M °m ahâm̃) akshî | mucya ° câsya pa° M °dṛishṭi sam̃vṛittâḥ. — 14. M °hasinikâ ° jâto tâm̃ mâtâm̃ pri°. — 15¹. M °kathaṁ vihato° B °him̃ sim̃hato ti mama me° M °durbale ca°. — 15². BM °tasya mâtâye tam̃ pra ° kshati | yathâ gri° M °oshûshṭo ‖ .

16. B so tam̃° M so tâm̃ putrakam âhansuḥ ‖ . — 17. M °tra nanda°. — 19. M °kshavo yu ° d anyo sa tena kâle° BM °shi na°. — 20¹. M °drashṭuṁ ta°. — 20³. B °ndo mama putriyapu° M °pitṛiyatro bhâtâ°.

पितृयपुत्रो भ्राता सो काशिराजा अभूषि ॥ यो गजपोतको अहमेव त[301a]-दा अभूषि ॥ या गजपोतस्य माता अभूषि एषा सा महाप्रजापती गौतमी तदापि मम शोकेनान्धा संजाता मम एवागम्य अनन्धा संजाता । एतरहिं पि एषा महाप्रजापती गौतमी मम शोकेनान्धा संजाता मम येव चागम्य अनन्धा संजाता ॥

समाप्तं हस्तिनिकाजातकस्य परिकल्पं ॥

नीवरणं विजहित्वा शृणोथ एकाग्रमानसा सर्वे ।
यथ बोधिसत्वचर्या सुदुष्करा हर्षणीया च ॥
तिर्यग्योनिगतस्यापि गजस्य स्वमातरे सौहृद्मासि ।
किं पुनः मनुष्यभूतो गुरुं परिचरेय तं विप्रं ॥
कामं पि बोधिसत्वा सर्वजगति वत्सला प्रकृतिस्निग्धा ।
अतिवत्सला तु गुरुषु यथा श्रुतं कीर्तयिष्यामि ॥
हिमवन्तपादपार्श्वे चण्डोग्रे चण्डपर्वते रम्ये ।
तापसकुलआश्रमेहि क्वचित्क्वचि कृताभ्यलंकारे ॥
किन्नरकुंजरवानरवराहशार्दूलव्याघ्रगणचीर्णे ।
रुरुमहिषसरभचरिते वृषभचमरिशम्बराकीर्णे ॥
मोरशुकजीवजीवकचकोरकरविंकशकुनमिथुनेहि ।
समन्तं हि तं वनवरं शोभति मधुरं रवन्तेहि ॥

2. BM yo gaja° B °shi esho sâ ° prajâpati tadâ° B °samjâto ma° M °ma eshâga ° jâtâḥ | . — 3. M °pi eyâ mahâ° B °çoke andhâ samjâtâ tâm̃ mama ye° M °kena am̃dhâ samjâtâ mamaiva câ ° jâtâḥ. — 5. M iti çrimahâvastuavadâne ha° BM °jâtasya° M °lpaṁ samâptaṁ ‖ .

6. M atha ni° B °gramanasâ° BM °rve ya°. — 7. BM yathâ bo ° tvacaryâm̃ dushkarâm̃ ha°. — 8. M nirya° B tiyagyo ° sya mâtrâ sau° M °sya mâtâ sau° BM °hṛidam̃ âsi | . — 9. M °punar manu° BM °guru pa° M °care tam̃° B °care tam̃ citram̃ | . — 10. M °dhisatvaḥ sarva ° tsarâ pra° BM °gdhâ a°.

11. B °tsarâ tu khu | yathâ guruçru° M °lâ gurushu | yathâ guruçru° BM °shyâmi hi°. — 12. M hibhava° BM °rçve ca caṇḍore caṇḍa° B °ramyo tâ°. — 13. B °kulâçra° M °kulâ anehi kva° B °t kvacit kṛityalam̃kâram̃ | M °t kvacit kṛitâtyalam̃kâlam̃ | . — 14. BM kinnaram̃ kum̃° M °jaram̃ vâ° BM °naram̃ va° M °rdûlam̃ vyâ ° cîṛṇṇam̃ B °cirṇṇa ruru°. — 15. M urumahi° BM °sarabhacaritam̃ vṛishabhacamarirurṇṇa(M °rṇa)kâkîrṇṇam̃ | (M °rṇṇam̃).

16. BM °çukajîvam̃jîvakacakorakaravîraça° M °kunam̃ mi° BM °hi sa°. — 17. BM samantehi tam̃° M °dhuram̃ ramante dvi ço° B °ntehi ço°.

शोभन्ति च क्वचिक्वचित्पद्मसरा राजहंसपरिपूर्णा ।
कलहंसलीलगलिता गजयूथविलोलिताश्च परे ॥
क्वचिद्भ्रमरमधुकरिभिः चूर्णितकुसुमेहि पादपसमीपं ।
कृतसंस्तरा विचित्रा हरिणशकुनलीलिता स्थान्ति ॥
क्वचिदुग्रतापसेहि ध्यानरतिरतेहि निर्झरगतेहि ।
संशोभते वनवरं स्वाध्यायरतेहि च परेहि ॥
क्वचि दृष्टकुमारेहि दीर्घजटाऽजिनवल्कलधरेहि ।
संशोभते वनवरं विचित्रफलमूलहस्तेहि ॥
तस्मिं प्रवणे भिरामे परिहरति जनेत्रीं नेचप्रहीणां ।
जीर्णा दुर्बलगात्रां गजोत्तमो सर्वभावेन ॥
सो गजगणेन सार्धं रमन्तो अपनिर्गतो महद्दूरं ।
राजा च सह बलेन गजग्रहणकारणं प्राप्तो ॥
दृष्ट्वान तं गजवरं राज्ञः सूतो पि हर्षितो अवचि ।
गजवरो लक्षणुपेतो गजोत्तमो पार्थिव यूथे ॥
गजगणगतं गजेन्द्रं तं दृष्ट्वा वाहनं उदारं तं ।
संगृह्णि काशिराजा वनात्पुरवरं निबन्धित्वा ॥
सो नैव पिबति पानं न च भुंजति श्वसति च सो भीक्ष्णं ।
तं अवच मधुरगिरया स हस्तिरत्नं पृथिवीपालो ॥
नागवर मा कृशो भव प्रतीच्छ भक्तं पिबाहि पानीयं ।
अभिरामयिष्यामि इध पुरोत्तमे मा खु शोचिष्ठाः ॥

1. BM °bhanti | kvacit kvacit padmasa(M °dmama)rarâja° M °pûrṇṇaḥ B °pûrṇṇo ka°. — 2. M karahañ âsalilagaritâ gaja° B °salila ° thanilolitâç câpare | M °lolitaç câpare | . — 3. B °dhukaribhiḥ ° pâdasamipañ kṛi°. — 4. B kṛitañ sastarâ° M kṛitañ mastarâ° BM °citrahari ° kuna(M °ṇa)lilitâ sthâti(M °sthâni) | . — 5. BM kvacid vṛiddhatâ-(M °ddhasta)pa ° gatehi sañ°.

6. BM °yarate(M °rase)hi parehi kva°. — 7. BM °cid dṛishṭa ° dharehi sañ°. — 9. BM °vaṇâbhi ° traparihiṇâñ | . — 10. M jîrṇṇo durbalâñ gâ ° ttamañ sa°.

11. M °sârddha ra° BM °nto upa° BM °rañ râ°. — 12. M °jaganena kâ° B °graheṇa kâ°. — 13. BM °râjasuto harshi°. — 14. M gajavara la° BM °kshaṇopa° M °jotamañ pâ ° yûtho B °yûtho | . — 15. M °tañ gajandrañ° BM °vâhanam udâraṁ tañ gṛi°.

16. BM gṛihni kâ° B ° vanât | puravare ni° M °vanât | punarvare ni° BM °tvâ so°. — 17. M °naivañ pi° BM °prâniyañ na ca bhuñjati(M °ti |) tanati hi çva°. — 18. BM tam avaca madhurasiragi(M °sivani)rayâ ° thivipâlâ(M °pâro). — 19. B nâmava ° pâṇiyañ a°. — 20. B °me | mâ ku socisthâ ga° M °çocitvâ ‖ .

गजोत्तमो आ[301b]ह ॥

न खु शोचामि नरपते बन्धनमुपरोधनं क्षुधपिपासां ।
इतो च मे दुःखतरं नरेश्वर तेन शोचामि ॥

राजा आह ॥

किन्तव इतो गजवर दुःखतरं दुःखतरं पुनरन्यं । 5
येन ते न प्रतिभाति पानीयमशनं च आख्याहि ॥

गजपोतको आह ॥

माता मम गतवया जीर्णा अतिवत्सला नयनहीना ।
सा मया विना मरिष्यति नरेश्वर तेन शोचामि ॥
तस्माहं बिसमृणालं पूर्वं उपानयामि अनयनाये । 10
भुंजामि पश्चात्मना साद्य अनसना ति शोचामि ॥
ग्रीष्मे परिदग्धगात्रा शीतलवनच्छादितोदकं चैवं ।
उपनामेमि खपेमि च साद्य अनाथा ति शोचामि ॥
संप्रति वने अनयना परिश्रमति रेणुगुण्ठितशरीरा ।
हा पुत्रेति च वदति तद्य दुःखतरमासाद्य ॥ 15
श्रुत्वा गजेन्द्रवचनं मनुजेन्द्रो सुमधुरं सुकरुणं च ।
अश्रुपरिपूर्णवदनो नरवरो वारणमध्यभाषित ॥
एकत्वेषु मनुष्येषु सुदुल्लभा एदृशा गुणा सम्यक् ।
येन तव इमा गजवर हृदयस्मिं जायते पीडा ॥
मुंचथ लघु गजवरं चरतु वने गुरुजनं परिचरन्तो । 20

2. BM °kshudhâñ pipâsâñ(M °sân) i°. — 3. BM idañ ca° B °tena çvacâmi ‖ M °tena carâmi ‖ . — 5. M kiñ tuvo i° B kin tuvañ ite ga° BM °vara duḥ ° khataro punar a(B °naḥ a)nyañ ye°.

6. BM °niyañ a(M °â)sanañ°. — 7. M °pottako°. — 9. M so maye vi° B çâsaye tinâ mari° M °ra teñna çe°. — 10. BM °haṁ biçamṛi ° pûrvam upetâmi ânayanâye-(M °nâya) bhuñ°.

12. BM °cchâyodakañ cai°. — 13. BM °memi snâpe° M °mi va sâ° B °câmi sañ°. — 15. M °pupreti vadati ca vadati° BM °d adya naravara duḥ° M °khata-râm â°.

17. BM °pûrṇṇañ vadano naravâraṇa adhya° M °shito ‖ . — 18. BM ekeshvama° M °dṛiçi gu° BM °ṇâ | (M °ṇâ) saṁmyak yena°. — 19. BM °ime ga ° dayasya janenti (M °netri) piḍâñ | .

भवतु जननी आश्वस्ता नंदतु सह पुत्ररत्नेन ॥
सा गजवरस्य माता दुःखार्दितशोकशल्यसंशीर्णा ।
गगणमिव कालमेघो नादयति वनं परिचरन्ती ॥
भवतु जननी सवत्सा नन्दन्तु वनमृगा च वनदेवता ।
आख्याते नन्दतु मे अनयना माता रतनकेन ॥
दृष्टं लुब्धेहि दन्तहेतोः व्याघ्रेहि रुधिरमान्सार्थं ।
नीतं व राजधानिं गजोत्तमं काशिमाविचे ॥
वनदेवता भणन्ति गजोत्तमो प्रवरलक्षणसमंगी ।
तं गृह्णे काशिराजा वनात्पुरवरं निबन्धित्वा ॥
तं खु मरणं भविष्यति मह्यं अनाथाये नष्टनयनाये ।
सो पि च गजो मरिष्यति सुवत्सलो मह्यं शोकेन ॥
यो विचरे गिरिवरेषु वनेषु प्रवरेषु फुल्लशिखरेषु ।
स खु मरिष्यति नागो मम चोपवनं च शोचन्तो ॥
अथ तव न जातु गजवर जनेत्री त्वयि रोषिता न परिभ्रष्टा ।
प्रेम्नेन अनुचरित्य तथ तुह्य विमोचणं भवतु ॥
अथ त्वय न जातु वीर अदत्त तव जननिये प्रथमभक्तं ।
फलमूलभोजनं वा तथ तुह्य विमोचणं भवतु ॥
अथ गजवरो त्वरितो मातरमुपगम्य आलपति स्निग्धं ।
सुकुमारल[302ᵃ]ताये च परिमार्जति रेणुपरिशुद्धां ॥

1. B °ni savastâ° M °ni sarvatâmrandatu sa°. — 2. B °javalasya° M °rditâ ço° BM °lyaçariro | . — 3. B °ti vanaṁ civamânî paricaranto | M °ti vanam ivâ mânî paricaranto. — 4. BM °ni vatsâ nandantu(M °ndaṁ bhu)vanaçakunakâ vanagajâ mṛi° M °devatâ ca ‖ B °devatâ ca â°. — 5. BM âkhyâtuṁ na° B °anayenâ° BM °ratnakena dṛi°.

6. BM dṛishṭaṁ(M °shṭaṁ |) lu ° ntakâraṇahetoḥ(B °toḥ |) vyâ° B °dhiramâtmârtha vi° M °nsârtha. — 7. BM vitaṁ(M °tiṁ) ca râjadhâni ga ° maṁ(M °maṁ ‖) kâçi âvi(B °ci)kshe va°. — 8. M °bharaṁti ‖ ga° B °nti | gajottamaṁ pra° M °samanvagi B °gi taṁ°. — 9. BM °gṛihya kâçirâjâ vanavare(M °nacale) ni°. — 10. M taṁ shu mara°.

11. B °shyati | su° BM °tsalo mama çokena putraçokena(M °traçokena |) yo°. — 12. B °vicara virivareshu vaheshu pravaneshu phûllaçikhaleshu na° M °rivareshu vahaseshu pravaneshu phullaçishareshu. — 13. BM na khu° B °ti | nâ° BM °go mama copa° M °naṁ çopavanaṁ ço°. — 14. BM atha tvayi na jâ° B °ra gajane° M °ra janane° BM °shṭâ pre°. — 15. BM °ritthe(M °rishṭaḥ) | tatha ° bhavatum atha°.

16. BM °tvayâ na jâ ° adatva mama(M °mamaṁ) jananiye(M °ye |) pra° B °ktaṁ pha°. — 17. M °vâ tathâ guhya° B °vâ te tha tu°. — 18. B °ro svarato mâ ° âlashati | snigdhaṁ su° M °âlavati°. — 19. BM °ye ca pramârja ° çuddhaṁ | .

बद्धो स्मि काशिराज्ञा पुरोत्तमे दारुणेहि पाशेहि ।
तव तु कृतेन अनयना मुक्तो पुन धर्मराजेन ॥
सा गजवरस्य घोषं श्रुत्वा स्पर्शं च तस्य उपलभ्य ।
प्रीतमनसा उदग्रा पुनः सनयना गजं लब्ध्वा ॥

हस्तिनिका आह ॥

एवं नन्दतु नन्दन्तो काशिराजा सबान्धवो ।
यथाहं अद्य नन्दामि पुत्रेण नयनेहि च ॥
एतं पुत्रं यथा पूर्वं शैलवने मृगान्विते ।
सपुत्रा अद्य नेत्रेहि पश्यति वरकुंजरं ॥
पूर्वजातिमभिज्ञाय संबुद्धो वदतां वरो ।
जातकमिदमाख्यासि शास्ता भिक्षुगणमन्तिके ॥
अहं गजवरो आसि माता सा आसि हस्तिनी ।
तेनाद्याप्यस्या पुत्रो हं गाढस्नेहा च गौतमी ॥
एवं दीर्घस्मिं संसारे स्नेहद्वेषेण दुःखिता ।
स्नेहद्वेषप्रहाणार्थं धर्मं चरथ निर्ममा ॥

हस्तिनीजातकं समाप्तं ॥

त्रिभिः प्रातिहार्यैर्बुद्धा भगवन्तो सत्त्वां विनयन्ति । तद्यथा ऋद्धिप्रातिहार्येण अनुशासनीप्रातिहार्येण धर्मदेशनाप्रातिहार्येण ॥ भगवता इमेहि त्रिहि प्रातिहार्येहि

1. BM baddho smiṁ kâçirâjño(M °jâ) pu° M °ttame kâçirâjâ dâ°. — 2. BM °anayena mukto punaḥ dharma°. — 3. BM °bhya pri°. — 4. BM °tamanâ u° B °labdhâ ‖ . — 5. M °stinikâ°.

6. BM °tu nando(M °ndâ)to kâ° B °jâ subâ°. — 7. M °ndâsi pu°. — 8. BM ete putra yathâ(B °tha)pû° BM °çailâva° B °mṛigagandhâ su° M °mṛigondhakâ ‖ . — 9. B suputrâdya ° hi yasyasi varaṁ kuṁ° M °hi yasyâsi va° B °jaraṁ pû°. — 10. M pûrvaṁ jâ ° jñâye sambuddho varatâm varaṁ ‖ .

12. BM °varâ âsi mâ°. — 13. B °dyâpi putravagâ° M °dyâpi putra evâpi gâ° BM °snehe ca gauttamî | . — 14. BM °sâre saṁsaranto na prâṇinâṁ(B °nâṁ |) sne° B °haduḥkhena dveshena sne° M °sheṇa atiduḥ°. — 15. M °shaprâhâ° BM °rmamâ(B °mâ ‖) nimîlaçaile ṛishisaṁghasevito na(M °vite ni)rvânti dhîrâ vatibhûtashaṇḍe gharo(M °ṇḍe ye ca ghano)ttamaṁ cchindiya maṇḍa(M °maṁḍa)lâçayaṁ ‖ .

16. M iti çrimahâvastuavadâne hastiyâ°. — 17¹. M atha tribhir prâti° B °hârye buddhâ° M °vantaṁ sa ° nayati ‖ . — 17². B °dharma ° ryeṇa bha°. — 18. BM °gavato i° M °mehi trihi prâti° B °hûni ca prâ°.

न्यग्रोधारामे बह्वनि प्राणिसहस्राणि आर्ये धर्मे विनीता ॥ अथ खलु राज्ञश्चासुरेन्द्रो वेमचित्री च असुरेन्द्रो मुचिलिन्दो च असुरेन्द्रो षष्टीहि असुरनयुतेहि सार्धं प्रभूतं गन्धमाल्यमादाय बह्वनि असुरसहस्राणि च बह्वनि च असुरकन्यासहस्राणि सर्वालंकारभूषितानि आमुक्तमणिकुण्डलानि महता असुरानुभावेन महता असुरऋद्धीये येन कपिलवस्तुन्यग्रोधारामस्येनोपसंक्रमित्वा न्यग्रोधारामस्य उपरि वैहायसमन्तरीक्षे स्थित्वा भगवतो पूजासत्कारमकरेन्सुः । सर्वगन्धेहि सर्वमाल्येहि सर्वनृत्येहि सर्वगीतेहि सर्ववादितेहि सर्वतूर्यताडावचरेहि भगवन्तं सत्कृत्वा गुरुकृत्वा मानयित्वा पूजयित्वा अपचयित्वा अनुत्तराये सम्यक्संबोधये चित्तमुत्पादेन्सुः । अहो पुनर्वयं पि भवेम अनागते अध्वाने तथागता अर्हन्तः सम्यक्संबुद्धा विद्याचरणसंपन्नाः सुगता लोकविदनुत्तरा पुरुषदम्यसारथयः शास्तारो देवमनुष्याणां यथायं भगवानेतर्हि एवं द्वात्रिंशतीहि महा[302b]पुरुषलक्षणेहि समन्वागता भवेम अशीतिहि अनुव्यंजनेहि उपशोभितशरीरा अष्टादशहि आवेणिकेहि बुद्धधर्मेहि समन्वागता दशहि तथागतबलेहि बलवां चतुर्हि वैशारद्येहि विशारदा यथा भगवां एतरहिं एवञ्च अनुत्तरं धर्मचक्रं प्रवर्तेम यथापि भगवता एतरहि । एवं च मो देवमनुष्या श्रोतव्यं अज्ञातव्यं मन्येन्सुः यथा व भगवतो एतरहि एवं च समग्रं आवकसंघं परिहरेम यथा भगवां एतरहिं । एवं तीर्णा तारयेम मुक्ता मोचेम आश्वस्ता आश्वासेम परिनिर्वृता परिनिर्वापेम । एवमेतं भवेय बहुजनहिताय बहुजनसुखाय लोकानुकम्पाय महतो जनकायस्य अर्थाय हिताय सुखाय देवानां च मनुष्याणां च ॥ अथ खलु भगवान्तेषामसुराणामिदमेवंरूपं चेतोप्रणिधानं

1. M °hulaççâ ° trî vâsurendraḥ mucilinda vâsureñdro sha° BM °dâya bahûni asurâya ca(M °râṇi) bahûni ca asuraka(B °kañ)nyâ° B °lañkâlabhû° BM °ddhîye na kapilavastu-(M °staṁ) nyagrodhârâmas te(M °maṁ te)no° M °hâyasavanta ° retsuḥ B °retsuḥ | .

6. M °ttaroyo sa° B °ttarâye saṁmya° BM °detsuḥ | . — 9. BM °yaṁ pi bhaveya anâgate(M °tam) a° M °dhvânaṁ tathâgatâm arhantas samyaksaṁbuddho vidyâ° BM °nnâḥ (M °nno) sugato lo° M °ttaraḥ purushada ° çâstâ devânâṁ ca manushyâ° BM °ṇehi samanvâgatâ(M °to) bhavema | açi° M °riro ashṭâdaçehi â° BM °dyehi viçârado yathâ (M °thâyaṁ) bhagavâṁ° M °ñ ca samagraṁ anuttaradha ° rtteyaṁ ‖ ya° B °rtteyaṁ ya° M °vato etarahiṁ.

14. BM evaṁ ca so de° BM °çrotavyaṁ (B °vyaṁ çraddhâtavyaṁ) manyatsuḥ(B °tsuḥ |) yathâ ca bhagavato etarahi e(M °tarhim e)vaṁ ca so(M °sa) devamanushyâ çrotavyaṁ çraddhâtavyaṁ manyatsu(M °nyetsuḥ |) yathâ(B °thâ ca) bhagavataḥ e(M °tor e)tarahiṁ evaṁ ca ti° B °gavaṁ etarahiṁ evaṁ°.

16. BM °tiṛṇṇo(M °ṛṇo) tâ ° mukto mocema âçvâsto âçvase(B °sa)ma parinirvṛitaḥ (M °to) parinirvâpeyam(M °rvâpadyaṁ) e°. — 17. BM evam etaṁ bhaveyaṁ bahujanahi° M °shyâṇâṁ ‖ . — 19. M °vaṁrupaṁ udâraṁ ca praṇi° BM °smintaṁ prâdushka °

विदित्वा तस्मायै वेलायै स्मितं प्रादुष्करे समनन्तरं प्रादुष्कृते च भगवतो मुखद्वारातो नानावर्णा अनेकवर्णा अर्चिषो निश्चरित्वा नीलपीतमाञ्जिष्ठा रक्तश्वेतावदाता कनकवर्णा सर्वं बुद्धक्षेत्रं अवभासयित्वा यावदकनिष्ठा देवनिकाया भगवन्तं त्रिक्खुत्तं प्रदक्षिणीकृत्वा भगवतो पुरतो अंतरहिताः ॥

अथ खल्वायुष्मानश्वकी येन भगवांस्तेनोपसंक्रमित्वा तेनांजलिं प्रणामयित्वा भगवन्तमेतदुवाच ॥ नाहेतुकं नाप्रत्ययं तथागता अर्हन्तः सम्यक्संबुद्धाः स्मितं प्रादुष्करोन्ति । को भगवं हेतुः कः प्रत्ययो स्मितस्य प्रादुष्करणाय ॥ अथ भगवानायुष्मता अश्वकिना पृष्टो तं [असुरा यावदकनिष्ठा देवनिकाया भगवन्तं त्रिक्खुत्तं प्रदक्षिणीकृत्वा भगवतो पुरतः अंतरहिता] असुराणां चेतोप्रणिधानं गाथाभि व्याकर्षि ॥

तत्रमकासि स्मितं द्विपदेन्द्रो
दानवचित्त विदित्वमुदारं ।
पृच्छति अश्वकि प्रांजलिं कृत्वा
दृष्ट्व स्मितं सुगतस्य मुखातो ॥
नेह अहेतुक लोकप्रदीपो
प्रादुकरोति स्मितं परमर्षि ।
ब्रूहि नरोत्तम हेतु स्मितस्य
यत्ते कृतं इह लोकहितेषी ॥
अद्य निःसंशयं बोधिरुदारा
केनचि संजनिता परिषायां ।
यस्य तथागत आशय ज्ञा[303a]त्वा
प्रादुकरोति स्मितं रमणीयं ॥

ntara(M °re) prâdurkṛito(M °shkṛitâṁ) yaṁ bhagavato mu° M °rci niçca° B °ñjishṭâ rakta° M °ñjishṭaraktaçvetavadâ ° sarvabu° BM °traṁ âbhâsaṁ obhâ° B °d akanishṭâ de° BM °kâyena bhagavantaṁ trittaṁ(M °ntaṁ trishkṛityaṁ) pra° M °purato antarhitâ ‖ .

5. B °çvaki ye°.

6. B °ntaḥ saṁmya° BM °prâduḥkaro(M °roṁ)ti | . — 7¹. M °gavan hetuḥ° B °yo smiṁta°. — 7². BM °taṁ asurâ akanishṭhâ(B °shṭâ) de° B °ntaṁ trikshu° M °trishkṛityaṁ pra ° purato aṁtarhitvâ a° B °hitvâ a° M °gâthâṁ vyâkârshit | .

11. BM tatram ahâkâsi smitaṁ dvijendro(M °dvipeñdro) tâna° M °citte viditvâṁ u° BM °raṁ pṛi°. — 13. BM °ti | a° B °dṛishṭasmiṁ su° M °dṛishṭe smi°. — 15. BM °prâdushkaroti | smṛi(M °ti smṛi)tiṁ paramaṛishi brû(B °kru)°.

17. B kruhi ° kṛitosmi valo° M °kṛitâsmi sarvalokahiteshi ‖ . — 19. B °çaya bo° BM °dhim udâraṁ(M °ra) kena citta saṁjanito parishâyaṁ ‖ .

21. B °gatasya âça° BM °prâdushkaro°.

संशयितो पि अयं इह अद्य
दृष्ट्व क्षितं सुगतस्य मुखातो ।
ब्रूहि नरोत्तम मा चिरमत्रु
छिन्द्हि संशयितान विलेखं ॥
यं अकरि क्षित लोकप्रदीपो
दानवपूजं विदित्वमुदारां ।
व्याकरणं भण आसुरकायं
यं व श्रुणित्व भवेय उदग्रो ॥

भगवानाह ॥

साधु ते अश्वकि पृच्छिता प्रश्ना
यस्य कृते क्षितं लोकहितस्य ।
तस्य ते वक्ष्यं फलं निखिलेन
एकमनो भणतो मे श्रुणेहि ॥
पूजा इह मे कृता असुरेहि
बोधिमनुत्तरं प्रार्थयमाना ।
ते विजहित्व तमासुरकायं
स्वर्गगता रमिष्यन्ति चिरं पि ॥
देवपुरायं चिरं निवसित्वा
पंचहि कामगुणेहि समंगी ।
मानुषलोकमिमं पुनरेत्वा
पूजयिष्यन्ति जिनां द्विपदेन्द्रां ॥
कल्पसहस्रशतानि बह्वनि
कृत्व पुनः पुन पूज जिनेषु ।

1. B çamça° BM °yitâpayâmi(M °mi)ha ° dṛishṭvâ smi ° khâto brû(B °kru)°. — 3. B kruhi° M °ttamaṁ aci° B °ma maccira° BM °m asti cchi°. — 5. BM °pûjâ vi° M °ditvâm u°.

7. BM bhaṇa vyâkaraṇaṁ asu(M °suravyâkaraṇaṁ asu)raganâ yaṁ ca çru° B °ṇitvâ bha° BM °dagrâ ‖ . — 10. BM °te pṛicchati açvaki(M °ki) pṛi ° çnâ yaṁ me kṛita smi ° hitâya(M °ya ‖) ya°.

12. BM yasya° M °bhagato° B °ṇehi pû°. — 14. B °ha vyâkṛitâ | a° M °ha vyâkṛito a° B °dhim uttamaṁ prâ° M °mânâḥ te°.

16. M °surakoyaṁ°. — 18. B °ṇehi sâmaṁgi mâ° M °samanvagi mâ°.

22. M °tva punar punaḥ pûjati ji° B °naḥ punar pûja ji°.

कांचनसंनिभलक्षणधारी
सर्वे जिना भविष्यन्ति जितारी ॥
श्रुत्व च व्याकरणं असुराणां
तुष्ट उदग्रो सदेवकलोको ।
प्राणसहस्रशतानि बह्वनि
प्रस्थित तत्र अनुत्तरयाने ॥

अथ खलु संवरो असुरेन्द्रो तास्मिं वेलाये इमां गाथामध्यभाषि ॥

एदृशेहि मे मित्रेहि सदा भोतु समागमो ।
यं निश्राम्य यमागम्य पूजेम द्विपदोत्तमं ॥

अथ खलु भगवान्तानि षष्टी असुरनयुतानि अनुत्तराये सम्यक्संबोधीये व्याकरित्वा बह्वनि च प्राणिसहस्राणि आर्यधर्मेषु प्रतिष्ठापयित्वा राजानं शुद्धोदनं च सपरिवारं च उद्योजये ॥ अथ खलु राजा शुद्धोदनो सपरिवारो उत्थायासनातो भगवतः पादौ शिरसा वन्दित्वा प्रक्रमे । तथा सर्वो जनकायो ॥

अथ खलु राजा शुद्धोदनो तस्यैव रात्रिये अत्ययेन प्रभूतं खादनीयं भोजनीयं प्रतिजागरित्वा कपिलवस्तुनगरं सिक्तसंमृष्टं कृत्वा अपगतरजं अपगतपाषाणशर्करकठल्लं मुक्तपुष्पावकीर्णं गन्धघटिकाधूपितधूपनं चित्रपरिच्छिन्नं वितानितानं ओसक्तपट्टदामकलापं । यावच्च कपिलवस्तुं यावच्च न्यग्रोधारामं नटनर्तकक्षल्लमल्लपाणिस्वरिकां कुम्भतूणिकशोभिकां द्विस्त्रलवेलम्बकां देशेदेशेषु स्थापयित्वा महता राजानुभावेन महता राजऋद्धीयेन भगवतो नगरं प्रवेशितं करोति ॥ अथ खलु राजा शुद्धोदनो भगवन्तं [303b] सश्रावकसंघं पुरस्कृत्वा राजकुलं प्रवेशेति ॥

1. BM °sarva jinâ° M °târi B °târi çru°. — 3. BM °ṇâṁ uda ° devakulaloke(B °ke |). 5. BM °sthita(M °taḥ) tatrânu° M °rajâne ‖ .

7. M °lu saṁbahulo a° B °lu sambaro a ° verâye i°. — 8. M etâdṛi° B °dṛiço hi me°. — 9. B °niçâya yadâgamasya pû° M °çâmya yad âga°. — 10. M °shasṭhi nayu° B °ttarâye saṁmya° M °srâṇi ca âryya° B °âryedha° M °vâraṁ udyojeya ‖ B °dyojeyaṁ ‖ .

12. B °gavatoḥ pâ° M °gavatâ pâ ° sâ vaṁditvâ°. — 13. BM °kâyo | atha°. — 14. M °syaiva râtriye a ° stumahânaga ° ktasaṁsṛishṭaṁ° B °siktasaṁmishṭaṁ° BM °shâṇaṁ çarkaraka(B °rkkala)ṭhallamukta° M °rṇṇaṁ gaṁdhagha° B °citraṁ parikshiptaṁ vigatavitânaṁ oçaktapaṭṭa° M °ptaṁ vitatavimânaṁ oçaktapatradâ° B °lâpaṁ dhûpaṁ dhûtaṁ muktapushpâvakîrṇṇaṁ | M °kalapaṁ dhûpanadhûpaṁ pushpapushpâvakîrṇaṁ | .

17. B °rttakaṁ ṛi° M °svarakâṁ kuṁbhatûṇikâṁ ço° B °kumbhatuṇḍikaço° BM °dvistavala(M °vara)velaṁcakâṁ ° praveçinaṁ ka°. — 19. BM °ntaṁ çrâva°.

अथ खलु भगवां शुद्धोदनस्य निवेशनं प्रविशित्वा प्रज्ञप्त एवासने निषीदे यथासनो च भिक्षुसंघो ॥ अथ खलु राजा शुद्धोदनो भगवन्तं स्वहस्तं प्रणीतेन प्रभूतेन खादनीयभोजनीयेन सन्तर्पयति संप्रवारेति भिक्षामात्मा च भिक्षुसंघं ॥ अथ खलु भगवां भुक्तावी धौतहस्तो अपनीतपात्रो राजानं शुद्धोदनं धर्म्या कथया संदर्शयित्वा समादापयित्वा समुत्तेजयित्वा उत्थायासनातो प्रक्रमे ॥ अपरं दिवसं महाप्रजापती गौतमी भगवतो सश्रावकसंघस्य भक्तं करोति । अपरं दिवसं यशोधरा भक्तं करोति । अपरं दिवसं अन्तःपुरिका । अपरं दिवसं शाकियमण्डलं भगवतो सश्रावकसंघस्य भक्तं करोति ॥

यशोधराये दानि भगवतो सश्रावकसंघस्य मोदकं सज्जीकृतं सर्वं ज्ञातिवर्गं निमन्त्रितं ॥ भगवां कालज्ञो वेलज्ञो समयज्ञो पुद्गलपरापरज्ञो काल्यस्यैव निवासयित्वा पात्रचीवरमादाय भिक्षुसंघपरिवृतो भिक्षुसंघपुरस्कृतो यशोधराये निवेशनं प्रविशित्वा निषीदे प्रज्ञप्ते एवासने यथासनो च भिक्षुसंघो ॥ अथ खलु यशोधरा राङ्गलमाता महाप्रजापतीगौतमीये सार्धं ज्ञातिवर्गेण च भगवन्तं सश्रावकसंघं प्रणीतेन खादनीयभोजनीयेन सन्तर्पयति संप्रवारयति ॥ तायै दानि यशोधराये राङ्गलस्य हस्ते प्रत्यग्रो प्रणीतो मोदको वर्णगन्धरसोपेतो दिव्नः गच्छ इमं मोदकं पितुर्दैहीति ॥ तेन गच्छित्वा भगवतो पात्रे प्रक्षिपित्वा भगवतो छायायां निषीदित्वा मातरमेतदुवाच ॥ सुखा खल्वम्ब श्रमणस्य इयं छाया ॥ अथ खलु यशोधरा राङ्गलं कुमारमेतदुवाच ॥ याच पुत्र पैतृकं धनं ॥ अथ खलु राङ्गलो कुमारो भगवन्तमेतदुवाच ॥ देहि मे श्रमण पैतृकं धनं ॥ भगवान्नाह ॥ राङ्गल प्रव्रजाहि ततो पैतृकं धनं दास्यामि ॥ अथ खलु राजा सान्तः-

1. M °vâm râjâ çuddho° BM °thâsane ca° M °saṁghe ‖ . — 2. B °gavaṁtaṁ sva° M °khâdanîyena bhojanîyena saṁtarpa° B °rpayanti saṁpracâreti ‖ mi° M °pracârayati mi ° kshussaṁghaṁ ‖ . — 3. M °haste apa° B °danaṁ dhâryakatha° M °danaṁ dharmyâ katha° B °dâyayitvâ samu ° utthâsanâ°. — 5. B °diva mahâ ° gauttami°.

6. M °dharâ divasaṁ ka° B °roti a°. — 7¹. M °rikâḥ. — 7². M °kiyamaṁḍalaṁ. — 9. BM °to çrâva° B °kaṁ sarjjikṛi° M °kaṁ sarjikṛi ° nimaṁtritaṁ | . — 10. BM °velajño samayejño puṁgala(M °gava)parâparajño kâlya(B °la)syai ° thâsane ca(M °va) bhikshusaṁgho(M °ghaḥ) ‖ .

12. B °gauttami° M °gavaṁtaṁ saçrâ° B °khâdaniye bho° M °khâdanîyena bhojanîyena saṁtarpa ° pracârayati | B °rayati tâ°. — 14. BM °hulas tasya° M °ste pratyâgre praṇi ° to diçro gaccha° B °gaccha | imaṁ mokaṁ pi°.

16. M °cchitvâ bhagavato cchâyâ° B °prakshitvâ bha°. — 17. M °çravaṇa°. — 18¹. M °dharâ râhulamâtâ râhu°. — 18². M yâvat putra°. — 19¹. M °çravaṇa° B °çramaṇaṁ pai°. — 20². M °rivâro hṛi° B °abhunsuḥ° M °bhûtsuḥ tu ° hulaputro ° doshaṁ ti ‖ B °doshonti | .

पुरो शाक्या च सपरिवारा हृष्टा अभून्सुः तुष्टा उदग्रा भगवतो राङ्गलो पुत्रो विनये यशोधराये किं दोषो त्ति ॥ यशोधरा दानि सर्वालंकारेहि आत्मानमलंकृत्वा भगवन्तं परिविषति कथं पुनरा[304ᵃ]र्यपुत्रो अगारमध्यावसति न च भगवतो चित्तस्यान्यथाभावो ॥ अथ खलु भगवां भुक्तावी धौतपाणि अपनीतपात्रो राजानं शुद्धोदनं सान्तःपुरं महाप्रजापतीं गौतमीं च यशोधरां च राङ्गलमातरं सपरिवारां धर्म्या कथया संदर्शयित्वा समादापयित्वा समुत्तेजयित्वा संप्रहर्षयित्वा उत्थायासनातो प्रक्रमे ॥

भिक्षू भगवन्तमाहन्सुः ॥ पश्य भगवं यशोधरा मोदकेहि लोभेति ॥ भगवानाह ॥ न भिक्षवो एतरहि एव एषा यशोधरा मम मोदकेहि लोभेति ॥ भिक्षू आहन्सुः ॥ अन्यदापि भगवं ॥ भगवानाह ॥ अन्यदापि भिक्षवो ॥

भूतपूर्वं भिक्षवो अतीतमध्वानं नगरे वाराणसी काशिजनपदे तस्य उत्तरेण अनुहिमवन्ते साहंजनी नाम आश्रमपदं शान्तं विविक्तं विगतजनपदं मनुष्यरहेयं प्रतिसंलयनसारोप्यं मूलोपेतं पत्रोपेतं पुष्पोपेतं पानीयोपेतं ॥ तहिं काश्यपो नाम ऋषिः प्रतिवसति पंचाभिज्ञो चतुर्ध्यानलाभी महर्द्धिको महानुभोगो ॥ तेन ग्रीष्माणां पश्चिमे मासे क्षुद्रपाकानि फलानि भुक्तानि तृषितेन च बहुतरं पानीयं पीतं । तस्य अभिष्यन्दा वातातपा संवृत्ता । तेन उपलकुण्डके सशुक्रं प्रस्रावं कृतं ॥ अपराये मृगीये तृषिताये तं प्रस्रावं पानीयसंज्ञाय पीतं ॥ ऋतुमतीये तायै मृगीये अशुचिभ्रक्षितेन मुखतुण्डेन सशुक्रं योनिमुखं जिह्राय प्रलीढं । तायै संमूर्छयित्वा कुक्षिं प्रतिलब्धं ॥ सो च ऋषि मैत्रीविहारी तस्य मृगपक्षी पि न

2. B °rehi | â° M °tmâna alaṁkṛitvâ bhagavaṁtaṁ parivipati ka° B °na ca bhagavatâ ci° M °ttasyâṁnyathâbhâvaḥ ‖ . — 4. M °vi dhotapâtro apanîtapâni râjâ° B °dhautaputro apanîtapâṇi râjâ° M °danaṁ syântaḥ° BM °prajâpatî gauta(M °tta)mî ca yaço ° dharmâ katha°.

8¹. M atha bhikshu bha° B bhikshu bha°. — 8². M yaçya bhagavan yaço° B °kehi lâbhchi ‖ . — 9¹. M °rahim evam eshâṁ yaço° B °hi evam eshâ ° kehi lâbheti | M °bheti | anyadâpi eshâ mama modakehi lobheti ‖ . — 9². BM bhikshu â°. — 10¹. M °gavan ‖ . — 10³. BM °kshavo bhû°.

11. M °kshavaḥ atîtam adhyânaṁ ° çântaṁ praviviktaṁ° BM °heyaṁkaṁ prati° M °roghaṁ mulopetaṁ phalopetaṁ patropetaṁ pânî° B °mûlâpetaṁ patrâpetaṁ pushpâpetaṁ pânî° BM °yopetaṁ tahiṁ°. — 13. M °shiḥ vasa° B °lâbhi maha° BM °go te°.

16¹. B °abhipannâ vâ° M °abhishaṇâ vâ ° vṛittâḥ B °ttâ te°. — 16². M °ke suçu° B °kraṁ pramrâvaṁ kṛi° BM °taṁ a°. — 17¹. M °taṁ çukraprasrâ° B °taṁ pramrâvaṁ°. — 17². B ṛitugatîye tâni mṛi° M °tiye tâni mṛi ° khatuṁḍikena°. — 18. B °saṁmûcchrâyesvâ ku° M °rchayetvâ°. — 19. M °rî tasya mṛigapakshi pi na santrasyaṁti mṛigapakshiçatâni âçramasya parisamantena caranti pravisanti va so pi mṛigî° BM °traiva(M °vaṁ) pratikramanti ‖ .

सन्तसन्ति मृगपक्षिशतानि आश्रमस्स परिसमन्ते चरन्ति प्रतिवसन्ति च सापि मृगी तस्सेव आश्रमस्स परिसमन्तेन चरति तत्थेव परिक्कमति ॥ सा दानि कालेन समयेन दारकं प्रजायति ॥ तेन ऋषिणा दृष्टा तस्सैतदभूषि । कुतो इमस्सा तिरिच्छानगताये मृगीये मानुषो अपत्यो ति ॥ समन्वाहरित्वा ऋषीणां ज्ञानं प्रवर्तति । सो दानि ऋषि समन्वाहरति । अमुकं कालं मये अधिमात्रं क्षुद्रपाकानि फलानि परिभुक्तानि बऊतरकं च मे पानीयं पीतं ततो मे अभिष्यण्णेहि धातूहि उपलकुण्डके सशुक्रं प्रस्रावं कृतं । एताये मृगीये तृषिताये पानीयसंज्ञाये [3o4b] पीतं ऋतुमतीये ततो च ताये कुक्षिं प्रतिलब्धं । ममैवेषो अंगनिस्रावो ति । तेन दानि गर्भरूपं अजिनकेन गृह्णीय तं आश्रमपदं प्रवेशितो ॥

सा दानि मृगी पृष्ठतो अन्वेति । तेन तस्स गर्भरूपस्स फलकेन नाभि च्छिन्ना तैलेन च अभ्यंगितो सुखोदकेन तं गर्भमलं परिधौतं ॥ सो ऋषि तं गर्भरूपं तस्सा मृगीये स्तने अक्षीपेति सापि मृगी पायेति । ऋषिणापि तस्सा मृगीये स्तनं तस्स दारकस्स मुखे प्रक्षिप्यति ॥ यं कालं सो दारको आसितो भवति ततः सा मृगी तस्स आश्रमस्स परिसमन्तेन चरित्वा पानीयं च पिबित्वा पुनः गर्भरूपं स्तनं पायेति जिह्वाग्रेण नं परिलेहति ॥ यं कालं सो गर्भरूपो पादेहि पि अखितः ततो स्वयन्तस्सा मृगीये स्तनं गृह्णित्वा पिबति ॥ एकचरं शृंगकं जातन्ति तेन ऋषिणा एकशृंगो ति नामं कृतं ॥ सो दानि यथा से माता मृगेहि सार्धमखति तथा सो पि एकशृंगको ऋषिकुमारो अखति मृगेहि च मृगपोतकेहि च सार्धं क्रीडमानो । यतो यतः सा माता मृगगणेहि सार्धं अखति ततः ततो सो पि एकशृंगो ऋषिकु-

2. BM so dâ° B °jâpati te°. — 3^1. BM °dṛishṭvâ ta°. — 3^2. BM kuto imasya tiri° M °sho apatye pi sa°. — 4. M °vartteti ‖ . — 5^1. BM °ti a°. — 5^2. BM °ye adhimâtraṁ° M °pitaṁ | tataḥ me° BM °bhiprasavehi dhâ° M °utparakundake° B °ṇḍalake ° pramrâvaṁ°.

7. B °ṛitumatitatârakâye kukshi pra° M °to ratâye ku°. — 8. M mamevai° BM °niçrâvo ti te°. — 9. M °dâni rû ° ghṛihnîya tam âçra ° çitaḥ. — 10^1. M so dâ° BM °nveti tena°. — 10^2. M °phalakenâbhicchinnât taile° B °khodakona taṁ° BM °dhautaṁ so°.

11. B so rishi taṁ° BM °tasya mṛi° B °lliyeti sâ° M °lliyanti sâpi mṛigî prâpeti ‖ . — 12. BM so pi ṛishi pi tasya mṛi° M °ye staṁnaṁ ° kshishyati. — 13. M yaṁ kâraṁ so ° vati | tato sâ° B °vati | tataḥ° BM °yeti | jihvâyena caraṁ pari° B °hatâ yaṁ°. — 15. M °hi pi aṁṭhito tataḥ sva° BM °n tasya mṛi° M °giye svanaṁ° BM °gṛihnitvâ° B °bati e°.

16. M ekaṁ caraṁ° B ekaṁ varaṁ çriṁgṛikaṁ° BM °jâtan tena° B °go hi nâmaṁ°. — 17. BM° yathâ me mâtâ mṛigehi sârddhaṁm aṇva(M °m aṁṭha)ti | tathâ so pi (M °thâpi so) e° M °kumârah aṇva° B °ḍamo vo yato°. — 19. M mataḥ yato so tâṁ mṛigagaṇehi yataḥ yataḥ sa mâtâ mṛgagaṇehi sârddhaṁ aṇvati | tato tataḥ so ° ekaṁçriṁgako ṛi° B °rddhaṁ aṇvati | tataḥ°.

मारो अखति । मृगपोतकेहि सार्धं क्रीडन्तो अखिय अखिय मृगेहि मृगपोतकेहि च सार्धं पुनस्सं ऋषिस्स आश्रमपदं आगच्छति । ततो नं ऋषि क्षुद्रक्षुद्राणि फलानि वर्णगन्धरसोपेतानि देति ॥ यदा सो ऋषिकुमारो आश्रमपदे शयितो भवति ततो बहू मृगा च मृगपोतका च तमृषिकुमारमनुपरिवारेत्वा शयन्ति ॥ यं वेलं ते मृगा च मृगपोतका च चरितुकामा भवन्ति ततः तमृषिकुमारं शयमानं मुखतुण्डकेन प्रतिबोधयन्ति ॥ एवन्ते मृगा च मृगपोतका च नानाप्रकारा च पक्षी तेन ऋषिकुमारेण सार्धं तत्र आश्रमपदे अभिरमन्ति ॥ यं कालं सो एकशृंगको ऋषिकुमारो विज्ञप्राप्तः संजातो तस्स ऋषिस्स तं आश्रमं सिंचति संमार्जति मूलानि नानाप्रकाराणि आनेति पक्वाणि आनेति उदकं आनेति काष्ठानि आनेति तमृषिं परिमर्दति स्नापेति अग्निहोत्रं प्रतिजागरेति । तमृषिं परिविसति नानाप्रकारा[3o5a]हि मूलविकृतीहि पक्वविकृतीहि पुष्पविकृतीहि फलविकृतीहि पानीयं उपनामेति । प्रथमं तं ऋषिं परिविसित्वा तां च मृगीं मातरं पश्चात्स्वयमाहारं करोति ॥ तेन ऋषिणा तस्स ऋषिकुमारस्स ध्यानानां च अभिज्ञानां च मार्गमुपदिष्टं ॥ तेन दानि ऋषिकुमारेण पूर्वरात्रापररात्रं जागरिकायोगमनुयुक्तेन विहरन्तेन घटन्तेन व्यायमन्तेन चत्वारि ध्यानान्युत्पादितानि पंच चाभिज्ञा साक्षीकृता ॥ सो दानि ऋषिकुमारो चतुर्ध्यानलाभी पंचाभिज्ञो कौमारब्रह्मचारी महर्द्धिको महानुभावो संजातो अभिज्ञातो देवमनुष्याणां ॥

एकशृंगको ऋषिकुमारो अनुहिमवन्ते गंगाये नदीये कूले साहंजनीआश्रमपदे प्रतिवसति । वाराणसीयं च नगरे काशिराज्ञो पुत्रो न भवति ॥ तेन दानि बहू दृष्टिप्रक्रियास्थानानि कृतानि पुत्रार्थाय यथा मे पुत्रो भवेय न चास्स पुत्रो संभवति

1. BM mṛigîpo° M °ḍante | aṇviya mṛige° B °nto aṇviya açviyo mṛige° M °kehi sâ ° çramasya padaṁ°. — 2. M tataḥ taṁ ṛishiṁ kshudra° B °to maṁ ṛi ° lâṇi va° M °ṇagaṁdhara° B °tâni | deti ya°. — 3. BM °bahu mṛigî ca mṛiga° M °parisbâretvâ çayaṁti ‖ . — 5. B °laṁ taṁ mṛigâ° M °gâ ca mṛigâ ca mṛiga° BM °tukâmo bha° M °vanti | tataḥ tam ṛishi ° khatuṁḍake° BM °dhayanti(M °yati) mṛigapakshihi e°.

6. M eva te mṛigâ ° potakâ vaca nânâpra ° pakshi te°. — 7. BM °ro âvijña° B °ṛishi taṁ° M °ṛishi tam âçritaṁ siṁca° B °cati sanmârja° M °rjayati | mû ° prakârâṇi mûlaprakṛitihi âneti patrâṇi âneti kâshṭâni âneti ‖ tam ṛi° B °jâgaroti | . — 10. M taṁ ṛishiṁ° B °rivivasati nânâprakârâṇi mû° M °prakârâṇi mûlaprakṛitîhi pushpa ° niyam upa° B °meti pra°. — 12. M °maṁ tam ṛishiṁ° BM °riviçitvâ ° mṛigî mâta° M °raṁ paçya svayaṁ âhâ°. — 14. B °viharatena gha° M °viharantena vyâ ° tpâdayitâ°.

16. M °câbhijñâ kaumarabra ° ri maharshiko° B °jñâtâ de° BM °shyâṇâṁ e°. — 18. BM °diye kule sâhaṁjana(M °ni)m âçra°. — 19^2. B °hû yashṭhopayâ kritakâni kṛi° M °hû yashṭiupakriyâs te tâni kṛi° B °saṁbhavati | vi° M °stîrṇâ antaḥ° BM °ro ca asti | .

IMPRIMERIE NATIONALE.

विस्तीर्णे अन्तःपुरे धीतरो व अस्ति ॥ तेन दानि काशिराज्ञा श्रुतं । गंगाय कूले साहंजनी नाम आश्रमपदं तत्र काश्यपो नाम ऋषि प्रतिवसति तस्य राजऋषिस्य तत्र आश्रमपदे प्रतिवसन्तस्य मृगीये सकाशातो एकशृंगको नाम ऋषिकुमारो उत्पन्नो ति । यन्नूनाहं नलिनीधीतरां राजकुलकुमारीं एकशृंगस्य ऋषिकुमारस्य ददेयं सो मे पुत्रो भविष्यति जामातिको च ॥ अथ खलु भिक्षवो स काशिराजा ब्राह्मणपुरोहितमाह ॥ तत्र काश्यपो नाम ऋषिः प्रतिवसति । तस्य राजर्षिस्य तत्र आश्रमपदे प्रतिवसन्तस्य मृगीये सकाशातो एकशृंगको नाम ऋषिकुमारो उत्पन्नो ति । यं नूनाहं नलिनीधीतां राजकुमारीं एकशृङ्गस्य ऋषिकुमारस्य ददेयं सो मे पुत्रो भविष्यति जामातिको च ॥

अथ खलु भिक्षवः स काशिराजा ब्राह्मणं पुरोहितं राजाचार्यं आमन्त्रयति । गच्छथ पुरोहित इमां नलिनीं राजकन्यां एकशृंगस्य ऋषिकुमारस्य देथ । सो मे पुत्रो भविष्यति जामातिको च ॥

अथ खलु भिक्षवो ब्राह्मणपुरोहितो राजाचार्यः नलिनीं राजकुमारीं सपरिवारां अश्वरथे आरूढयित्वा प्रभूतं चान्नपानं मोदका[305b]नि च नानाप्रकाराणि खाद्-नीयभोजनीयानि आदाय साहंजनीं आश्रमपदं आगमे ॥ ते च दानि साहंजनीमाश्रमपदं गत्वा आश्रमस्य नातिदूरेणापि समीपे गता ॥ तत्र नलिनी राजकुमारी सखीहि सार्धं क्रीडति हसति तानि च क्रीडमानानि दृष्ट्वा तानि मृगपक्षिगणानि सन्त्रसन्ति दिशोदिशं परिधावन्ति ॥ अथ खलु भिक्षवः एकशृंगस्य ऋषिकुमारस्य एतदभूषि ॥ किं नु खल्विमे द्य मृगपक्षिगणाः सन्त्रसन्ति दिशोदिशं च परिधावन्ति ॥ अथ खलु भिक्षवः एकशृंगो ऋषिकुमारः येन नलिनी राजकन्या तेनागमि ॥ अद्राक्षीच्चिक्षव एकशृंगको ऋषिकुमारो नलिनीं राजकुमारीं सखीहि सार्धं क्रीड-

1¹. BM °tañ gañ°. — 1². M °gâye kule sahañ° BM °ṛishisya | tatra° M °de praticasanta°. — 4. M yañ nûnâ° B °haṁ nalinidhî ° tasya dadyeyañ ° shyati | jâ° M °shyati yâmâ°. — 5. B °brâhmaṇabrâhmaṇapu°.

6². B °çâto | e°. — 8. M yannunâ° B °rasya dadeyañ° M °shyati yâmâ°. — 10. M °kshavo sa kâ°.

11¹. B gaccha ta pu ° mâñ nandalinî râjakanyâ e°. — 13. BM °rohita râ° M °jâcâryyo nali ° tañ cânteyânañ modakâni khâ° B °dâya sohañ° M °haṁjanîm âçra ° dañ âṁgamya B °game te°. — 15. M te ca | tâni sâ° B °ca tâni sohañ° M °gataḥ | B °gatâ ta°.

16. M °ṇâni sañtrasañti diço ° dhâvañti | . — 18. M °rasyaitad a°. — 19. M °ṇâḥ sañtrasañti diço ° dhâvayañti ‖ B °dhâvayanti ‖ . — 20. BM °go rishi° M °mâro ye° B °râjakañnyâ°.

21. M °kshavaḥ e ° lini râjakumârî sa° B °hehi ca vastrehi ca dṛi° M °strehi ca dṛi°.

न्तीं स्वलंकृतां सुभूषितां महारहेहि वस्त्रेहि । दृष्ट्वा च पुनः तस्यैतदभूषि ॥ शोभना खल्विमे ऋषिकुमारा उदाराणि तासां अजिनानि जटानि च अजिनमेखलानि च ॥ निध्यायति राजकन्यानां । सो दानि राजकन्यानां अजिनमेखलानि अतिरिव काये विभासन्तानि पश्यति ॥ सो दानि एकशृंगको नलिनीं पृच्छति ॥ शोभनानि युष्माकं अजिनानि जटानि मेखलानि च कण्ठसूत्राणि च ॥ सा दानि नलिनी राजकुमारी एकशृंगं ऋषिकुमारं हस्ते गृह्य आह ॥ एतानि एदृशानि अस्माकं अजिनानि च मेखलानि च कण्ठसूत्राणि च हस्तसूत्राणि च ॥ सा दानि तस्य ऋषिकुमारस्य मोदकानि पानं च अनुप्रदासि इदमस्माकं हस्ते मोदकं परिभुंजाहीति ॥ तेन दानि तानि मोदकानि परिभुक्तानि पानकं पि च पीतं ॥ तस्य तहिं आश्रमपदे कटुकषायेहि फलफलेहि जिह्वेन्द्रियप्रत्याहतस्य तेहि मोदकेहि परिभुंजमानस्य अतिरिव रसेषु आस्वादो नुगृहीतो ॥ तानि च पानकपिबनानि पीत्वा सो दानि आह ॥ शोभनानि युष्माकमिमानि फलाफलानि पानीयं च अजिनमेखलानि च कण्ठसूत्राणि च हस्तसूत्राणि च उदाराणि न भोजनानि अस्माकं आश्रमे एदृशानि ॥

अथ खलु भिक्षवो नलिनी राजकुमारी एकशृंगं ऋषिकुमारं एतदुवाच ॥ आगच्छ ऋ[306a]षिकुमार इदमस्माकं उटजानि संचारिमानि येन इच्छाम तेन एतानि उटजानि आदाय गच्छाम आगच्छ अस्माकं उटजं प्रविश आश्रमं ते च उपदर्शयिष्यामि ॥ सा दानि नलिनो तत्र यानं अभिरुहित्वा एकशृंगस्य हस्तं प्रणामि आगच्छ प्रविशाहि इदमस्माकं उटजं आश्रमं प्रवेक्ष्याम त्ति ॥ सो दानि तत्र याने अश्वानि आयुक्तानि दृष्ट्वा आह ॥ मम मृगी माता इमं च उटजं मृगा

1¹. M °punar asyai°. — 1². BM °me ṛishiḥ ku ° lâni ca ni°. — 3¹. B °dhyâyanti râ°. — 3². M °bhâ sayañtâni paçyañti ‖ B °çyanti ‖ . — 4¹. M °pîm paçyati ‖ so dâni ekaçriṁgako nalinî pricchati |. — 4². M °yushmâṁkaṁ ajinâni ca mekhalâni ca kaṁthasutrâ°. — 5. B °çriṁgasya ṛi°.

6. M °lâni ca kaṁthasutrâṇi ca ha°. — 7. B °pradâni i° M °pradâni | i° B °hasto mo° BM °bhuṁjati | . — 9¹. BM tena dâni kâçirâjâ paribhuṁjâhi(M °ti)ti | tena dâni tâ ° kaṁ pi vânaṁ ca pi° B °taṁ ta°. — 9². BM °dehi katu° M °lehi dvijihvendriyehi pratyâ ° shu âçvâdânugṛihîtâ ‖ B °svâdânugriddhatâ tâ°.

11. M jñâni ca pâ° BM °pibânâni pitvâ ‖ so°. — 12. M °mâni phalaphalâni pâ ° khalâni ca kaṁthasutrâṇi ca hastasutrâṇi ca u BM °râṇi bhoja° M °smâkam âçra°. — 15. M °vâcat ‖ .

16. B °kaṁ udapâni saṁ° M °kaṁ udupâni sacâri° BM °etâni uda(M °du)pânâni âdâ° kaṁ udayaṁ pra° BM °çramaṁ te(M °me) na upadarçayishyami ‖ . — 18. B °ṇâti â° M °udayam âçra° BM °maṁ pravishyâman ti ‖ . — 20. M mama çriṁmî mâ° BM °ca udayaṁ mṛigâ° M °vahañti nâ°.

वहन्ति नाहं अच प्रविशामि ॥ सा दानि नलिनी एकशृंगस्स ऋषिकुमारस्स हत्थे लग्गति कण्ठे लग्गति आलिंगति चुम्बति प्रलोभेति च ऋषिकुमारो च ताये नलिनीये मूर्धातो उपादाय यावत्पादेषु निमित्तं पश्यति। अन्यादृशा स्वकानि जटानि अन्यादृशानि नलिनीये अन्यादृशं रूपं पश्यति अन्यादृशं नलिनीये अन्यादृशं स्वकं मुंजमेखलं अन्यादृशं नलिनीये अन्यादृशानि स्वकानि हस्तसूत्राणि पश्यति अन्यादृशानि नलिनीये ॥ सा दानि ऋषिकुमारेण सार्धं आलापसमालापं कृत्वा विश्वासं च संभावयित्वा प्रेम्नं च संजनयित्वा यथोक्तं भगवता ॥

पूर्ववासनिवासेन प्रत्युत्पन्नहितेन वा ।
एवन्तं संजायते प्रेम्नं उत्पलं वा यथोदके ॥
यत्र मनं निवसति चित्तं वापि प्रसीदति ।
निष्टां पण्डितो गच्छेया संतुष्टा मे पुरे सह ॥

तेषां संसारे सन्सरन्तानां दीर्घरात्रं जन्मसहस्रकोटीभिः परस्परेषां समागमो आसि भार्यापतिषां तस्मात्तेषां सह दर्शनेन परस्परं प्रेम्नं निपतति ॥ सा दानि नलिनी एकशृंगस्स ऋषिकुमारस्स प्रलोभनाभिप्राया राजार्हाणि मोदकानि खादनीयभोजनीयानि च परिभुंजापेत्वा प्रणीतानि च पानकानि पायेत्वा आलम्बित्वा च चुंबयित्वा च कण्ठसमालग्नतो च कृत्वा अश्वयानं अभिरुहित्वा वाराणसीं प्रत्यागता ॥ एतां प्रकृतिं विस्तरेणारोचयति ॥ एकशृंगको ऋषिकुमारो पि आश्रमं गत्वा तां नलिनीं राजधीतां मूर्ध्नातो समुपादाय यावत्पादेषु रंजनीयानि निमित्तानि मनसिकरोन्तो आसति नेव मूलफलानि आनेति न उदकं न काष्ठानि न आश्रमपदं संमार्जति अग्निहोत्रं पटिजागरेति ॥

1. M °nṭhe lagneti â ° to udupâdâya° B °çyati a°. — 3. BM °jaṭâni anyâdṛiçâni nalinîye anyâdṛiçâni rû° M °pañ paçyati anyâdṛiçañ naliniye anyâdṛiçâni rupañ paçyati anyâdṛiçañ svakañ muñjamesharañ anyâdṛiçâni svakâni hastasutrâni paçyati ‖ anyâdṛiçâni naliniye ‖ B °sûtrâni pa°.

6. M sa dâni tena ṛishiṇâ ku° BM °âlâpañ samâ° B °pañ vitvâ° BM °viçvastañ ca sañbhâ°. — 8. M °tpannehi°. — 9. M °tparañ vâ°. — 10. M °vasañti ‖ ci° B °vasanti ci°.

11. M nishṭâ pañḍito gacchemâ sañ° B nishṭhâ paṇḍi ° tustâ me ° sahâ te°. — 12. M teshâñ sansâre sansârañtânâñ° B °rgharâtrajatmasa° BM °hasrâ koṭibhi(M °bhiḥ) paraspare° M °gamaḥ â° BM °bhâryyâ(B °ryâñ)patishâm abhût teshâñ° B °nipyutanti | M °nipâtyañti ‖ . — 13. B so dâ° M bho dâ ° lobhenâpi abhimâyâ râjârhâ ° bhojanimâni ca pari° BM °ṇitâni ca pânakâni ca pâyatvâ alambi(M °âlañbi)tvâ ca cuñ° M °bayitvâ ca kañṭhe sa ° çvayânam abhiruhiya vâ ° gato e°.

17². M °naivañ mulapha ° kañ na kâñshṭhâni° B °dañ samârjati | agni° M °trañ pratipâkaroti | B °ṭipâkaroti | .

सो दानि ऋषिः [306b] तं कुमारं चिन्तापरं दृष्ट्वा पृच्छति ॥ न ते काष्ठानि भिन्नानि न ते उदकं आहृतं अग्निहोत्रं न जुहितं किन्तुवं ध्यानं ध्यायसि ॥ ऋषिकुमारो आह ॥ इह अन्यातो आश्रमातो ऋषिकुमारो संबऊलेहि ऋषिकुमारेहि सार्धं आगतो प्रासादिको दर्शनीयो शोभनेहि जटेहि अजिनेहि शोभनेहि कण्ठसूत्रेहि हस्तसूत्रेहि शोभनेहि मुंजमेखलेहि मृष्टानि च सानं फलफलानि पानीयं च न एदृशं यथास्माकं मृगयुक्ते पि उटजे अखन्ति ते मया आश्रमस्स अमुकस्मिं प्रदेशे दृष्टा तेन च मे ऋषिकुमारेण सार्धं प्रीति संजाता कण्ठे च सो गृह्य मम प्रकाशं वक्त्रेण वक्त्रं प्रणिधाय शब्दं करोति तं मे जनये प्रहर्षं तमहं स्मरन्तो परिदीनवक्त्रो तेन विना न रमामि आश्रमे ॥ ऋषिणो दानि ऋषिकुमारस्स श्रुत्वा तद्भूषि ॥ यादृशं अयं ऋषिकुमारो तेषां वर्णसंस्थानं आचिक्षति न ते ऋषिकुमारा स्त्रीहि ताहि भवितव्यं ॥ सो दानि ऋषि तं एकशृंगकं ऋषिकुमारं आह ॥ पुत्र न ते ऋषिकुमारा स्त्रियास्तायो ऋषीनालोभेन्ति तपातो वारयन्ति । ऋषिभिस्तायो दूरातो परिवर्जयितव्या अन्तरायकरायो ब्रह्मचारिणां । मा तेहि सार्धं समं करोहि आशिविषसमा तायो विषपत्रसमा तायो अंगारकर्षूपमा तायो ॥

सो दानि काशिराजा तं पुरोहितं आह ॥ नावासु अशोकवनिकानि रोपेत्वा पुष्पफलोपेतेहि वृक्षेहि गंगाये प्रतिश्रोतेन तं आश्रमपदं गच्छाहि नलिनीये सपरिवाराये सार्धं ततो तमृषिकुमारं नावायमारूपित्वा आनेहि ॥ सो दानि पुरोहितो काशिराज्ञः प्रतिश्रुत्वा नलिनीं राजकन्यां पुरिमांतांगिकचेतिष्ठाहि नावाहि विततविताना हि चित्रदुष्यपरिच्छिन्नाहि अवसक्तपट्टदामकलापाहि धूपनधूपिताहि

11¹. M °ṛishis tañ ku° BM °cchati na°. — 11². M °hṛitañ ‖ agni ° tañ kiñ tu vadhyâ vadhyâyati ‖ B °kintu . . . vyâvadhyâyati ‖ . — 3. M °bahulehi sârddhañ ° niyo çobhaṇehi ja° jinehi çobhaṇehi kaṇṭhasutre ° stasutrehi çobhanehi muñ° B °meshalehi mṛi° M °shṭâhi ca sâtañ phala° B °nañ phalephalâ° M °yañ ca naidṛiçâñ yathâ° BM °kañ mṛigayukte(M °yûthe)hi udaye arthanti(M °rthemti) te mayâ ° deçe dṛishṭvâ tena ca me ṛi° B °sañjâto kaṇṭhe° M °sañjâte kaṇṭhe ° çañ jaṭehi gṛihya ma va nânyavakhena vaktrañ° BM °çrame ṛi°.

9. BM ṛishiṇâ dâ° M °ni kumâ ° tvâ eta°. — 10. M °ayam ṛishi° B °âçishyati | na° M °tâbhi bhavi°.

11¹. B °dâni ṛishiñ tañ° M °dâni vâshi tam etaçriñgakam ṛishikumâram âha ‖ . — 11². M putra nañ te ° s târo ṛishiṇâlo° B °s tâvo ṛishi° M °lobheñti tapâto câryyañti ‖ B °to câryenti | . — 12. BM °s tâvo dû ° yakarâvo bra° ṇâñ mâ°. — 13. BM °rohi asi(M âçi)vishasamâ tâvo vishapatra(M °panna)samâ tâvo añgârakarshopa(M °rshasa)mâ tâvo | . — 15¹. BM dâni° M °hita âha ‖ . — 15². BM °kâni râpetvâ pu° M °lopetâni vṛi° B °lope tehi kakshe° M °çrotena tam âçra° BM °yam âru(M °ruvu)hitvâ â°.

17. M °çirâjño pratiçru ° purimatañgikaceṭimâhi nâvâhi vi° B °purimaṁtaṁgikaveṭimâhi nâvâhi vi° M °ciptadushya° BM °kshiptâ o° M °lâpâna dhupitâhi mu ° saparivârâm âruhitvâ ° çrotena tahiñ sâhañjanim âçra°.

मुक्तपुष्पावकीर्णाहि सपरिवारां आरूपित्वा गंगाये प्रतिश्रोतेन तं साहंजनिं आश्रमपदं गतो ॥ तेन दानि तस्य आश्रमपदस्य समीपे नावानि स्थापेत्वा सा नलिनी राजकन्या एकशृंगस्य ऋषिकुमारस्य सकाशं विसर्जिता गच्छ त्वं ऋषिकुमारमानेहि ॥ सा दानि नलिनी राजकुमारी नावातो ओरुहित्वा सपरिवारा तत्राश्रमपदे नानाप्रकाराणि वनकुसुमानि च वनकिसलयानि च प्रलावेन्ती आसति । तां पि च दृष्ट्वा ततो आश्रमातो मृगपक्षिगणा स्वक[307a]स्वकानि रुतानि मुंचन्तानि दिशोदिशं प्रधावन्ति ॥ ऋषिकुमारो पि तानि मृगपक्षिगणानि सन्त्रसन्तानि दृष्ट्वा तं प्रदेशं गतः । ततो तां पश्यति नलिनीं राजकुमारीं सपरिवारां वनकुसुमानि च वनकिसलानि च प्रलावेन्तीं ॥ दृष्ट्वा च पुनर्येन नलिनी राजकुमारी तेनोपसंक्रान्तो ॥ नलिनीये ऋषिकुमारो भूयो अभिनन्दितो कण्ठे च लग्ना भूयो च आलिंगितो चुंबितो च मोदकानि च खज्जकप्रकाराणि च परिभुंजित्वा राजार्हाणि च पानकानि पिबित्वा नलिनीये सार्धं तान्नावां आरूढो ॥ नलिनी आह ॥ इमे अस्माकं आश्रमे उदके संचरन्ति ॥ सो ताये प्रलोभेत्वा नावायानेन वाराणसीमानीतो । पुरोहितेन ऋषिकुमारस्य नलिनी पाणिग्रहं कृत्वा दिन्ना ॥ सो ताये नलिनीये सार्धं आसति क्रीडति न पन संयोगं गच्छति । जानाति वयस्यो मे ऋषिकुमारो ति ॥

सो दानि ताये नलिनीये सार्धं तस्यां नावायां साहंजनिमाश्रमपदं गतः ताये च मातरे मृगीये एकशृंगको ऋषिकुमारो नलिनीये राजकुमारीये सार्धं आगच्छन्तो दृष्टः ॥ सा दानि पुत्रं पृच्छति । पुत्र कहिं सि गतो ति ॥ सो दानि आह ॥ इमस्य मे वयस्यस्य आश्रमं गतो ति ॥ एषो मे वयस्य अग्निं प्रदक्षिणीकृत्वा उदकेन पाणिना गृहीतो ति ॥ तस्या दानि मृगीये एतद्भूषि ॥ न खलु

2. BM °pe nâvâ nishape(M °nipate)tvâ sâ ° jakamñnyâ e° M °rjita gacchamñtamñ ṛi° B °cchantamñ ṛishikumâra ânehi sâ°. — 4. BM °to âru° M °de nânâprakârâni vanaku° BM °sumânâni ca vanakiçalakâni ca pralobhenti âsanti (M °prarobhemñti âsamñti) | .

6. BM tâni ca dṛi ° muñcatâni diço° M °dhâvamñti ‖ B °nti ṛi°. — 7. B °nâni satrasantâ° M °nâni samñtrasamñtâni dṛi° B °gataḥ ta°. — 8. BM °to tamñ paçya ° kiçalâni(B °ni ca) pralâpenti dṛi°. — 9. M °samñkrâmñto B °nto na°. — 10. M °ndito kamñṭhe lagno bhûyo ca â ° kâni ca shajja ° rhâni ca pâ ° rddhamñ tâmñ nâvâmñ âruhi âsati ‖ .

13¹. M kriḍati nali°. — 13². BM °âçramo u° M °caramñti. — 13³. B °pralâbhe°. — 14. BM °liniye pâṇi°. — 15. B °ḍati na vana samñ° M °ḍati na va samñ°.

17. BM so dâni tâye naliniye sârddhamñ tâmñ nâvâmñ sâ° M °janîm âçra° B °çramamñpadamñ° M °damñ gato tâye ca mṛigiye mâtare e° B °mâtaramṛi° M °dṛishṭo B °shṭaḥ sâ°. — 19¹. B °cchati pu°. — 19². M putra ko esho himñ si°. — 20¹. M °vayasya âçra° B °vayasyâsya â°. — 20². M °vayasyo agnimñ ° kshiṇiṁkṛi° B °gṛihitamñ ti ta°.

21¹. BM tasya dâ°. — 21². M khalu ° ro vayasya samñjâ° BM °tena te esha(M °sho) bhâryâ a° M °kshiṇiṁkṛi ° pâṇigṛi°.

पुनरयमृषिकुमारो वयस्यं जानाति भार्यां वा दृयं च कन्या अयं च ऋषिकुमारो पुरुषोत्तमो एतेन तु एषा भार्या अग्निं प्रदक्षिणीकृत्वा उदकेन पाणिगृहीता भार्या लब्धा ति ॥ तत्र को से ऋषिकुमारस्य एतमर्थं संबोधये यथा न एष ऋषिकुमारो काशिराज्ञो एषा धीता नलिनी नाम तव भार्या दिन्ना ति ॥ तत्र च साहंजनिस्य आश्रमपदस्य हेष्टा गंगाकूले प्रतिव्रतानां तापसीनां आश्रमपदं प्रविशन्तो ऋषिकुमारो तापसीहि वारियति ॥ मा तुवं अत्र आश्रमपदे प्रविशाहि त्वं पुरुषो एषो च स्त्रीणां प्रतिव्रतानां ब्रह्मचारिणीणां आश्रमो ति न लभ्यं अत्र पुरुषेण प्रविशितुं ॥ सो दानि ऋषिकुमारो तां तापसीं पृच्छति ॥ को वा स्त्री पुरुषो वा ति ॥ तस्य ताये तापसीये स्त्रीधर्मा च आचिक्षिता न एष तव वयस्यो न एष ऋषि[307b]कुमारो एषा स्त्री नलिनी नाम राजकुमारी काशिराज्ञो धीता त्वं च पुरुषो मृगीतो उत्पन्नो ततो त्वं न जानासि एषा तव उदकेन भार्या दिन्ना त्वं च एतस्या पति नो लभ्या युष्माभिः अन्यमन्यं त्यजितुं ॥

सो दानि ऋषिकुमारो तासान्तापसीनां श्रुत्वा नलिनीये सार्धं साहंजनिं आश्रमपदं पितुः काश्यपस्य ऋषिस्य सकाशं गतो पितुः पादां वन्दित्वा सार्धं नलिनीये एतां प्रकृतिं सर्वां आरोचयति ॥ ऋषिस्य एतद्भूषि ॥ न शक्यति ऋषिकुमारो नलिनीये विना इह आश्रमपदे प्रतिवसितुं परस्परस्य एते बद्धसंजाता स्नेहसंजाता ॥ सो दानि तं पुत्रं एकशृंगं ऋषिकुमारं आह ॥ पुत्र एषा तव नलिनी राजकुमारी अग्निदेवं साक्षीकृत्वा उदकेन पाणिगृहीता दिन्ना । एषा ते भार्या त्वं च एतस्या पतिः । न लभ्या युष्माभिः परस्परस्य त्यजितुं । गच्छ एताय सार्धं वाराणसीं नगरं ॥ ते दानि ऋषिस्य पादां वन्दित्वा प्रदक्षिणीं च कृत्वा

3. BM °tra ko me ṛi ° evam arthamñ ° yathâ va na esha ° ro râçirâjño° B °nâma tatra bhâryâ dinnâ | . — 4. M °hamñjanîsya â° B °gamñgâkule° M °gamñgâkule pativra° B °damñ gacchâma | tena dâniṁ tan tâpasînâmñ âçramapadamñ gatâ tatra ca tâpasînâmñ âçramapadamñ pravi° BM °hi vârayati mâ°.

6. M mâ bhuvo a° BM °tvamñ purusho eshâmñ ca° M °striṇâmñ pativra ° cârinâmñ â° B °bhyamñ | a° M °rushamñṇa praviçatumñ ‖ B °tumñ so°. — 8¹. M °ro tân tâpa°. — 8². B °sho vâ yâti ta° M °sho vâ pi ta°. — 9. M °siyamñ stridharmâ ca âcikshati naisha tava vaya° B °çirâjñâ dhi ° nno tato tamñ na jâ° M °dinnâḥ tvamñ câsyâ°.

13. M °ro tâsâm tâpa° BM °çrutvâ naliniyena(M °yeta) sârddhamñ sâhamñjanimñ âçra° B °pade pituḥ kâçya° BM °ṛishi sakâ° M °niya e° B °ekâmñ pra° M °timñ sarvam âro° BM °ti ṛi°. — 15². M °çakya ṛi ° prativiçitumñ paraspa e° B °prativaçitumñ° M °ddhasamñjñâtasnehâsamñjâtâ B °ddhasamñjâtasnehâsamñjâtâ | .

17¹. M °çriṁga ṛi ° mâram âha ‖ . — 17². BM °esha ta° M °va nâlani° BM °devâmñ sâ ° udakamñ ca pâ° M °dinnâḥ ‖ . — 18. M eteshâmñ bhâryâmñ tvamñ ° patir na la° B °patimñ na°. — 19¹. M °labhya yu°. — 20. M °dâṁ vamñditvâ pra° BM °ṇimñ ca mâta° M °simñ gato gatvâ kâçirâjñâ upasamñkrâmñtâ râ° B °ntâ râ°.

मातरं च अभिवादेत्वा वाराणसीं गता गत्वा काशिराज्ञो उपसंक्रान्ता ॥ राज्ञा ऋषिकुमारस्स अनुरूपं गृहं दिन्नं परिवारं च उपस्करणप्रत्यास्करणं च सर्वाणि च उपभोगपरिभोगानि च युवराज्येनाभिषिक्तो ॥

सर्वे क्षयान्ता निचयाः पतनान्ता समुच्छ्रयाः ।
संयोगा विप्रयोगान्ता मरणान्तं पि जीवितं ॥

सो दानि काशिराजा कालधर्मेण संयुक्तो कालगतो एकशृंगेण वाराणस्यां राज्यं प्रतिलब्धं ॥

तेन दानि नलिनीये मूलातो यमजाता द्वाचिंशत्पुत्रा जाता । अपराणां पि देवीनां मूलातो सातिरेकं पुत्रशतं जातं ॥ धर्मेण राज्यमनुशासयित्वा चिरं दीर्घरात्रं ज्येष्ठपुत्रं राज्ये भिषिंचित्वा पुनः ऋषिप्रव्रज्यां प्रव्रजितो ॥ तेन दानि पूर्वरात्रापररात्रं जागरिकायोगसमनुयुक्तेन युज्यन्तेन घटन्तेन व्यायमन्तेन वाहितकेन मार्गेण चत्वारि ध्यानान्युत्पादितानि पंचाभिज्ञा साक्षात्कृता ॥ सो दानि कामधातुं समतिक्रमित्वा कायस्य भेदात् ब्रह्मदेवनिकाये उत्पन्नो ॥

भगवानाह ॥ यस्मिन कालेन काश्यपो ऋषिरेष स शुद्धोदनो अभूषि । या सा मृगी एषा सा भिक्षवो महाप्रजापती अभूषि । यश्च काशिराजो भूदेष एव महानामो शाक्यो भूत् । यश्चैकशृंगको ऋषिकुमारस्सदाहं एव बभूव । या च नलिनी ना[308a]म राजकन्या एषैव यशोधरा अभूषि ॥ तदापि एषा आत्मानं अलंकृत्वा मम प्रलोभेति । एतरहिं पि एषात्मानं अलंकृत्वा मम प्रलोभेति ॥

नलिनीये राजकुमारीये जातकं समाप्तं ॥

1. M râjño ṛi ° starasya pratyâcaraṇaṃ° B °tyâvara°. — 4. B °yântâ vica° M °nicayâ pa° BM °cchrayâḥ saṃ°. — 5. B °nânta hi ji° M °nânta hiṃ ji°.

6. B °rmeṇa saṃko kâ° M °kto kâsagato râkaçriṃ° B °çriṃgena vâ° M °pratilaṃbdhaṃ ‖ . — 8¹. B °lâto — matmâghâ triṃ° M °yamapârâ dvâ ° jâtâḥ | . — 8². M °viṇâm mûlâto sotire°. — 9. M °ṇa râjyaṃ anu° B °ṇa râjyaṃm anu° M °sayi ciraṃ° BM °jyeshṭapu° M °jye 'bhi ° shipravrajito ‖ . — 10. M °yogam anuyuktena pûjya ° vyâyamaṃtena vâ° B °vyâyapantena vâ° M °sâkshikṛitâ | .

12. M °dhâtu sama ° bhedâd brâhmaṇo de° B °brâhmo de° M °tpannaṃ ‖ . — 14². M °lena tena samayena kâçyapo nâma ṛishiḥ esha° | . — 14³. M mâ sâ mṛigi evâ sâ bhi° B °pati gau° M °gauttami°. — 15. B °râjño bhûd e° M °d eshaivaṃ ma ° çâkyo 'bhût | B °çâkyâ bhût | .

16¹. M °çriṃgo ṛi ° evaṃ ba°. — 16². B °râjakaṃnyâ°. — 17. M °eshâ ânaṃ a°. — 19. M iti çrimahâvastuavadâne nali°.

भिक्षू भगवन्तमाहन्सुः ॥ पश्य भगवन् कथमियं यशोधरा राज्ञा शुद्धोदनेन अननुयुज्यित्वा अपर्यवगाहित्वा अनपराधी वधा ति ओसृष्टा ॥ भगवानाह ॥ न भिक्षवः एतरहिमेव एषा यशोधरा राज्ञा शुद्धोधनेन अननुयुज्यित्वा अनपराधी वधा ओसृष्टा । अन्यदापि एषा यशोधरा इमिना राज्ञा शुद्धोदनेन अननुयुज्यित्वा अपर्यवगाहित्वा अनपराधी वधा ओसृष्टा ॥ भिक्षू आहन्सुः ॥ अन्यदापि भगवं ॥ भगवानाह ॥ अन्यदापि भिक्षवो ॥

अतीतमध्वाने अनुहिमवन्ते महावनखण्डं तत्र माण्डव्यस्य ऋषिस्य आश्रमपदं चतुर्ध्यानलाभिनः पंचाभिज्ञस्य महाभागस्य मूलोपेतं फलोपेतं पुष्पोपेतं पत्रोपेतं पानीयोपेतं मृगपक्षिशतसहस्रेहि निषेवितं ॥ अथ खलु भिक्षवो माण्डव्येन ऋषिणा ग्रीष्माणां पश्चिमे मासे क्षुद्रपाकेहि फलेहि परिभुक्तेहि बहुतरेण च पानीयेन पीतेन अभिष्यन्देहि धातूहि उपलकुण्डके सशुक्रं प्रस्रावं कृतं ॥ अथ खलु भिक्षवो अन्यतरा मृगी ऋतुमती तृषायां श्रान्ता पानीयसंज्ञाय ततो उपलकुण्डकातो तमृषिस्य सशुक्रं प्रस्रावं पीतं । अशुचिम्रक्षितेन च मुखतुण्डकेन स्वकं योनिमुखं परिलेहसि । अचिन्त्यो सत्वानां कर्मविपाकः । ताये मृगीये तं शुक्रं रुधिरं च संमूर्छित्वा कुक्षिं प्रतिलब्धं ॥ सा दानि तस्मैव आश्रमपदस्य परिसामन्तेन चरति परिभ्रमति च ॥ सा दानि कालेन च समयेन च दारिकां दर्शनीयां अक्षुद्रावकाशां परमया शुभवर्णपुष्कलतया समन्वागतां गौरीं नवनीतपिण्डसंनिभां प्रसूता ॥ सा दानि मृगी तां दारिकां प्रसूता च तेन च ऋषिणा तं द्रव्यं दृष्टं ॥ तस्मैतदभूषि ॥ कुतो इमस्यान्तिरक्षानगताये मृगीये मानुषं अपत्यन्ति ॥ समन्वाहरित्वा ऋषिणां पंचाभिज्ञानां ज्ञानं प्रवर्तति ॥ सो दानि ऋषि माण्डव्यो

1¹. B bhikshu bha° M bhikshur bhagavaṃtam âha° B °vanta âbansuḥ pa°. — 1². M °yujitvâ aparyâvagâhetvâ ana° B °jyitvâ parya° M °osṛishṭo ‖ anyadâ° (*l.* 4). — 3. B °yujyiṃtvâ ana°. — 4. M °pi evâ ya ° dharâ etinâ° B °dharâ eminâ° M °nena anuyuṃjitvâ aparyya°. — 5. BM bhikshu â°.

6¹. M °gavan ‖ . — 6³. M °kshavaḥ B °kshavo a°. — 7. M atitam adhyâne° B °hâvanashaṇḍe tatra maṇḍa° M °hâvanakhaṃḍe tatra maṃḍavya° B °mûlopetaṃ | pha° M °gapakshiganaça°. — 9. B °vo maṇḍa° M °vo maṃḍavye ° shyandehi dhâ° B °shyande dhâ° M °utparakundake° B °ṇḍakehi sa° M °çukrapramrâvaṃ°.

11. M °pâniyaṃ saṃjñâya tataḥ utparakundakâto taṃ ṛishi° B °ṇḍalakâto° B °pramrâvaṃ° M °pramrâvaṃ titaṃ. — 13. M °tuṃḍake° B °parilekhasi | M °parilekhesi. — 14¹. B acintyaṃ sa° M acintya sa ° pâko to°. — 14². M toye mṛi° B °mṛigi taṃ° BM °çukraudhi° M °sammurcchitvâ° B °kukshi pra°.

16. M °lena ca dâ ° drâvakâçaṃ pa° B °paramapâṇḍubha° M °shkaratayâ° BM °gauri nava° M °nitapiṃḍasaṃ ° prasutâḥ | . — 18. M °kâṃ dyasutâṃ ca te° B °sûtâṃ ca tena câ rishi° BM °dravyena dṛishṭvâ ta°. — 19¹. M °syâ tiricchâ ° patyaṃ ti B °n ti sa°. — 20. B °shi maṇḍa°.

पंचाभिज्ञो महाभागो समन्वाहरति ॥ इह मम [308b] अत्र आश्रमपदे अन्यस्य पुरुषस्य प्रचारो नास्ति । एषा च मृगी इमस्मिं एव मम आश्रमपदे जाता संवृत्ता तथान्यान्यपि मृगपक्षिशतानि इह वनखण्डे संवृत्तानि नैव मम क्वचित् मृगो वा पक्षी वा अन्यवनखण्डं गच्छति न चान्यातो वनखण्डातो कोचित् मृगपक्षी इहागच्छति । इह एते वनखण्डे मृगपक्षिगणा जाता च संवृत्ता च संवृद्धा च अभिरता च अमनुष्यचरितं च वनखण्डं । अमुककाले मया ग्रीष्माणां पश्चिमे मासे पक्वसुपक्वानि च फलफलानि परिभुक्तानि सुशीतलं च बहुतरं पानीयं पीतं । ततः मे भिष्यसेहि धातूहि उपलकुण्डके सशुक्रं प्रस्रावं कृतं एताये मृगीये तृषिताये तं सशुक्रं प्रस्रावं पानीयसंज्ञाये पीतं । ततो एताये मृगीये कुक्षिं प्रतिलब्धं । मम एष अंगनिस्रावो ॥ तस्य ऋषिस्य माण्डव्यस्य तत्र दारिकाये अतिप्रेम्नं संजातं ॥ तेन सा दारिका अजिनकेन गृह्य आश्रममानीता । साप्यस्य मृगी पृष्ठतो न्वेति ॥ तेन दानि ऋषिणा ताये दारिकाये तं नाभि फलशस्त्रकेन च्छिन्नं मानुषिकाये च नं केलायनाय केलायन्ती ताये वनमृगीये स्नानचूषणं आसति । सो पि नं ऋषि क्षुद्रपाकानि फलानि मुखे पीडेति कालेन कालं तैलेनाभ्यंगेति सुखोदकेन स्नपेति ॥ संवर्धयमाना च सा दारिका ताये मृगीये तेन च ऋषिणा अतीव तं वनं शोभेति सा च नां माता जिह्वाये परिलिहति ॥ यत्र काले सा दारिका विवर्धमाना पादेहि पि अखति ततो यत्र यत्र पादा निक्षिपति तत्र तत्र ताये दारिकाये पूर्वोपचितेन शुभस्य कर्मस्य विपाकेन पद्मानि प्रादुर्भवन्ति ।

1. B iha mama putra ° pracâra nâsti | . — 2. BM °imamñhi evaṁ mama â° B °çramapadaṁ jâ° M °jâtâḥ ‖ saṁvṛitâḥ ta° BM °thânyânapi mṛi° M °naivaṁ mama kva° B °go vâ pakshi vâ anyavanashaṇḍaṁ° M °kshi vâ anyavanakhaṁṇḍaṁ gacchati ‖ tadânyanto vana° B °cânyanto vanashaṇḍâ° BM °to kvaci° M °t mṛigâpakshi i°. — 5. B °ete vanashaṇḍe° M °ete vanakhaṁḍe mṛi ° ttâ ca abhi° BM °manu(B °nushya)carite ca vanakhaṇḍe amu°.

6. M °shmâyâṁ paçci° BM °lâni ca pari° M °hutalaṁ pâ°. — 7. M tato me bhishyandaṁdehi dhâ° B °shyantehi dhâ° M °utpalakundake çaçukrapraçrâvaṁ° B °ṇḍake saçukraṁ pramrâvaṁ kṛi° M °trishîtâye ° vaṁ piniya°. — 9¹. B °kukshi pra°. — 9². B °nimrâvo ta°. — 10. B °shisya maṇḍa°, M °shisya maṁḍavya°.

11¹. B °âçramapadaṁ â°. — 11². M °prishṭato anueti ‖ . — 12. M te dâ° B °taṁ nâlaphalaṁ çastra° M °taṁ nâlaphalaçasukena ° nushîkâye vacanaṁ kelâyanakelâyanti | tâ° B °naṁ kelâyanâya kelâyanti tâ ° stanamûcanaṁ â° M °stanasucanaṁ âsati | . — 13. BM so pi tam ṛishi(B °shi) kshu° B °ḍeti | kâlena kâ° M °kena snâpeti B °peti saṁ°. — 15. M samvaddhamânâ° B °varddhamânâ° M °gî etena ca ṛi ° tivaṁ taṁ vanaṁ çobhati ‖ sâ ca tâṁ mâtâ° B °çobhati so ca naṁ mâtâ° BM °likhati ya°.

16. M °vivaddhamânâ° B °ṇvati | tato° M °ṇvati | tataḥ yatra yatra pâ ° ti tatra tatra tasyâ dârikâyâ pûrvoparitena çu ° rbhavaṁti sa°.

समन्तेन च आश्रमपदे तस्य ऋषिस्य ताये दारिकाये पर्याहिण्डन्तिये पद्मपङ्क्ती उत्थापिता पद्मवनमिव शोभति तेहि च पद्मेहि सा दारिका क्रीडति हस्तेनापि गृह्य अखति ॥ तस्य दानि ऋषिस्य तस्या दारिकाये तंशुभकर्मविपाकतो क्रमेषु पद्मानि प्रादुर्भूतानि दृष्ट्वा विस्मयं संजातं अहो दारिकाये ऋद्धीति यत्र यत्र क्रमा निक्षिपति तत्र तत्र प्रासादिका[309a]नि दर्शनीयानि पद्मानि प्रादुर्भवन्ति कृतपुण्याये इमाये दारिकाये भवितव्यं पूर्वं दक्षिणीयेषु ओरुप्तकुशलेषु कुशलमूलाये यस्या इमं एदृशं अनुभावं ॥ तेन दानि ऋषिणा ताये दारिकाये पदुमावतीति नामं कृतं ॥

सा दानि संवर्धमाना ताये मातरे सार्धं तस्याश्रमस्य परिसमन्तेन अखति । यतो यतो सा मृगी चरमाणा अखति ततो ततो सापि दारिका ताये मातरे सार्धं अखति मृगेहि च मृगपोतकेहि च सपरिवारा क्रीडन्ती अखति ॥ यदा च बुभुक्षिता भवति ततो ताये मातरे सार्धं तमाश्रमं आगच्छति अपरेहि मृगेहि मृगीहि च मृगपोतकेहि च सपरिवारिता । ततो सो ऋषि आश्रमगताये मृगीये मृष्टमृष्टानि फलानि देति मृष्टमृष्टानि च पानकानि देति ॥ सा दानि फलफलानि स्वयं पि खादति अपरेषां मृगपोतकानां देति ॥ यदा सा दारिका तत्राश्रमे शयिता भवति ततो ते मृगपोतका च मृगपोतिका च चारिकां अनुपरिचरित्वा शयन्ति यदा च चरितुकामा भवन्ति ततो तां दारिकां मुखतुण्डकेन प्रतिबोधयन्ति ॥ यतो यतो मृगा चरन्तो अखन्ति ततो ततो सा दारिका तेहि मृगेहि मृगपोतकेहि मृगपोतिकाहि च सार्धं क्रीडन्ती अखति । यतो यतो सा अखति

1. BM °çramapadaṁ tasya ṛi ° ryâhiṁḍantiye padmehi paktihi u° B °ntiye padmehi shaki u° M °dmehi sa dâ°. — 3. M °smaya saṁ° B °jâtaṁ | aho° BM °kâye riddhîti-(B °ti |) yatra yatra(M °tra caṁ)kramâṇi kshi° M °dikâ darça ° rbhavaṁti kṛitapuṇyâni imâ° B °nti | kṛitapuṇyâhi imâ° BM °vyaṁ | pûrvaṁ(M °rva) da° B °ṇiyashu° M °olupta° BM °lâye yasya i° BM °nubhavaṁ te°.

7. M °ye padmâva°. — 9. M °rddhamâni tâye° B °mânâni tâye° M °mâtaraṁ sâ° B °paribhrama°. — 10. BM °gî caramâni aṇvati | tato tato(M °taḥ) sâ pi° M °krîḍaṁti a° B °ḍanti a° BM °ṇvati ya°.

11. BM °vati | tato tâye(B °to tato ye) mâ°. — 13. M tataḥ so° B °so rishi° M °çramapadaṁ gatâ ° lâni phalâni deti° BM °ca phalapâṇikâ(M °nakâni) ca deti | . — 14. M °lâni ca svayaṁ° B °yaṁ vikhâ°. — 15. M °sâ dirikâ tatrâ° BM °ti | tato° B °te mṛigapotakâ ca cârikâṁ° M °çayaṁti ‖ yadâ ca caritukâmâ bhavaṁti tataḥ tâṁ° B °tukâmo bhavanti | tato° M °dhayaṁti.

18. M yataḥ yato mṛigo caraṁtâ aṇvati tataḥ tato sâ dâ° B °nto aṇvati | tato tato sâ dâ° M °kehi ca sârddhaṁ krîḍati aṇvati B °kehi mṛigapotikehi ca sârddhaṁ krîḍanti aṇvati | . — 19. M yato yataḥ sâ aṇvati tato tataḥ sa° B °ti | tato tato sa ° kramaṇteshu pa° M °krameshu pa ° rbhavaṁti ‖ .

ततो ततो समन्तेषु क्रमकेषु पद्मानि प्रादुर्भवन्ति । सापि दारिका तत एवन्तानि पद्मानि गृह्य स्वयं च आबन्धति तेषां च मृगपोतकानां पद्मानि आबन्धति ॥ एवं सा तेहि सार्धं क्रीडन्ती तहिं आश्रमपदे संवर्धते परस्परं विनापि न रमन्ति ॥ यत्र काले सा दारिका विज्ञप्राप्ता ततो तमृषिस्य आश्रमं सिंचति शोधेति नानाप्रकाराणि मूलविकृतीनि आनेति पत्रविकृतीनि नानाप्रकाराणि आनेति पुष्पविकृतीनि नानाप्रकाराणि आनेति फलविकृतीनि नानाप्रकाराणि आनेति उदकमानेति काष्ठं वा समिधानि वा आनेति । तं च ऋषिं तैलेनाभ्यंगेति स्नापेति । अग्निहोत्रं से पटिजागरेति तं च ऋषिं नानाप्रकारेहि मूलेहि च पत्रेहि च पुष्पेहि च [309b] फलेहिं च परिविसति । नानाप्रकाराणि च फलपानानि आनयति । यतो यतो च तत्राश्रमपदे अखति यतो यतो गच्छति मूलहारिका वा पत्रहारिका वा पुष्पहारिका वा फलहारिका वा ततो तेहि मृगपक्षीहि परिवारिता आगच्छति ॥

कदाचित्सा पद्मावती तेहि मृगपक्षीहि परिवारिता उदकहारिं गता काम्पिल्लको च राजा ब्रह्मदत्तो बलाग्रेण सार्धं मृगव्यं अखन्तः तं प्रदेशं उज्झितो वातजवसमेन तुरंगेन मृगमनुजवन्तो । तेन मृगेन सो राजा ब्रह्मदत्तो वनखण्डमुपनीतः ॥ यथोक्तं भगवता धर्मपदेषु ॥

गतिर्मृगाणां प्लवनं आकाशं पक्षिणां गतिः ।
धर्मो गतिर्द्विजातीनां निर्वाणं महती गतीति ॥

सो मृगो तत्र वनखण्डे नष्टो ॥ तेन राज्ञा ब्रह्मदत्तेन वनखण्डे तं मृगं मार्गे-

1. M sâ dârikâ tadâ evaṁ tâni padmâni gṛi° B °rikâ tataḥ e° BM °yaṁ ca âbandha- (M °badhnaṁ)ti | teshâṁ mṛi ° bandheti | . — 2. B °kriḍanti ta° M °kriḍaṁti tehiṁ°. — 4. BM °çodheti | nânâprakârâṇi mû ° neti(B °ti |) pushpavikṛitini âneti phalavikṛiti- (M °ti)ni nânâprakârâṇi âneti(M °ti ‖) udakam â(M °dakâ)neti(B °ti |) kâshṭam vâ (M °shṭhâni vâ) sa°.

7. BM °ṛishi tai° M °bhyaṁgi snâyeti. — 8. BM °traṁ me paṭi(M °ti)pâkaroti (M °ti ‖) taṁ° B °ṛishi nânâpra° M °ṛishiṇâ nânâprakârehi mulehi ca phalehi ca patrehi ca pariviçati B °viçati | . — 9¹. B °pânâni vâ â° M °ni ca â°. — 9². B °çramepade° M °ṇvati yato yataḥ gacchati mûlahârikâ vâ pushpahârikâ vâ phalahârikâ vâ patrahârikâ vâ gacchati ‖ tato° B °trahârikâri vâ pu ° phalahârikâ vâ gacchati tato ° mṛigapakshihi parivârito â° M °kshihi saparivârikâ â°.

12. M °sâ paimâ° BM °tehi mṛiga(B °ge)pakshihi pari ° riṁgatâ kâ(M °tâ ‖ kaṁ)-pilla ° vyaṁ aṇvataḥ(M °to) taṁ° B °ujhitvâ vâ ° tvâ ° ujhivâtajavesa° M °turagavegena mṛiga° B °raṁgena mriga anu°. — 14. B °tto vanashaṇḍa° M °tto vanakhaṁḍam upanito ‖ . — 15. B tatho° BM °shu ga°.

16. M gatir mṛi° BM °plavaṇaṁ â°. — 17. B dharmâ gatir vibhâti° M °rmo gati vibhâti° mahatâṁ gatiti | . — 18¹. M °mṛige tatra vanakhaṁḍe nashṭo° B °shṭo te°. — 18². M tatra

न्तेन तहिं उदककूले पदुमावती दृष्टा कृष्णाजिनेन निवस्ता उत्तरासंगिका च उदककुम्भेन गृहीतेन पद्मेन च शोभनेन हस्तगतेन प्रासादिका दर्शनीया परमया वर्णपुष्कलतया समन्वागता । यत्र यत्र च क्रमाणि निक्षिपति तत्र तत्र पद्मानि प्रादुर्भवन्ति मनोरमाणि सुदर्शनीयानि । दृष्ट्वा च पुनर्भिक्षवो राज्ञो ब्रह्मदत्तस्य पदुमावतीं ऋषिकुमारीं एतदभूषि ॥ अहो कन्यायाः रूपवन्तं ऋद्ध्यनुभावं यत्र यत्र क्रमाणि निक्षिपति तत्र तत्र पदुमानि प्रादुर्भवन्ति अतीव चक्षुरमणीयानि प्रासादिकानि दर्शनीयानि का नु खल्वियं भविष्यति देवकन्या वा नागकन्या वा किन्नरकन्या वा मानुषी वा दृयं भविष्यति अमानुषी वा । यं नूनाहं उपसंक्रम्य परिपृच्छेयं ॥

अथ खलु भिक्षवो राजा ब्रह्मदत्तो येन पदुमावती ऋषिकुमारी तेनोपसंक्रमित्वा पदुमावतीं ऋषिकुमारीमेतदवोचत् ॥ भद्रे का त्वं कस्य वासि ॥ एवमुक्ते भिक्षवः पद्मावती ऋषिकुमारी राजानं ब्रह्मदत्तमेतदवोचत् ॥ अहं खलु ऋषि पद्मावती नाम ऋषिकुमारी माण्डव्यऋषिस्य धीता मूलफलभोगिकस्य वनवासिस्य ब्रह्मचारिस्य ॥ एवमुक्ते भिक्षवः राजा ब्रह्मदत्तो [310a] पद्मावतीं ऋषिकुमारीमेतदवोचत् ॥ केवरूपा ते भद्रे भोजनविधानानि उपवने निवसन्तीये येनासि एवं उपचितशरीरा कीदृशानि ते वस्त्रविधानानि येन ते चैवं सुकुमारवर्णनिभा ॥ एवमुक्ते भिक्षवो पदुमावती ऋषिकुमारी राजानं ब्रह्मदत्तमेतदवोचत् राज्ञो वस्त्राणि परामृशन्ती ॥ मूलफलानि अस्माकमाहारं अजिनानि प्रावरणानि एवं सूक्ष्माणि यादृशानि इमानि न च अजिनानि ॥ एवमुक्ते भिक्षवः

tena râ ° ttena vanakhaṁḍe taṁ ° kûle padmâvati° B °dṛishṭvâ kṛi° M °shṇâm âji ° nivastra utta° B °nivasta utta° M °çobhaṇena hasta° B °bhanena ca hasta° M °niyâ paramâye pushkalavarṇatâye samanvâgatâḥ B °pushkarata°. — 3. BM °yatra caṁkra° M °rbhavaṁti ‖ manoramâni su° B °ṇi sahadarçaṇiyâni dṛi° M °rçaṇâniyâni dṛi°. — 4. B dṛishṭvâ ca | pu° M °puna bhi ° sya padmâvatiṁ râjakumârim eta° B °tiṁ râjaku°. — 5. M °nyâyâ rûpavatiṁ ṛiddhyânu° B °ntaṁ ridhyânubhâ° BM °yatra yatra caṁkra° M °rbhavaṁti | ati° B °nti | ativa ca cakshu ° lviyaṁ bhavishyati | devakaṁnyâ vâ nâ ° nnarakaṁnyâ vâ mâ° BM °iyaṁ rûpaṁ bha° B °shyati | a° M °amânushâ câ.

8. M yaṁ nûnâsyâhaṁ°. — 10. M °yena padmâvatî nâma ṛi ° tvâ padmâvatâṁ ṛi° B °tvâ padumâvatî ṛi°.

11¹. M °sya câpi e°. — 11². M °kshavo padmâvati ṛi ° mâ râjâ ° tad uvâca ‖ . — 12. M °ṇḍavyo ṛishisya dhitâ mulaphalabhogika°. — 14. M °kshavo râ° B °hmadatta padmâvati ṛi°. — 15. M °bhadro bho° B °santiye na yenâsi° M °nti yena yena si ° rîro kî ° caiva sukumâro varṇa° B °kumârâ varṇṇa°.

17. M °rî râjâna bra° BM °cat ‖ râjño° M °varttrâṇi parâmṛiçati B °mṛiçati mû°. — 18. M mula° B °prâvarâṇâni evaṁ sûkshmâni yâ° M °mâni ca a°. — 19. M °kshavo râiâ bra°.

राज्ञो ब्रह्मदत्तस्य एतद्भूषि ॥ अविधिज्ञा इयं ऋषिकुमारी राज्ञो राजार्हाणां वा वस्त्राणां नैव ऋषिस्य विशेषं अभिजानाति न राजानस्य नैव अजिनानां विशेषं जानाति नापि राजार्हाणां वस्त्राणां विशेषं जानाति नापि मम तुरंगस्य । एषा च ऋषिकुमारी राजकन्या ममैषा भार्या अनुरूपा भवेया न शक्या मया माण्डव्येन ऋषिणा अनभ्यनुज्ञाता पाणिनापि प्रष्टुं कुतो पुनरितो आश्रमातो कम्पिल्लं नगरं नयितुं । माण्डव्यो ऋषि महाभागो शापेन मे सपरिवारं भस्मीकरेय । यं नूनाहं पदुमावतीमृषिकुमारीमुपायेन प्रलोभयेयं ॥ पौराणानां च भिक्षवो राज्ञां मृगव्येन गच्छन्तानां मधुसर्पिसंयुक्तानि सक्तूनि राजार्हाणि च मोदकानि च उक्कारिकानि च यमलकं पूरेत्वा अश्वपृष्ठे पल्लाणस्य पृष्ठतो बन्धन्ति मा राजा अश्वेन एको अद्वितीयो वनेषु हृतो समानो बुभुक्षाय मरेय ॥ तेन खलु पुनर्भिक्षवो समयेन राज्ञो ब्रह्मदत्तस्य मधुसर्पिसंयुक्तानि सक्तूनि मोदकानि च उक्कारिकानि च यमलकं पूरेत्वा अश्वपृष्ठे पृष्ठतो पल्लाणवध्नेण बद्धमभूषि ॥ अथ खलु भिक्षवः राजा ब्रह्मदत्तो यमलकातो मोदकं उक्कड्ढेत्वा पदुमावतीये अदासि ॥ हन्त भद्रे इमानि अस्माकं फलानि ॥ सा दानि आह ॥ जाने कतमानि शोभनतराणि फलानि युष्माकं वा अस्माकं वा ॥ सा दानि तं मोदकं परिभुंजित्वा आह ॥ भगवं शोभनानि इमानि युष्माकं फलानि मृष्टानि रसवन्तानि अस्माकं पुनः फलानि कटुकषायाणि ॥ राजा आह ॥ एदृशानि अस्माकं आश्रमे वृक्षेषु फलानि यदीच्छसि [310b] ईदृशानि परिभुंजितुं ततो तं मम आश्रमपदं गच्छाहि ॥ एवमुक्ते भिक्षवः पदुमावती ऋषिकुमारी राजानं ब्रह्मदत्तमेतदुवाच ॥ इच्छामि अहं एदृशानि फलानि परिभोक्तुं आगमे मुहूर्तं इदमस्माकं आश्रमं न दूरं यावदिमं उदकं हरामि तातस्य आमन्त्रेमि ततः तव आश्रमं गमिष्यामि ॥ अथ खलु भिक्षवो राजा ब्रह्मदत्तो पदुमावतीये अपराणि मोदकानि अदासि ॥ इमानि पितुरुपनामेहि एवं च वदेहि । यस्य ऋषिस्य आश्रमे एदृशानि फलानि तस्याहं भार्या भविष्यामीति । लङ्घ त्वं च आगच्छेहि एष अहं इह नदीतीरे आसामि ॥

अथ खलु भिक्षवः पदुमावती ऋषिकुमारी येन माण्डव्यस्य आश्रमपदं तेनोपसंक्रमित्वा पानीयभाण्डं निक्षिपित्वा तानि मोदकानि पितुर्माण्डव्यस्य अनुप्रदासि । इमानि तात फलानि खादाहि यस्य ऋषिस्य आश्रमे एदृशानि फलानि तस्याहं भार्या भविष्यामि ॥ अथ खलु भिक्षवो माण्डव्यस्य ऋषिस्य एतद्भूषि ॥ नूनं पंचालराजा ब्रह्मदत्तो मृगव्येन अण्वन्तः इमस्याश्रमस्य समीपं अनुप्राप्तो तेन इमानि मोदकानि दिन्नानि परिभुक्तानि पदुमावतीये राजार्हाणि मोदकानि न एषा शक्यति भूयो इहाश्रमे कटुकषायेहि फलाफलेहि यापयितुं पदुमावती च राजकन्या । यन्नूनाहं अस्य राज्ञो ब्रह्मदत्तस्य भार्यां प्रयच्छेयं ॥ अथ खलु भिक्षवो माण्डव्यो ऋषिः पदुमावतीं ऋषिकुमारीमेतदुवाच ॥ न खलु पदुमावति एवंरूपाणि फलानि भवन्ति को ते ज्वलनसमेहि कामेहि प्रलोभेति ॥ अथ खलु भिक्षवो पदुमावतीये एतद्भूषि ॥ भवितव्यं कामा नाम ते वृक्षा येषां इमानि एदृशानि फलानि ॥ अथ पदुमावती एवं पितरमेतदवोचत् ॥ यदि तात कामफलानामेदृशो आस्वादो तान्यहं परिभुंजिष्यामि न मे इमानि महत्फलानि रोचन्ति ॥ अथ माण्डव्यो ऋषिः पदुमावतीमेतदुवाच ॥ को ते पदुमावति इमानि फलानि अदासि केवरूपो वा सो ऋषिकुमारो कतरस्मिं वा प्रदेशे तिष्ठति ॥

1. M °ri râjñâ râjârhâṇâm vastrâ° BM °shisya viçeshaṁ nâbhijâ(M °jña)nâti na M °naivaṁ ajinânâṁ viçeshaṁ nâbhijânâni na râjânasya naiva ajinânâṁ ° turagasya ‖ . — 4. BM eshâṁ ca ṛishikumârî(M °rîṁ) râjakanyâ mamesha bhâ ° veyâ ça° M °kyâ mayâ maṇḍa ° pâninâ° BM °kuto pu ito âçra° M °raṁ napituṁ B °yituṁ ma°.

6. BM maṇḍa° M °raṁ bhâsmi° BM °reyaṁ | . — 7¹. M °kumârîṁ upâ° B° kumârâm upâ° M °lobheyaṁ | . — 7². BM paurâṇâṁ ca bhi° M °vyena gacchentânâṁ madhusarppisaṁyuktânâṁ madhumarpisaṁyuktânaṁ madhusarpisaṁyuktâni çaktukâni râjârhâ° B °ntânâṁ madhusarppisaṁyuktânâṁ madhusarpiyuktâni çaktû ° rhâni ca mo° M °yamarakaṁ pû° BM °çvaprishthapallâ(M °lâ)çasya° M °to baṁdhyati ‖ mâ râ° B °ndhyati mâ rà°. — 10. B °ktâni çaktû° M °ktâni çaktumo° B °ukvaritâni yamala° M °kkârikâni yamarakaṁ rûpetvâ ° to palâçe baddhena baddha° B °llâçabaddhatena baddha°.

12. M °yamarakâto modako u° BM °kkaṭṭetvâ° B °si ha°. — 14¹. B °imâṇi a ° lâni sâ°. — 15. BM °dâni tato mo°.

16. B bhagavâṁ ço° M sarvaço ° punaḥ phalâ° BM °ṭukâshâ°. — 17². M etâdriçâni asmâkaṁm âçra° BM °lâni icchasi idriçâ° B °tuṁ | tato° M °daṁ âgacchâhi ‖ . — 19. M °kshavo yaimâṁvati ° dattaṁ eta°.

1. M °aham edṛi° B °hûrtte i° M °kaṁ âçramaṁ nânidûre yâ° B °dûre yâvad emaṁ u° M °râmi tântasya âmaṁtremi tato tavâçra°. — 3. M °tto padmâvati° BM °kâni deti adâ°. — 4¹. M °evaṁ vademihi B °dehi ya°. — 4². M °syârha bhâ° B °miti la°. — 5. M laghu ca âgacchesi esho haṁ i° B °cchesi e°.

7. M °vaḥ padmâvati ° yena maṁḍavyasya â ° tur maṇḍa° B °tur maṇḍavyasya apradâsi | . — 9. B imâṇi tato phalâni khâ° M °tâto phalâni khâ ° shisyâçra ° tasyaṁhaṁ°. — 10¹. BM °vo maṇḍa° M °shisyaita°. — 10³. M °vyena açvento imasyâ° B °aṇvataḥ imasyâ° M °prâptaḥ ‖ te ° ktâni padmâvatiye râjâ° B °rhâni mo° M °kâni naishâ ° lâphaleyâhi paribhuṁjayituṁ padmâvatiṁ ca râjakanyâṁ ‖ B °lâphale yâpayi ° vatiṁ ca râjakanyâ ya°.

14¹. M ye nûnâ°. — 14². M °vo maṁḍavyo ṛishi pamâvati ṛishiku°. — 15. M °padumâvati evaṁrûpâni phalâni bhavaṁti ko te jvaranasamayehi kâ°.

16. M °padmâva° BM °shi bha°. — 17. M °yeshâṁ imâ°. — 18¹. M °ti pita°. — 18². B °ço âçvâdo° M °ço âkhyâto tân padvaṁ pari ° rocaṁti ‖ . — 20¹. M °ṛishi padmâva°. — 20². M °padmâvati i° B °vati i° BM °si ko ca rûpo vâ(M °vo) so ṛi(B °ri)shi° M °mâri ka°

एवमुक्ते पदुमावती माण्डव्यं ऋषिमेतदुवाच ॥ सूक्ष्माजिनो तात ऋषिकुमारो दकतीरे स्याति [311a] मृगमभिरुह्य तेन मे इमानि फलानि दिन्नानि तस्य च तात आश्रमे एदृशानि फलानि ॥ अथ माण्डव्यो ऋषिः पदुमावतीये सार्धं येन राजा ब्रह्मदत्तस्तेनोपसंक्रमित्वा राजानं ब्रह्मदत्तं प्रतिसंमोदेत्वा पदुमावतीं राज्ञो ब्रह्मदत्तस्य उदकेन अदासि ॥ एषा ते महाराज भार्या भवतु महाराजस्य च एषा अनुरूपा मा च परस्य वचनेन अननुयुजित्वा विप्रियं कुर्यासि ॥

अथ राजा ब्रह्मदत्तो पदुमावतीं अश्वपृष्ठमारूपेत्वा माण्डव्यस्य ऋषिस्याभिवादनं कृत्वा तत्रैव अश्वपृष्ठे अभिरुहित्वा येन कंपिल्लं नगरं तेन प्रक्रमे ॥ अद्राचीद्राज्ञो ब्रह्मदत्तस्य बलाग्रं दूरत एवागच्छन्तं दृष्ट्वा च पुनर्येन राजा ब्रह्मदत्तो तेनोपसंक्रमे ॥ अथ राजा ब्रह्मदत्तो ततो अश्वपृष्ठतो ओतरित्वा पदुमावतीये ऋषिकुमारीये सार्धं हस्तिपृष्ठमभिरुहित्वा येन कंपिल्ले नगरे स्वकमुद्यानं तेन प्रयासि ॥ अश्रोषीत्पद्मावती कंपिल्ले नगरे महतो जनकायस्य निर्घोषं नगरं च कंपिल्लमद्राचीत् उद्विग्नप्राकारं अट्टालगोलकतोरणं रमणीयं च ॥ दृष्ट्वा च पुनः राजानं ब्रह्मदत्तमामन्त्रयसि । कस्य एतं वत वनविवरे निर्घोषो श्रुयति ऋषिणां एतं वनमृगाणां च उटजानि एतानि उद्विग्नानि दृश्यन्तीति ॥ अथ राजा ब्रह्मदत्तो पद्मावतीमेतदुवाच ॥ एतमृषिणां वनमृगाणां च निर्घोषो एतानि चास्माकं उटजानि उद्विग्नानि दृश्यन्तीति ॥ अथ राजा ब्रह्मदत्तो येन स्वकमुद्यानं तेनोपसंक्रमित्वा हस्तिपृष्ठातो प्रत्योरुहित्वा पदुमावतीये उद्यानं प्रवेशे ॥ अथ खलु राजा ब्रह्मदत्तो अमात्यपारिषद्यानामन्त्रयसि ॥ हो भणे ग्रामणिका क्षिप्रं पुरोहित-

1¹. M °padmâvati mâṁḍavyaṁ°. — 1². M sukshmo jino tâtaḥ ṛi° B sukshmâ° M °mâri uda°. — 3. M °shiḥ padmâvati ° detvâ padmâvatiṁ°. — 5. B eshân te mahârâja bhâ° M °tu mahârâjasya naishâ anurûpâ mâ re parasya vanena ananuyu°.

7. M °padmâvatiṁ ° shṭham âruhetvâ maṁḍavya° B °shṭham ârûyetvâ maṇḍa° BM °sya rishi° B °pṛishṭe abhi°. — 8. BM °d râjâ bra° M °durato evâ ° punaḥ ye ° dattas teno°. — 10. M atha khalu râ ° tto tataḥ açva° B °çvapṛishṭâto o° M °ottaritvâ padmâva° B °stipṛishṭam abhi° BM °yena kaṁpillaṁ nagaraṁ sva°.

12. M °shita padmâva ° kshid udvi° BM °aṭṭalagola(M °gora)kato ° yaṁ ca dṛi°. — 13. M °puna râjâ ° ttam âmaṁtra° B °yasi ka°. — 14. M kasyetaṁ° BM °bhavanaṁ vanavi° B °shiṇâ etaṁ vanamṛi° M °ṇaṁ evaṁ canamṛi° BM °gânâṁ udayâ(B °pâ)ni etâ°. — 15. M °dmâvatiyam e°.

16. M °m ṛishiṇâṁ° B °kaṁ udapâni udvi° M °kaṁ udayâni udvṛiddhâni dṛiçyaṁtiti | . — 17. B °pṛishṭâto pratyâru° M °pratyâruhitvâ padmâvatî ° prâviçet ‖ B °praviça ‖ . — 18. M °shadyânâṁ âmantra°. — 19. M ho maṇe grâmanikâ kshi° B °kshipra puro° M °netha | padmâvatî ° strâni câbharaṇâni ca yâvac ca râjakulaṁ yâvac ca udyâ° B °dyânaṁ na taṁ atrâ° M °raṁ sarva alaṁkâraṁ kâ° B °laṁkârâpetha | vitatavitâ° M °naṁ vicitra ° oçaktapaṭṭa ° paṁ bhûpitadhûpanaṁ osiktasaṁpṛishṭhaṁ mu° B °paṁ

मानेथ पदुमावतीये वस्त्राणि चाभरणानि च याव च राजकुलं याव च उद्यानं तमचान्तरं सर्वं अलंकारापेथ वितततिवानं चित्रपुष्पपरिक्षिप्तं ओसक्तपट्टदामकलापं धूपनधूपितं सिक्तसंमृष्टं मुक्तपुष्पावकीर्णं देशेदेशेहि नटनर्तकच्छल्लमल्लकपाणिस्वर्यशोभिकद्विस्त्वलकवेलम्बकनट्टधराणि उपस्थपेथ ॥

मनसा देवानां वचसा पार्थिवानां
नचिरेणाढ्यानां कर्मणा दरिद्राणामिति

वचनमात्रेण राज्ञो अमात्येहि यथा[311b]ज्ञप्तं सर्वं पटिजागृतं ॥ अथ पदुमावती राजानं ब्रह्मदत्तमेतदवोचत् ॥ कहिं ते भगवं शरणं समिधा वा उण्होदकं कमण्डलु वा समयो वा मे अग्निहोत्रं जुहनाय ॥ अथ राजा ब्रह्मदत्तो पदुमावतीमाह ॥ आगमेहि मुहूर्तं सार्धं ते सूक्ष्माणि अजिनानि आनीयन्ति ततः गंगायां स्नात्वा सहिता अग्निं जुहिष्यामः ॥ अथ राज्ञो अमात्यपारिषद्या तत्क्षणं तन्मुहूर्तं अन्तःपुरं तमुद्यानं आनयेन्सुः पदुमावतीये वस्त्राणि चाभरणानि चानयेन्सु ब्राह्मणं च पुरोहितं राजाचार्यं आनयेन्सु श्रेष्ठिप्रमुखो च निगमो पि निर्यासि सार्थवाहप्रमुखो वणिजग्रामो निर्यासि सर्वाणि चाष्टादश श्रेणी निर्यान्सुः ॥

अद्राचीद्राज्ञो अमात्या पारिषद्या नैगममहत्तरका च ब्राह्मणा च पुरोहितो च राजाचार्यो ब्रह्मदत्तस्य देवीं पदुमावतीं सर्वालंकारविभूषितां प्रासादिकां दर्शनीयां परमवर्णपुष्कलतया समन्वागतां । राज्ञा ब्रह्मदत्तेन सार्धं अग्निप्रदक्षिणीं करोति । यत्र यत्र च क्रमाणि निक्षिपति तत्र तत्र पद्मानि प्रादुर्भवन्ति प्रासादिकानि दर्शनीयानि । दृष्ट्वा च हृष्टा तुष्टा हर्षसंजाता राजानं ब्रह्मदत्तमामन्त्रयेन्सुः ॥ नास्माभिः महाराज कदाचित्कस्यचिदेदृशी ऋद्धी दृष्टा वा श्रुता वा

dhâpanaṁdhûpitaṁ osaktasaṁsṛishṭaṁ° M °rṇaṁ deçedohi ca° BM °ṛillamallakṛipâṇisvaryâṁço° B °bhirudvi° M °bhitaüdvṛiddhastvalakakevalaṁbanaṭṭadharâṇi upathapetha | .

6. M °rmaṇâṁ dari ° thânantaṁ sa° B °sarva pa° BM °ṭiyâkṛitaṁ ‖ . — 7². M °padmâvaṭiye râ°. — 8. M karhi te bhavâṁ ça° B °gavâṁ ça° BM °unmodakaṁ° M °kamaṁḍalu vâ samaya vâ me° B °samaye vâ me°. — 9. M °padmâva°. — 10. M apâme °rddhaṁ te sukshmâni aji° B °kshmâni aji ° niyanti | ta° M °niyaṁti tato gaṁ ° shyâmi ‖ .

11. M atha râjâ amâtya° B °tyasya pâri° M °hûrtta a° B °naṁ ânayetsuḥ padu° M °naṁ ânayetsuḥ | padmâvati° B °ṇâni cânayetsu brâ° M °ṇâni cânayetsuḥ brâhmaṇapurohitaṁ ca râjâcâryaṁ ânayetsuḥ çreshṭhipramukhâ ca nigamchi niryâsi sâ° B °ryaṁ ânayetsu çreshṭipramukho ca nigamo bhiniryâsi sâ° BM °mukhâ vaṇi° B °câshṭhâdaça çreṇi niryâmsuḥ | . — 15. M °rohitâ câ râjâcâryye bra ° devi padu ° laṁkârabhûshitaṁ prâjâdi ° niyaṁ paramaçubhavaryâpushkaratayâ sa° B °nvâgato | .

17. M râjâ bra°. — 18. BM yatra yatra caṁkra° B °mâni nikshi° M °rbhavaṁti prâ°. — 19. BM °hṛishṭâ ca tu° M °dattaṁ âmaṁtrayetsuḥ B °yetsuḥ nâ°. — 20. M °smâbhir

IMPRIMERIE NATIONALE.

यथा इमस्या पदुमावतीये देवीये । साधु महाराज पदुमावती देवी पादेहि राजकुलं प्रवेशियतु ततो महाजनकायो देवीये इमां एवरूपां ऋद्धिं दृष्ट्वा प्रीता भवेन्सुः ॥ अथ राजा ब्रह्मदत्तो सान्तःपुरः पदुमावतीये देवीये सार्धं अमात्यपारिषद्यपुरस्कृतो महता जनकायेन सार्धं महता राजऋद्धीये महता राजानुभावेन उद्यानातो राजकुलं प्रवेशि ॥ अद्राक्षीत्सो जनकायो यावच्च उद्यानं यावच्च राजकुलं पदुमावतीये पदवीतिहाराणां उभयतो पदुमानि प्रासादिकानि दर्शनीयानि ॥ दृष्ट्वा पुनः महाजनकायो उद्यानं उद्यानेसि ॥ कृतपुण्णो महाराजा ब्रह्मदत्तो यस्य इममेवंरूपं स्त्रीरत्नं प्रादुर्भूतं ॥ अथ राजा पदुमावतीये सार्धं उपरिप्रासादवरगतो पंचहि कामगुणेहि समर्पितो समङ्गीभूतः क्रीडति रमति प्रविचारयति पदुमावतीं च देवीं म[312a]देहि अचेहि च गीतवाद्येहि च ग्रेखेति तावदन्या देवीयो न समन्वाहरति पदुमावतीये प्रमत्तो । पदुमावती च राज्ञा ब्रह्मदत्तेन सार्धं संवसन्ती आपन्नसत्वा संजाता ॥

यत्र काले देवीप्रजननवेला ततः राज्ञा ब्रह्मदत्तेन या अन्तःपुरिकायो कुशलायो स्त्रीधर्माणं ता आणत्ता पदुमावतीमुन्नेथ । राजा च हिरण्यसुवर्णं अग्रतो कृत्वा नानाप्रकाराणि च वस्त्राणि निषण्णो ये मे निवेदयिष्यन्ति चेमेण पदुमावती प्रजाता ति तेषां आक्षादं दास्यामि ॥ तासां पि देवीनामेतद्भूषि ॥ यदुपादाय पदुमावती आनीता तदुपादाय अस्माकं राजा न समन्वाहरति । अत्र एषा प्रजायमानी अस्माभि अनयव्यसनमापादयितव्यं ॥ ता दानि तां पदुमावतीं

mahâ° B °d edṛiçâni riddhi dṛishṭvâ vâ çru° M °ṛiddhiṁ dṛishṭvâ vâ çrutvâ ya° B °imasya pa° M °imasya padmâvatiye devime B °viye sâ°.

1. M °hi râjakule praveçatu ‖ tadâ ma° B °mahâṁ janakâ° M ° imâṁm evarupâ tam ṛiddhiṁ° B °pâṁ riddhiṁ dṛi° BM °vetsuḥ ‖ . — 3. M °ntaḥpuro padu ° shadyâpuraskṛito mahato janakâ ° pradesi ‖ . — 5. M °yo yâvacca râjakulaṁ yâvacca udyânaṁ padmâvatî ° vithihârâ° BM °to padumâvatî prâsâdikâṁ darçaniyâṁ dṛi°.

7¹. M °kâya udânaṁ°. — 7². M °m evarûpaṁ°. — 8. M °jâ padmâvatiye sârddham upari ° guṇe samarpi° B °rpito samaṅgâbhû° M °kriḍito ramati pravi° B °kriḍanti ramanti pravi° BM °yati padmâ(B °dumâ)vatî ca devi ca adchi akshe ° çekhoti(M °çesheti) tâvadedya devi yena samâha° M °ti ‖ padmâva° BM °tto pa°.

11. M padmâvatiṁ ca° B °rddhaṁ samvasanti â° M °vasanti â ° jâtâḥ B °jâtâ ya°. — 13. BM yatra kâlaṁ devi prajânavelâ° M °tato râjño bra° B °ttena yo a° M °nâṁ nânâgatâ padmâvatîm unnathâ B °tha râ°. — 14. B râjâ va hi ° suvarṇṇa agra° M °sharṇṇâye me° BM °yishyati | kshe° M °ṇa padmâvatî prajânâni te° B °prajânâti te°.

16¹. B °bhûshi pu°. — 16². B pudupâdâya asmâ° M yad upâya pâdumâvati â ° râjânaṁ sa°. — 17. M °smâbhir anaya° B °yitavya | C °yitavyâ | . — 18. BM te dâ° M °rikânâṁ padmâvatiṁ pricchanti jâ° B °pricchati jâ°.

पृच्छन्ति ॥ जानसि कथं स्त्रियो प्रजायन्तीति ॥ सा दानि आह ॥ न जानामीति ॥ ता दानि अन्तःपुरिका आहंसुः ॥ स्त्रीये प्रजायमानीये अचीणि पट्टकेन बध्यन्ति ॥ सा दानि आह ॥ मह्यं पि प्रजायमानीये अचीणि पट्टकेन बन्धेथ ॥ तस्या दानि यं वेलं प्रजायिष्यतीति ततो अस्या अचीणि पट्टकेन बद्धानि ॥ सा दानि द्वौ दारकौ प्रजाता प्रासादिका दर्शनीया ॥ तासां दानि एतद्भूषि ॥ अपुत्रा तावेयं देवी राज्ञो ब्रह्मदत्तस्य दृष्टा च बहुमता च आसि किं पुनः सपुत्रा अपुत्रस्मिं राजकुलस्मिं । इमायै द्वौ दारका जाता ततो अधिमात्रं राज्ञो ब्रह्मदत्तस्य प्रिया भविष्यतीति वयं च न समन्वाहरिष्यति ॥ ताहि दानि अन्तःपुरिकाहि ते दारका तपनस्मिं चैलकं उपस्तरित्वा तत्र प्रक्षिप्ताः ॥ तं तपनं स्वपिहितं सुबद्धं कृत्वा राजक्वेन तापनीयेन तापयित्वा मुद्रयित्वा नदीये गंगाये प्रक्षिप्ता । पदुमावतीये च स्वकेन गर्भमलेन मुखं म्रक्षितं ॥ सा दानि पदुमावती अन्तःपुरिकां पृच्छति किं मे जातन्ति ॥ ताहि पि अन्तःपुरिकाहि दुवे उल्बकानि गर्भमलेन प्रम्रक्षयित्वा पदुमावतीये अङ्गीपितानि ॥ इमानि प्रजातासि ॥ सा दानि आह ॥ मुञ्चथ एतानि किं एतेषां करिष्यामीति ॥ राजा दानि ब्रह्मदत्तो पृच्छति ॥ किं देवी प्रजाता ति ॥ ता आहंसुः ॥ महाराज दुवे दारका प्रजाता प्रासादिका दर्शनीया ते [312b] च नं जातमात्रा ताये खादिता । कुतो महाराज ब्रह्मचारिस्य ऋषिस्य अपत्यन्ति पिशाची एषा त्वया आनीता त्वं दिष्ट्या जीवन्तो मुत्तो ॥ ताये पिशाचिनीये मूलातो आगच्छ पश्चाहि तां यदि अस्माकं न श्रद्धासि ॥ सो दानि तां देवीं पश्चनाय प्रविष्टो पश्यति च पदुमावतीं

1¹. B °si | ka° M °thaṁ striyo prajânaṁti ‖ . — 2¹. B te dâ° M °antâḥpurikâ âhansuh strî°. — 2². M °kshiṇi pa ° dhyati. — 3². M °akshiṇi pa° B °kena baṁdhetha | . — 4. B tasya dâni iyaṁ ve° M tasya dâni yaṁ° B °titi | tato asya akshiṇi pa° M tato 'sya akshiṇi pa°. — 5¹. M °jâtâḥ prâ° BM °niyâ tâ°. — 5². B tâsâṁ dârikâni e ° shi a°.

6. M aputro tâva yaṁ ° sya dṛishṭâ° BM °bahûmatâ ° saputro aputresmiṁ râja° BM °kulesmiṁ i°. — 7. B °dârikâ jâtâ | tato adhimâ° M °dârakau jâtâs tano adhimâ ° priyo bha° B °titi | va°. — 8. B °dârakâ tapaneshu cai° M °dâraka tapeshu cailakaṁim upatvaritâ te dârakâ tatra° B °upatvaritvâ te dârakâ tatra°. — 9. M °kyena tâpasiyena dâpayitvâ mu° B °dipe gaṁ° M °kshiptâḥ taṁ°.

11¹. M pâdmâva ° rbhamale mu° BM °khaṁ prakshitaṁ | . — 11². M °padmâva ° jânaṁ ti | . — 12. M °kâhi iva uddhânakâ ga° B °uddhârinakâ ga° M °lena praçrakshapitvâ padmâva° B °allipitâni | . — 14². BM muhyatha° M °ni kim ete° B °ete ka°. — 14³. B °cchati kiṁ°. — 15¹. M devi° B °jâtâni ‖ . — 15². M °âhansuḥ | . — 15³. M °ja ive dâ ° prajâtâḥ prâ° BM °yâ tena taṁ jâta° B °mâtroye khâdito ku° M °mâtraṁ ye khâ°.

17. M °apatyaṁ ti pi ° esho tva° B °shâ | tva° M °nîtâḥ tâṁ dṛishṭvâsi° B °nîtâ tâ dṛishṭyâsi° BM °kto tâ°. — 18. B °çâcini ° hi taṁ ya° M °hi ‖ taṁ ya°. — 19. M °vîṁ praçya ° vati ru° B °dhiraprakshi°.

ऋधिरम्रक्षितेन यादृशी राक्षसी ॥ सो दानि तान्दृष्ट्वा भीतो संजातो ॥ अमात्यानामाह ॥ गच्छथ तां घातापेथ मानुषिका ति कृत्वा एषा मयानीता यदि एषा पिशाचिनी वा राक्षसी वा न मे ताये कार्यं ॥ सा दानि ततो राजकुलातो निष्कासिता ॥

सा दानि तेषाममात्यानां पृच्छति ॥ कहिं मे नयिष्यथ ॥ ते आहन्सुः ॥ राज्ञासि ब्रह्मदत्तेन वध्या ओसृष्टा ॥ सा दानि तेषां अमात्यानां पृच्छति ॥ किं मये राज्ञो ब्रह्मदत्तस्य अपराद्धं येनाहं वध्या ओसृष्टा ॥ ते अमात्या आहन्सुः ॥ त्वया द्वे दारका जनित्वा खादिता ततो राज्ञा पिशाचिनीति कृत्वा वध्या ओसृष्टा ॥ सा आह ॥ न मे दारका जाता पृच्छामि अन्तःपुरिकां ता आहन्सुः द्वे ते उल्वका जाता ते पि तत्रैव मेक्षिता नैव दारकानि पश्यामि नैव खादामि ॥ ते दानि अमात्याः पण्डिता स्त्रीमायानां ज्ञात्यानां चाभिज्ञाः ॥ तेषामेतदभूषि ॥ इयं पदुमावती राज्ञो ब्रह्मदत्तस्य इष्टा च बहुमता च स्थानं विदति यं एताहि अन्तःपुरिकाहि एषा पदुमावती अजानमानी खलीकृता भवेय विप्रलब्धा वा ॥ ते दानि अमात्या तां पदुमावतीं पृच्छन्ति ॥ कथं सि प्रजाता ति ॥ सा दानि तेषां अमात्यानां तां प्रकृतिं विस्तरेण आचिक्षति ॥ ताहि मे अन्तःपुरिकाहि प्रजायमानीये अचीणि पट्टकेन बद्धानि नैव दारकान्पश्यामि नैव खादामि । यं कालं च प्रजाता ततो पृच्छामि तानि अन्तःपुरिकानि किं मे जातं ति ताहि दानि मम द्वे उल्वका अक्षीपिता ते जाता ति ॥ तेषां दानि अमात्यानामेतदभूषि ॥ इयं देवी अन्तःपुरिकाहि ईर्ष्याप्रकृतेन विप्रलब्धा इयं च देवी ब्रह्मदत्तस्य इष्टा च बहुमता च मा पश्चाद्राजा ब्रह्मदत्तो

1¹. M °ni tâm̃ dṛishṭvâ°. — 1². B amâtyenâ° M °tyâ âha ‖ . — 2. B gacchatha tam̃ ghâtâyetha mâ° M gacchatha tam̃ ghâṭâyetha mâ° BM °nushikâni kṛi° M °tvâ ekâ mayâ nîtâ | yadi yeshâ pi ° me tâya kâryyam̃ ‖ . — 3. M °shkâsinâ ‖ B °shkâçitâ sâ°. — 5¹. M °teshâm̃ amâ° B °shâm asmâkam̃ amâ° BM °ti ka°. — 5². M °hiṁ te me na°. — 5³. M °âhamsuḥ ‖ .

6¹. BM °na vadhvâ o° M °sṛishṭâḥ | . — 6². B °amâtyaamâtyâ ° ti kim̃°. — 7¹. B °aparaddham̃ | ye° M °aparâdham̃ ye° BM °vadhvâ o°. — 8. M tvayâ ive dâ°. — 9¹. B °ha na°. — 9². M °cchâmi ‖ am̃taḥpurikâ te â° B °kâm̃ | te â° M °nsuḥ ‖ dave te uddharikâ jâ° B °dudve te udvanikâ jâ° BM °mellitvâ naiva dâ° M °naivam̃ khâ° B °khâdâmi te°.

11. M °amâtyâ pam̃ḍitâ strî ° çâkyânâm̃ câ° B °câthyânâm̃ câ° M °jñâs teshâ°. — 12¹ B °shi iyam̃°. — 12². B °sthâna vidya° M °dyati ‖ yam etâni antaḥ° B °etâni antaḥ°. — 14. M °tyâ nâm̃ padmâva° BM °cchati ka°. — 15². BM °nâm̃ tân prakṛi°.

15. M °akshiṇi pa ° naivam̃ dârakâm̃ paçyâmi naiva ravâdâmi | B °dârikân pa°. — 17. M °mi tâni am̃taḥpu ° ve uddhânakâ ullayitâ te jânâti te° B °ve udvânakâ ullapitâ | te jânâti te°. — 19³. B °hi irshyâ° M °sya dṛishṭâ° BM °çokena ca glainânyam̃°.

द्वीये पद्मावतीये अत्ययेन विप्रतिसारी भवेय शोकेन च ग्लैलान्यं पतेय ॥ तेहि [3 1 3°] दानि अमात्येहि सा देवी पदुमावती स्वके गृहे गोपिता राज्ञो ब्रह्मदत्तस्य निवेदितं घातिता देवीति ॥ ता दानि देवीयो घातिता पदुमावतीति श्रुत्वा तस्य राज्ञो ब्रह्मदत्तस्य चटुलायन्ति घृतं च परिक्षिपन्ति सर्षपाणि च अग्नौ प्रक्षिपन्ति चतुर्दिशं च बलिं निष्कासयन्ति शान्तिं च करोन्ति दिष्ट्यासि महाराज जीवन्तो मुक्तो राक्षसीहस्तातो ॥ तं मुहूर्तं राजा स्नातो विलिप्तो निष्पुरुषेण नाटकेन प्रक्रीडितो । तावदन्तःपुरिकायो काचिद्वीणां प्रवादिता काचित्सुघोषकं काचित्मृदंगं काचिद्वेणुं काचित्प्रणृत्यन्ति काचिन्नायन्ति ॥

अथ खलु भिक्षवो अन्यतरा देवता माण्डव्यस्य ऋषिस्य अभिप्रसन्ना वैहायसमन्तरीक्षे स्थित्वा राजानं ब्रह्मदत्तमेतदुवाच ॥ दुःश्रुतन्ते महाराज अपरिज्ञातं ते महाराज अविज्ञातन्ते महाराज यो त्वमनानुयुंजित्वा अपर्यवगाहित्वा अनपराधीं पदुमावतीं वध्यामवसिरसि तादृशस्य महाभागस्य ऋषिस्य वचनं न समनुस्मरसि ॥ अथ राज्ञो ब्रह्मदत्तस्यान्तःपुरिका देवताये अन्तरीक्षगताये तं घोषं श्रुत्वा सुष्ठुतरं गायन्ति वादेन्ति च यथा राजा ब्रह्मदत्तो एताये देवताये जल्पन्तीये न श्रुणेयाति ॥ अथ राजा ब्रह्मदत्तो अन्तःपुरिकां निष्क्षेपेति आगमेथ तावद्यावज्जानाम किमेषा देवता अन्तरीक्षगता जल्पतीति ॥ ता दानि अन्तःपुरिका राज्ञो वचनेन तूष्णीभूता संजाता देवता राज्ञो ब्रह्मदत्तस्याह ॥ दुःश्रुतन्ते महाराज यो त्वमनानुयुंजित्वा अपर्यवगाहित्वा अनपराधीं पदुमावतीं देवीं वध्यां ओसिरेसि तादृशस्य महाभागस्य ऋषिस्य संदेशं न समनुस्मरसि ॥ राजा दानि

1. B °tam̃ yohitâ deviti | M °tam̃ yohitâm̃ deviti | . — 3. M °ghâṭitâ padmâva ° sya catilâpeti ghṛi° B °sya catillâpeti ghṛi° M °parikshipam̃ sarshapâni ca agnau prakshipem̃ti catu ° shkâsayam̃ti ‖ dṛishṭvâsi mahâ° B °çânti ca karoti dṛishṭvâsi mahâ° BM °kshasito ha° B °stâto tam̃°.

6. M muhûrta râ° B °vilupto° BM °nihpurusheṇa ° dito tâ°. — 7. B °kam̃ | kâcit mṛi° M °gam̃ kâci durdaram̃ kâcid ve° B °ṇum̃ kâcin pra ° kâcit gâyanti ‖ M °tyam̃ti kâcit gâyanti ‖ . — 9. BM °tâ maṇḍa° M °sthitvâ râ°. — 10. B duçruta° M duçrutam̃ me mahârâja aparijñâtan te mahârâja avijñâtam̃ te mahârâja yo tvam̃ ananu° B °tam̃ te mahârâja abhijñâtan te mahârâja yo tvam̃m ananu° BM °hetvâ anaparâdhim̃ padumâ(M °dmâ)vatim̃ vadhyâ° B °smarati | .

13. M °ttasyâm̃taḥpurikâye de° B °purikâ de° M °rikshe ga° B °sushṭutaram̃° M °gâyam̃ti vâdyenti ca yathâ ° tto ye tâye de°. — 15. M °purikâ nistha ° kim eshya de° B °kshagato ja° M °lpantîti ‖ .

16. B °nena tushṇi° M °jâtâḥ de ° syâhuḥ ‖ . — 17. B duçruta° M duçrutam̃ te mahâ ° yo svam̃ amanu° B °yo tvam̃ amanu° M °hitvâ anaparâdhim̃ padmâvatim̃ devim̃ vadhyâ josiresi ‖ tâ°. — 19. M °kâye pṛi°.

ब्रह्मदत्तो ताये देवताये श्रुत्वा अन्तःपुरिकायो पृच्छति ॥ सत्यं जल्पथ किन्ते दानि दारका ये पदुमावतीये जाताः ॥ ता दानि अन्तःपुरिकायो राज्ञा ब्रह्मदत्तेन पृच्छियमानीयो वा पश्यन्ति ॥ पदुमावती राजाणत्तीये घातिता प्रभवति राजा अस्माकं पि परित्थजितुं आचिचाम नं सत्यं यथाभूतं ति ॥ ता दानि अन्तःपुरिका आहन्सुः ॥ महाराज पदु[313b]मावतीये दुवे दारका जाता ते चास्माभिः तपनाये प्रचिपित्वा राजक्वाये मुद्राये मुद्रेत्वा सतपना नदीये गंगाये प्रवाहिता नापि तयापि दृष्टा नापि खायिता पि ॥ तस्य दानि राज्ञो ब्रह्मदत्तस्य दौर्मनस्यं उत्पन्नं ॥ अनपराधी तादृशी स्त्रीरत्नं मया घातापितं तादृशस्य च महाभागस्य ऋषिस्य मया संदेशं न कृतं पुत्रा लभ्यन्ता च परिभ्रष्टा ति ॥

सापि दानि मंजूषा नदीये गंगाये वुह्यन्ती कैवर्तकेहि मत्स्यान्बन्धन्तेहि उत्त्विप्ता ॥ ते दानि केवट्टा तां मंजूषां पश्यन्ति राजक्वाये मुद्राये मुद्रितां ॥ तेषां केवट्टानामेतदभूषि ॥ मा हैव चोरेहि राजकुले अपराद्धं ततो इमा मंजूषा प्रष्टा भविष्यति सर्वज्ञ गुह्यं प्रकाशीभवति गच्छाम इमां मंजूषां राज्ञो ब्रह्मदत्तस्य उपनामेम मा वयं चौरा ति कृत्वा ज्येष्ठेन दण्डेन शासीयेम ॥ ते दानि तां मंजूषामादाय राज्ञो ब्रह्मदत्तस्य उपसंक्रान्ता महाराज अस्माभिर्नद्यां गंगायां मत्स्यान्बन्धन्तेहि इयं मंजषा उदकेन वुह्यन्ती उत्त्विप्ता राजमुद्राये मुद्रिता तां देवो प्रत्यवेचतु ॥ अथ खलु भिक्षवो राजा ब्रह्मदत्तो अमात्यपारिषद्यानामन्त्रयति ॥ हो भणे

1. M °tha kiṁ te dârakâ ye padmâva° BM °jâtâḥ tâ°. — 2. M °kâyo râjâ bra° BM °ttena pṛicchati pṛicchi ° niyo vo paçyaṁti B °niyo vo paçyanti | . — 3. M paramâvati râjâ âṇantiye ghâṭitâ pra° B °jâṇantiye ghâ° BM °vati | râjâ a° M °kshâma taṁ na sa ° bhûtan ti ‖ B °taṁ ti tâ°. — 5. M °jâtâḥ te smâbhi tapanâye pra° BM °kyâ(B °kye)ye mudrâ(B °dre)ye mudre(M °dri)tvâ sâ tapanâ nadi ° hitâ nâpi tenâpi dṛishṭvâ nâpi khâ°.

7. M tasyâ dâ ° daumanasyam utpa°. — 8. M °ghâṭâyitaṁ ‖ tâdṛi° BM °deçaṁ kṛitaṁ | putra labhyanto ca paribhrashṭo ti | . — 10. M °maṁjushâ ° hyanti ‖ kaivartte dvimatsyâ° BM °matsyâ bandhanehi nadiye gaṁgâye vuhyanti prakshipto | .

11¹. M °ni kaivartakâ taṁ maṁjushaṁ paçyaṁti râ° B °kevaṭṭa taṁ maṁjûshaṁ pa° M °drâca mudritaṁ | B °dritaṁ | . — 11². M °shâṁ kaivarttânâṁ e° B °kevaṭṭânâṁ ° shi mâ°. — 12. M mâ haivaṁ co° B °haiva câre ° le aparârddhaṁ ta° M °le aparaddhaṁ ‖ ta° BM °to imaṁ maṁjushâ(B °sho) prashṭâ(M °shṭhâ) bhavi° M °shyati ‖ sarve ca gu ° cchâma ‖ imaṁ maṁjushaṁ râjño° B °cchâma imaṁ maṁjûshaṁ râjño° M °mema ‖ sâ vayaṁ caure ti kṛi° B °jyeshṭena da° M °shṭhena daṁḍena çâ°. — 14. BM °ni taṁ maṁjû(M °ju)sham â° B °saṁkrâmantâ° M °saṁkrâṁtâ mahâ ° yâṁ matsyabandha° B °yâṁ matsyâ bandhantchi | i° M °yaṁ maṁjushâ° B °kena muhya° M °vuhyaṁti utkshi° BM °drâyâṁ mudritâ taṁ de° B °vekshitu ‖ .

17¹. M °dartto amâtyâ pârshadyâ ° yasi ‖ . — 17². BM °tha | ki° M °maṁjushâyan ti ‖ B °yaṁ ti sâ°.

जानथ किमत्र मंजूषायं ति ॥ सा दानि मंजूषा अमात्येहि मुक्ता पश्यन्ति च तानि पदुमावतीये दुवे दारका प्रासादिका दर्शनीया ॥ ते आहंसुः ॥ महाराज इमहिं मंजूषायां दुवे दारका प्रासादिका दर्शनीया पदुमावतीये पुत्राणि महाराजस्य सदृशानि । अनपराधी महाराज पदुमावती देवी देवेन अननुयुंजित्वा अपर्यवगाहित्वा वध्या आसृष्टा ॥ अथ राजा ब्रह्मदत्तो तानि दारकानि दृष्ट्वा पदुमावतीये च बह्वनि गुणगणानि समनुस्मरन्तो मूर्छित्वा भूम्यां पतितो हं स्त्रीरत्नातो भ्रष्टो ॥ अथ तेषाममात्यानामेतदभूषि ॥ मा हैव राज्ञो देवीये उत्कण्ठन्तस्य किंचिदेव शरीरस्याबाधं भवेय ॥ ते दानि आहन्सुः ॥ महाराज मा पदुमावतीये कारणेन उत्कण्ठेहि अस्माभिरेवं देवार्थं उपलभित्वा साहसं न कृतं देवी स्थापिता न घातिता अनागतं अर्थपदं ज्ञात्वा ॥ सो दानि राजा ब्रह्मदत्तो एतम[314a]मात्यानां वचनं श्रुत्वा प्रह्लादितो संजातः ॥ अमात्यानाह ॥ कहिं पदुमावतीति ॥ अमात्या आहंसुः ॥ अमुत्र गेहे ति ॥ राजा दानि तत्र देवीये पदुमावतीये सकाशं गतो ॥ गत्वा राजा पदुमावतीं देवीं बहुप्रकारं संज्ञापेति दिष्ट्यासि देवि तादृशातो व्यसनातो व मुक्ता दिष्ट्यासि मया च पुत्रेहि च समंगीभूता । सपत्नीहि सि च नं घातापिता किन्ते अभिप्रायं किन्तेषां तव अमित्राणां दापयामि कीदृशं वा व्यसनं निगच्छन्तु श्रेयं भवे यदि राजाणत्या सर्वावन्ता निगडबद्धा शाणशाटकनिवस्त्रा अटनं परिचरन्तु ॥ अथ खलु भिक्षवो पदुमावती देवी रुदमानी राजानं ब्रह्मदत्तमेतदुवाच ॥ मा महाराज तासां देवीनां किंचिद्विप्रियं करोहि ॥ एता ज्येष्ठायो अहं कनीयसा या च एतेषां

1. M °maṁjushâ a° B °jûsho a° M °mukto paçyaṁti ca° B °nti | ca° M °ni padmâvatiye ive° B °rçanâ te°. — 2². BM °imaṁhi maṁjû(M °ju)shâyâṁ(M °yaṁ) du° M °yâ padmâva ° sya edṛi°. — 4. B anuparâdhiṁ ma° M °ja padmâva ° nurujyitvâ aparyye° B °vaddhyâ o°. — 5. M °shṭvâ padmâva° BM °gaṇâni ca sa° B °nto | mû ° bhrashṭâ ‖ .

7¹. M °teshâṁ amâ° B °teshâṁm amâ°. — 7². M °utkaṁṭhasya kiṁ° BM °cid devasya çari° M °bâḍhaṁ bha° BM °veyaṁ ‖ . — 8¹. B tâ dâ°. — 8². M °ja padmâva° B °ja mo padu° M °labhisvâ sâ° B °pitâ na dyâtitâ anâ° M °ghâṭitâ ‖ anâ°. — 10. B sâ dâ ° ditâ saṁ° M °jâto ‖ .

11. M °tyânâm â° B °tyâ âha ‖ . — 12¹. M °padmâva°. — 12². M °âhansuḥ ‖ . — 12³. BM °he ti râ°. — 12⁴. BM râjâ(B °jâḥ) dâni(M °ni) ta° M °padmâva° B °to ga°. — 13. M °padmâva° B °jñâyeti dṛishṭyâ° M °peti dṛishṭvâsi ‖ devi ° ktâ dṛishṭvâ ca mayâ° B °ktâ dṛishṭyâ° M °samanvagibhûtâḥ sa° B °bhûtâ sa°. — 15. BM °tnihi seca(B °va)naṁ° B °ghâṭâyitâ kin te abhi° M °miyâṇâṁ° B °naṁ nirgacchatu çre° M °cchatu çreyaṁ° BM °bhave(B °va) yâda rajânaṁ tâ sarvâ vo kiṁ nigaḍabaddhâsana(M °sane) çâṭakanivastrâtana paricarantaḥ(M °nto) ‖ .

17. M °kshavaḥ padmâva ° damâni tâ kiṁ te râjâ°. — 19. BM etâṁ jyeshṭâ(M °shṭho)-

कल्पिता वृत्ती तां सानं अभिवर्धेहि मा परिहापेहि सर्वाणि च अनुवर्ताहि ॥ यथाकृतानां कर्मणां सत्वा विपाकमनुभवन्ति कालं कालमासाद्य यथा द्रुमाणां पुष्पफला ॥ मया एवं महाराज तानि कर्माणि कृतानि यदहं त्वया सत्कृता च मानिता च मया एवन्तानि कर्माणि कृतानि यदहं त्वया वध्या ओसृष्टा ॥ अथ राजा ब्रह्मदत्तो पदुमावतीं देवीमेतदुवाच ॥ मा देवि अश्रूणि प्रपातेहि सर्वन्ते राष्ट्रं निःसृजामि पुत्रेहि समंगीभूता अभिरमाहि चमाहि च मे एतं अपराधं ॥ अथ पद्मावती देवी राजानं ब्रह्मदत्तमेतदुवाच ॥ किं मे महाराज विजानन्तीये राज्ञेन पुत्रेण वा धनेन वा गंसामि अहं प्रव्रजित्वा पुनः तातस्य सकाशं ॥ उक्ताहं तातन को ते पदुमावति ज्वलनसमेहि कामेहि प्रलोभेति ते मे तातस्य वचना इदानीं परिदहन्ति यथाहं तातेन आश्रमपदे उक्ता यं तव महाराज मृगीव आश्रमातो पितुः सकाशातो अनपराधी वध्या ॥

अथ पदुमावती देवी पुनस्तापसी प्रव्रजित्वा धातुरक्तानि वस्त्राणि प्रावरित्वा माण्डव्यस्य ऋषिस्य आश्रमं आगमे ॥ माण्डव्यो च ऋषी कालगतो अभूषि । तृणकुटीपर्णकुटीनि विशीर्णानि अभूंसुः ॥ अथ पदुमावतीये देवीये एतदभूषि ॥ तादृशेन मे निर्बन्धेन विनाशावेती राजा ब्रह्मदत्तो प्रत्याख्यातः पितातो मे [314b] कालगतातो अयं परिभ्रष्टा ॥ यं नूनाहं भिक्षाचारं चरामि जनपदानि च राजधानीयो च अण्डन्ती ॥ अथ पदुमावती देवी ग्रामनिगमराजधानीषु अण्डन्ती वाराणसीं राज्ञो कृकिस्य नगरं गता ॥ अद्राक्षीद्वाराणसीयको काशिराजा

yo ahaṁ° M °karaṇiya° BM °sâ yaṁ ca ete° M °vṛitti taṁ mânaṁ° B °tti taṁ mânaṁ° BM °hâyehi sa ° rtâhi ya°.

2. M °bhavaṁti ‖ kâlaṁ kâ°. — 3. M °mânitâni ca ‖ mayâ evaṁ tâni ka°. — 4. M °padmâva°. — 5. M °devi açruṇi° B °açruṇi° M °râjyaṁ niḥ° BM °mâhi na me ekaṁ apa°.

7². BM °vijânitâye râ° M °ṇa bâṁdhavena mârgaṁisâ ° punas tâtasya sakâçam uktâ° B °naḥ tâstasya sakâçaṁ u°. — 8. BM °ko tena padumâti(M °mâvati) jva° M °samaychi kâ° BM °bheti | te° B °me tâṁtasya° BM °hanti ‖ yathâ ceyaṁ yathâhaṁ° B °ktâ yaṁ me mahâ° M °ktâ yan tena mahâ ° parâdhiṁ vadhyâ ‖ B °parâdhiṁ vadhyâṁ ‖ .

12. M atha padmâvatiṁ deviṁ pu° B °vatiṁ devi ° s tâpasiṁ pra° M °s tâpasiṁ pra° BM °ritvâ maṇḍa° M °shisyâçra° B °âgamaṁ | . — 13. BM maṇḍa° M °ṛishi kâ°. — 14¹. M triṇakuṭṭiparṇakuṭṭini vi° B °rṇṇakuṭi vi° M °abhûnsuḥ ‖ . — 14². M °padmâvati deviṁ eta° B °shi tâ°. — 15. M °me nibândhana nivasâvetau° B °ndhena nivasâvetau° M °khyâto pi° BM °lagato vayaṁ°.

16. BM °raṁ caranti ja ° râshṭradhânishu ca aṇvayanti(M °yati) ‖ . — 17. M °padmâva° B °marâshṭradhâ° M °marâshṭrarâjadhâ ° kritisya°. — 18. M °siko kâçirâjâ padmâvatiṁ deviṁ purâdanta° B °purâdanta° M °padmâva° BM °yaṁ taruṇyâye jâtirû° M °pushpâni phalâni prâ° B °tâni phalâni prasâdikâni prasâdâni° M °kâni prasâditâni mano° B °ehi anukânantaraṁtare abhi° M °mukânantaraṁ abhi° BM °shyâmi ‖ ·

पदुमावतीं देवीं पुरान्तरे दृष्ट्वा च पुनः काशिराजा पदुमावतों देवीं बज्रप्रकारं प्रलोभेति किं तव भद्रे प्रव्रज्यायं तरुणाये जातरूपाये अभिरूपाये इमानि पादपानि पुष्पितानि फुल्लानि प्रासादिकानि प्रसादनीयानि मनोरमकराणि एहि अमुककाननान्तरे अभिरमिष्याम ॥ एवमुक्ते पदुमावती तापसी काशिराजानमेतदुवाच ॥ अग्निं महाराज इच्छसि प्रवेष्टुं यं प्रव्रजिताये सार्धं इच्छसि रमितुं धर्मस्थिताय नाहं महाराज कामेषु अर्थिका ति ॥ काशिराजा आह ॥ यदि भद्रे न इच्छसि ततो बलसा ते ग्रहिष्यामि ॥ पदुमावती आह ॥ यदि बलसा मे गृह्णसि ततो ते तपसा अग्नीव शुष्कतृणं दहिष्यामि ॥ सो दानि राजा तं श्रुत्वा भीतो प्रत्यागतो च सा च इह राष्ट्रे यथासुखं यथाफासु ॥ अहं ते निमन्त्रेमि सर्वहितोपस्थानेन ॥

अथ ब्रह्मदत्तो राजा ब्राह्मणवेषेण काशिराज्ञो गृहं प्रविशित्वा अहं पि महाराज अचेहि कुशलो ति । सो पि राज्ञो देवीहि सार्धं क्रीडन्तस्य क्रीडते पदुमावतीं च सम्भाषति । केन क्रोधेन इहागता ॥ पदुमावती आह ॥ तव एव महाराज अपराधेन इहागता ॥ ततो काशिराजा संशयितो राजानं ब्रह्मदत्तं पृच्छति ॥ न मे कदाचिदृष्टापदस्य एतादृशी नीति श्रुतपूर्वा कस्त्वं का ते एषा ति ॥ राजा ब्रह्मदत्तो आह ॥ अहं ब्रह्मदत्तो पंचालराजा एषा मे पदुमावती भार्या इहागता ॥ एवमुक्ते काशिराजा ब्रह्मदत्तं राजानमेतदुवाच ॥ स्वागतन्ते महाराज अनुरागतन्ते महाराज नेहि देवीं अहं बलाग्रेण संविभज्य नेमि ॥ अथ राजा ब्रह्मदत्तो पंचालराजा पदुमावतीं देवीं वाराणसीतो चतुरंगेन बलकायेन सार्धं हस्तिपृष्ठे आरूपयित्वा महता राजानुभावेन महता राजऋद्धिये पुनः कंपिल्लं नगरं आनेसि ॥ पदुमावतीये च देवीये राज्ञा ब्रह्मदत्तेन ओसृष्टवध्याये व

4. M °padmâva°. — 5. B °shṭuṁ | yaṁ° M °sârddham iccha ° sthitâ | ye nâ° BM °rthikâ ni ‖ .

6². M °te gṛihîshyâmi ‖ . — 7¹. M padmâva° B padumâti°. — 7². BM °gṛihnasi (M °si ‖) tato ° ṇaṁ dehi°. — 8. B °pratyâyagato° BM °phâsu a°. — 9. B °haṁ | te°.

11. B °bradatto° M °çirâjo gṛihaṁ praveçitvâ° B °pravitvâ° M °hârâjâ akshehi kuçalehi tti | . — 12. B °sya kriḍato pa° M °sya kriḍako padmâvatiṁ ca saṁvâsaṁti ke° B °vatiṁ ca saṁvâsanti | . — 13². M padmâva°. — 13³. M °evaṁ ma°. — 14. M tataḥ kâ° B °cchati na°. — 15. M °shṭâpanâdhasya° BM °driçâni giti çru° B °s tvaṁ kânte e° M °te esho ti ‖ .

16². M °jâ eshâ me pañcâlarâjâ ‖ eshâ me padmâ° B °eshâṁ me°. — 17². B °devi a° M °haṁ ca balâgreṇas taṁ vi° BM °bhajânâmi ‖ .— 18. M °padmâvati de° B °vatidevîṁ vâlâṇa° M °turaṁgana ba ° prishṭha âruhitvâ° B °prishṭe ârupiyitvâ° M °riddhiyena kaṁpillanaga°.

21. BM padumâ(M °dmâ)vati ca devi râjño bra ° shṭâvadhyâye caṁkra° B °rhitâni âbhunsuḥ ‖ .

क्रमेषु तानि पदुमानि अन्तर्हितानि अभून्सुः । पुनश्च राज्ञा ब्रह्मदत्तेन वाराणसीतो कंपिल्लं आनीताये भूयो क्रमेषु पद्मानि प्रादुर्भूतानि ॥

भगवानाह ॥ न खलु भिक्षवो न्यो स माण्डव्यो ऋ[315a]षिरहमेव तदा माण्डव्यो ऋषिरभूवं ॥ न खलु भिक्षवो न्या पदुमावती देवी । एषैव यशोधरा तदा पदुमावती देवी अभूषि ॥ न खलु भिक्षवो न्यः स राजा ब्रह्मदत्तो भू । एष राजा शुद्धोदनस्तदा राजा ब्रह्मदत्तो अभूत् ॥ तदापि एतेन राज्ञा शुद्धोदनेन एषा यशोधरा अननुयुंजित्वा अपर्यवगाहित्वा वध्या ओसृष्टा । एतरहिं पि एषा एतेन राज्ञा शुद्धोदनेन अननुयुंजित्वा अपर्यवगाहित्वा अनपराधी वध्या ओसृष्टा ॥

पदुमावतीये परिकल्पो समाप्तो ॥

भिक्षू भगवन्तमाहन्सुः ॥ कस्य भगवं कर्मस्य विपाकेन पदुमावतीये क्रमेषु पद्मानि प्रादुर्भवन्ति यदा च राज्ञा ब्रह्मदत्तेन वध्या निसृष्टा ततो स्या तानि पदुमानि अन्तरहितानि भूयो च राज्ञा ब्रह्मदत्तेन वाराणसीतो कंपिल्लं आनीताये सन्तीये पुनरस्या क्रमेषु पद्मानि प्रादुर्भूतानि ॥ भगवानाह ॥ एतस्या एवेदं भिक्षवो पदुमावतीये कर्मणो विपाकं अभूषि येनास्या क्रमेषु पद्मानि प्रादुर्भूतानि अभून्सुः राज्ञा च ब्रह्मदत्तेन वधाये निसृष्टाये अन्तरहितानि भूयो च राज्ञा ब्रह्मदत्तेन वाराणसीतो कंपिल्लं आनीताये सन्तीये प्रादुर्भूतानि ॥

भूतपूर्वं भिक्षवो अतीतमध्वाने नगरे वाराणसीयं अपरस्य गृहपतिस्य प्रेषणकरी पद्मिनीतो उदकघटमादाय पद्मेन च हस्तगतेन वहिर्नगरातो अन्तोनगरं प्रवि-

1. M °ç ca râjâ bra° B °ânîtâye° M °nitâ ‖ ye bhûyo pakra ° dmâni bhû°. — 3². M °kshavo 'nyo ° m evaṁ tadâ° B °m evan tadâ° M °shir abhût. — 4¹. M °vo anyâ sâ padmâva°. — 4². B °râ tadâ tadâ pa° M °padmâva°. — 5. M °vo anyo so râ ° datta 'bhût ‖ B °bhû esha°.

6¹. M °ddhodana tadâ brahmadattarâjâbhût ‖ . — 6². M °pi etena râjñâ çu° B °pi râjâ ete° BM °gâhetvâ vadhyâ°. — 7. B °tena râjño çu° M °tena râjâ çu° B °nena anayuṁjyitvâ anaparâdhiṁ va° M °nusaṁji ° gâhetvâ anaparâdhiṁ va°. — 10. M iti çrîmahâvastuavadâne padmâva ° kalpaṁ samâptaṁ ‖ .

11¹. M bhikshur bhagavaṁtam evam âhatsu ‖ B °hatsuḥ ‖ . — 11². M °gavan karma ° kena padmâva ° rbhavati ‖ bhaga° (*l.* 14) B °nti | yadâ ° to sya tâni padumâni antarahitâhi bhûyo ca so râjñâ ° punar asya kra°. — 14². M °padmâva ° rmaṇâṁ vi° B °rmaṇâ vi° BM °shi | yenâsya kra ° nsuḥ ‖ râjño(B °jñâ ca) brahmadattena vadhyâye nisṛi-(M °dhyâtenotsṛi)shṭâye anta(M °aṁta)rahi° B °yo ca râjño bra° M °yo ca râjâ bra ° pillam ânîtâye saṁtîye prâ°.

18. M °sîye amukasya gṛi° B °ri predminito u° M °padmînî ° ṭam âniya padmena va hastajâtena cahiṁ nagarâto aṁtonagaraṁ° B °stagate ca vahi°.

श्चति ॥ अपरो च प्रत्येकबुद्धो वाराणसीये नगरे पिण्डाय चरित्वा वहिर्नगरं निर्धावति प्रासादिकेन ईर्यायथेन अभिक्रान्तेन प्रतिक्रान्तेन प्रासादिको अभिप्रसन्ना च देवमनुष्या ॥ तस्या दारिकाये प्रत्येकबुद्धं दृष्ट्वा चित्तप्रसादमुत्पन्नं । प्रसन्नचित्ताय तं पद्मं तस्य प्रत्येकबुद्धस्य दिन्नं । प्रत्येकबुद्धेनापि अनुग्रहार्थं प्रतिगृहीतं ॥ सा दानि दारिका तं पद्मं तस्य प्रत्येकबुद्धस्य हस्ते अतीव शोभमानं पश्यति स्वकं च हस्तं क्षीणितं पश्यति ॥ ताये दानि भूयो तस्य प्रत्येकबुद्धस्य सकाशातो तं पदुमं याचितं भगवं देहि मे तं भूयो पदुमं ति ॥ प्रत्येकबुद्धेन तं पदुमं भूयो तस्या दारिकाये दिन्नं हन्त भद्रे ति ॥ ताये पदुमं भूयो प्रत्येकबुद्धस्य [315b] हस्ततो गृहीतं ॥ सा दानि स्वकं च हस्तं पद्मेन शोभमानं पश्यति प्रत्येकबुद्धस्य हस्तं क्षीणितं पश्यति । ताये विप्रतिसारं संजातं । न शोभनं मया कृतं यं मे प्रसन्नचित्ताये एतस्य ऋषिस्य इमं पदुमं दत्त्वा पुनः आच्छिन्नं ॥ ताये दानि तं पदुमं भूयो तस्य प्रत्येकबुद्धस्य दिन्नं ॥ प्रतिगृह्णाहि मे भगवन्भूयः इमं पदुमं अनुकंपामुपादाय ॥ सो दानि पदुमो तस्या दारिकाये तेन प्रत्येकबुद्धेन पुनर्गृहीतं ॥

भगवानाह ॥ स्यात्खलु पुनर्भिक्षवो युष्माकमेवमस्यादन्या सा तेन कालेन तेन समयेन वाराणसीयं दारिका अभूषि । न खल्वेतदेवं द्रष्टव्यं । तत्कस्य हेतोः । एषा सा भिक्षवो पदुमावती वाराणसीयं दारिका अभूषि ॥ यं से तं प्रसन्नचित्ताये प्रत्येकबुद्धस्य पद्मं दिन्नं तस्य कर्मस्य विपाकेन पदुमावतीये क्रमेषु पद्मानि प्रादुर्भवन्सुः । यं से तस्य प्रत्येकबुद्धस्य हस्ततो तत्पदुमं भूयो आच्छिन्नं तस्य कर्मस्य विपाकेन राज्ञा ब्रह्मदत्तेन वध्याये आणत्ताये तानि पदुमानि क्रमेषु अन्त-

1. BM °sito nagare° M °rddhâcati ‖ prâ° BM °dikena abhikrânte(M °krâṁte)na pratikrânte(M °krâṁte)na prâsâdikâbhiprasannâ(M °saṁnâ) ca de° M °nushyâḥ B °shyâ ta°. — 3¹. M °citaprâ°. — 3². M °ttâya naṁ padmaṁ pra° B °taṁ papadmaṁ°. — 5. B so dâni° M sâ dârikâ° BM °naṁ paçyati | svakaṁ ca hastaṁ ksha(B °kshe)ṇikaṁ pa°.

6. M ye dânî bhûyo ta ° to taṁ padmaṁ yânvitaṁ | bhagavan dehi me bhûyo padmaṁ ti. — 7. M °padmaṁ bhû ° nnaṁ ‖ haṁtaṁ bha° BM °ti tâ°. — 8. M °padmaṁ bhû° B °tyekasyâ ha°. — 9. BM so dâni ca svayaṁ ° sya hastaṁ ksha(B °kshe)ṇikaṁ pa°. — 10¹. BM °taṁ na°. — 10². M °bhana mayâ kṛitaṁ yan me pra ° cittâḥ e° B °cittâ e° M °padmaṁ da ° nar âcchinnaṁ | B °nnaṁ tâ°.

11. M °padmaṁ bhûyo tasyâ dârikâye tasya pra° BM °nnaṁ pra°. — 12. BM °gṛihnâhi maḥ(M °mo) bha° M °gavaṁ bhûyo imaṁ padmaṁ a°. — 13. M °padmo ta° B °tasya dâ°. — 14². M °lu bhiksha° BM °shmâkaṁm e° B °d anyo so tena kâ° M °d anyaḥ sa tena kâ ° siye dâ°. — 15¹. M °lvetaṁd e°.

16¹. B eshâṁ sâ° M eshâ bhikshavaḥ padmâvatî nâma vâ°. — 16². M yaṁ se naṁ prasannaṁ ci ° dinnaṁ tasya karmasya vipâkena padmâvatî ° rbhavansu | B °vansuḥ yaṁ°. — 18. B °stâto padumaṁ° M °t padmaṁ âcchi ° râjâ bra ° ttena cadhyâ° B °ttena vadhyâye ânattiye | tâni pa° M °nattiye tâni padmâni krameshu aṁtarhi°.

र्हितानि । यं से तं पदुमं भूयो तस्य प्रत्येकबुद्धस्य दिन्नं तस्य कर्मस्य विपाकेन भूयो राज्ञा ब्रह्मदत्तेन वाराणसीतो कंपिल्लमानीताये पुनः क्रमेषु पद्मानि प्रादुर्भूतानि ॥

समाप्तं पदुमावतीये पूर्वयोगं ॥

भिचू भगवन्तमाहन्सुः ॥ कस्य भगवन्कर्मस्य विपाकेन राऊलस्य कुमारस्य षड्वर्षाणि गर्भावासो अभूषि ॥ भगवानाह ॥ एतस्य वैषो भिचवो राऊलस्य कुमारस्य पौराणं कर्मविपाकं ॥

भूतपूर्वं भिचवो तीतमध्वानं वैदेहजनपदे मिथिलायां राजधान्यां ब्राह्मणो राजा अभूषि ॥ तस्य द्वे पुचा अभून्सुः चन्द्रो च नाम कुमारो सूर्यो च नाम कुमारो ज्येष्ठो सूर्यो कनीयसो चन्द्रो ॥ अथ खलु भिचवो सो वैदेहको ब्राह्मणराजा आयुचयाच्च कर्मचयाच्च कालमकार्षी ॥ चन्द्रो सूर्यमाह ॥ त्वं ज्येष्ठो तुवं राज्यं प्रापुणेहि । अहं ऋषिप्रव्रज्यां प्रव्रजिष्यामि ॥ अथ सूर्यो कुमारो चन्द्रं कुमारमेतदुवाच ॥ किं राज्ञां कर्तव्यन्ति ॥ चन्द्रो कुमारो आह ॥ राज्ञा जनस्य आणत्ती दातव्या ॥ अ[316a]थ खलु सूर्यो चन्द्रमेतदवोचत् ॥ अहं कुमार राजा तव आणपेमि त्वं राजा भवाहि अहं च ऋषिप्रव्रज्यां प्रव्रजिष्यामि ॥ अथ खलु भिचवः सूर्यो कुमारो चन्द्रं कुमारं मिथिलायां राज्येनाभिषिंचित्वा ऋषिप्रव्रज्यां प्रव्रजेसि ॥ तेन दानि पूर्वराचापररात्रं जागरिकायोगमनुयुक्तेन विहरन्तेन चत्वारि ध्यानानि निष्पादितानि पंच चाभिज्ञा साचीकृता महर्द्धिको महानुभावो ऋषि संजातो ॥

1. M °tam̃ padmam̃ bhûyo tasya pra° B °nnam̃ | tasya ka° BM °kena bhûyo râjâ bra° M °ye mura krameshu prâ°. — 4. M iti çrîmahâvastuavadâne padmâvatiye pûrvayogam̃ samâptam̃ ‖ . — 5¹. M bhikshur bhagavam̃tam â° B °vanta â°. — 5². B °bhagava karma ° garbhavâso°.

6². BM etasya caisho° M °paurâṇâm̃ ka°. — 8. B °pûrva bhi° M °kshavo ati°. — 9. M tasya dvau putrau abhûshi cam̃dro ca nâma kumâro sû ° mâraḥ jye° BM °shṭho candro kanyaso sûryo(M °kanashṭho sûryya) ‖ . — 10. M °vo sau vai ° hmaṇo râjâ âyuḥkshayâc ca karmakshayâd ya kâlam akârshît ‖ .

11¹. B sûryo candram̃ âha ‖ M sûryo cam̃dram âha ‖ . — 11². B °shṭho tava râ° M °shṭho na ca râ°. — 12¹. M aham ṛishi°. — 12². B °sûyo kumâro° M °ro cam̃ndram̃ kumâre etad avocat | . — 13¹. M °rttavyân ti | . — 13². M °mârâha ‖ . — 13³. B °jana âṇa° M °âṇanti dâ°. — 14¹. M atha sûryyo candra°. — 14². B °ṇapesi tvam̃° M °ṇapehi tvam̃ vâksho bhavâhi° B °hi | aham̃° M °shipravrajyâmi | . — 15. M °kshavo sûryo kumâro cam̃dra kumâram̃° B °ro candra kumâram̃° M °tvâ ṛipravrajyâm̃° B °jyâm̃ pravrajyesi | .

17. M tete dânîm̃ pû ° rikoyo° B °rikâyom anu ° haranti ca catvâ° M °haram̃ti catvâ°.

ये पि सूर्यस्य कुमारस्याभ्यन्तरे परिवारा अभूषि ते पि सूर्येण सार्धं ऋषिप्रव्रज्यां प्रव्रजिता सर्वे च चतुर्ध्यानलाभी पंचाभिज्ञा महर्द्धिका महानुभावा संजाता ॥ अथ सूर्यस्य ऋषिस्य एतदभूषि ॥ अहं खलु चतुर्ध्यानलाभी पंचाभिज्ञो अयं च मे परिवारो सर्वो चतुर्ध्यानलाभी पंचाभिज्ञो यं नूनाहं उत्तरिविशेषं आरभेयं ॥ तेन दानि समादानं कृतं न मया अदिन्नं उदकं दन्तकाष्ठं पि परिभोक्तव्यं ॥

अथ खलु भिचवो सूर्यो ऋषिरपरकालेन स्मृतिसंमोहेन अपरस्य ऋषिस्य उदकभाजनातो अदिन्नं उदकं पिबे ॥ तेन पीतेन अस्य स्मृतिरुत्पद्ये मम व्रतसमादानं न मया अदिन्नं उदकं दन्तकाष्ठं पि परिभोक्तव्यं इति । इमं च मया इमस्य ऋषिस्य उदकभाजनातो स्मृतिसम्मोहेन उदकमदिन्नं पीतं । चौरो अहन्ति तस्य कौकृत्यमुत्पन्नं चौर्यं मया कृतं ति यं मे परस्य उदकभाजनातो अदिन्नं उदकं पीतन्ति ॥ सो दानि दुःखदौर्मनस्यजातो आसनातो उत्थाय पृथिव्यां निषण्णो ॥ अथ खलु ते माणवका येन सूर्यो ऋषिस्तेनोपसंक्रमित्वा सूर्यं ऋषिमभिवादेन्सुः ॥ अथ खलु भिचवो सूर्यो ऋषी तां माणवकानेतदवोचत् ॥ मा यूयं माणवका मम अभिवादेथ ॥ अथ खलु भिचवस्ते माणवका सूर्यमृषिमेतदवोचत् ॥ भो उपाध्याय किस्य वयं उपाध्यायं नाभिवादेष्यामः ॥ सूर्यो ऋषि आह ॥ अहं खलु माणवका चौरो ति ॥ माणवका आहन्सुः ॥ किं वा कथं वा उपाध्याय ॥ सूर्यो ऋषि आह ॥ अमुकस्य माणवकस्य उदकभाजनातो अदिन्नमुदकं पीतं ॥ ते दानि माणवका एतमाहन्सुः ॥ मा भवन् उपा[316b]ध्याय एवं वदेहि । न भवां चौरो यमस्माकं उदकं उपाध्यायस्य स्वकं ते उदकं पीतं मा कौकृत्यं जनेहीति ॥ सूर्यो ऋषि आह ॥ जानन्ति माणवका मम व्रतसमादानं न मया कदाचिददिन्नं उदकं दन्तकाष्ठं पि भुक्तं पूर्वं मया अदिन्नपूर्वं उदकं पि पीतं ।

1. BM °shi | te° B °rve ca catubhirdhyâ°. — 3¹. M °shisyaita°. — 3². M °ayam̃ ca parivârâ sarve catu° B °ro sarve catu° M °bhijñâ yam̃ nû ° sham̃ âlabheyam̃ | . — 5. M tena dânîm̃ sa° BM °udakâdanta° M °kâshṭhâ pi°.

6. M °kâlam̃ na smṛitim̃ sam̃mohâ aparasya ṛishasya uda ° dakâ dantaka pi ca tena yasya smṛi° B °pibe tena°. — 7. B °pîtena yasya° M °smṛiti utpa ° dâna na mayâ ° kam̃ dam̃takâ°. — 8. B °shisya udakam̃ bhâ° M °shisya udakabhâm̃janâm̃to smṛitim̃ sam̃mohe° BM °dinnam̃ | pîtam̃ cau°. — 9. M °me parasya udakabhâm̃ja ° kam̃ pibam̃ti | .

11¹. M so dânîm̃ duḥ ° syasam̃jâtam̃ â ° shaṇṇaḥ. — 11². M °tvâ sûrya ṛishi° BM detsuḥ ‖ . — 12. M °ṛishi tâm̃ mâṇavakâm̃ eta°. — 13. M °kâ mamâbhi°. — 14¹. M °khalu te mâ°. — 14². M °nâbhicâde°. — 15². M °vako cau°.

16¹. M °vako âhatsu | . — 16². M °katha upâ°. — 17². M °dakabhâm̃janâmo a°. — 18¹. M tâ dâ° BM °evam â° M °hatsu ‖ . — 18². BM mâ bhavân upâ°. — 18³. M °ro yam̃ asmâ ° dakam uvyâdhyâyasya ke te uda°. — 20². M jânam̃ti mâ ° cid dinnam udakam̃ dam̃takâshṭhâp(i) paribhoktam̃ pûrṇṇam̃ mayâ° B °nnam̃m udakam̃° M °nnapûrvam udakam̃ pim̃ pî°.

सो हं चौरो संवृत्तो दण्डकर्म करोथ यथा चौरस्य क्रियति तस्य मे ॥ माणवका आहन्सुः ॥ भो उपाध्याय न वयं उत्सहाम उपाध्यायस्य दण्डकर्म कर्तुं । एषो च ते चन्द्रो राजा भ्राता तस्य सकाशं गच्छाहि ॥ सो ते दण्डकर्म दास्यति ॥

अथ खलु सूर्यो ऋषिर्येन मिथिला राजधानी तेन प्रयासि राज्ञो चन्द्रस्य सकाशं ॥ अश्रोषीद्राजा चन्द्रो भ्राता मे सूर्यो ऋषि मिथिलायां आगच्छतीति ॥ अथ चन्द्रो राजा चतुरंगेन बलकायेन सार्धं सूर्यस्य ऋषिस्य प्रत्युन्नमनाय निर्याति ॥ अथ खलु चन्द्रो राजा येन सूर्यो ऋषिस्तेनोपसंक्रमित्वा यानातो ओरुह्य सूर्यं ऋषिमभिवादयति ॥ अथ खलु सूर्यो ऋषि चन्द्रं राजानमेतदुवाच ॥ मा खलु पुनस्त्वं महाराज मम अभिवादेहि ॥ एवमुक्ते भिक्षवः चन्द्रो राजा सूर्यं ऋषिमेतदुवाच ॥ किस्याहं भगवं ज्येष्ठं भ्रातरं सूर्यं ऋषिं दृष्ट्वा नाभिवादयिष्यामि ॥ एवमुक्ते भिक्षवः सूर्यो ऋषिश्चन्द्रं राजानमेतदवोचत् ॥

अहं चौरो महाराज अदिन्नं उदकं पिबे ।
तस्य करोहि मे दण्डं यथा चौरस्य क्रियति ॥

अथ खलु भिक्षवः चन्द्रो राजा सूर्यमृषिमेतदुवाच ॥ अनुजानाम्यहं भगवं यं त्वया उदकं पीतं स्वविजितातो तमुदकं पीतं यं मम राज्यं तव पि तं राज्यं गच्छ येन इच्छसि मा भगवं कौकृत्यं करोहि ॥ अथ सूर्यो ऋषिश्चन्द्रं राजानं गाथाये अध्यभाषे ॥

नाहं शक्तो महाराज कौकृत्यं प्रतिविनोदितुं ।
साधु मे क्रियतु दण्डो यथा चौरस्य क्रियति ॥

1¹. M mo ha cau° B °vṛittaṁ tasya karmaṁ° M °tto tasya karma karotha | yathâ° B °tha | yathâ° M °rasya kriyati° BM °me mâ°. — 1². B °âhaṁsuḥ ‖ . — 2¹. B °utsahâdhyâma° M °sya daṁḍakarma karttuṁ | . — 2². M eshâṁ ca te caṁdro râ°. — 4. M atha sûryyo ṛi° B °thilâyâ râ° M °thilâyâṁ râ° B °prayâsi | râjño° M °jño caṁdra° B °çaṁ a°. — 5. M °jâ caṁdro bhrâ° B °lâyâm âga°.

6. M atha caṁdro ° sûrye ṛi° BM °dgamanaṁ niryâsi(B °ryâsyati) ‖ . — 7. M °lu caṁdro râ ° sûryya ṛishi teṇo ° tvâ yânâno âruhya sûryya ṛishiṁ abhi°. — 8¹. M atha sûryyo ṛishi caṁdraṁ râ ° tad avocat | . — 9. M °vaḥ caṁdro râ° BM °sûrya ṛi° M °tad avocat | . — 10. M kasyâ° B kiṁsyâ° M °gavan jyeshṭhaṁ° B °jyeshṭaṁ bhrâ° M °sûryya ṛi°.

11. M °ṛishi candraṁ râjânaṁ eta°. — 12. M °dinna u°. — 13. B °thâ vârasya kriyanti ‖ M °kriyasi ‖ . — 15¹. M °vaḥ caṁdro râjâ sûryyaṁ ṛishiṁ etad avocat | . — 15². B amukajânâ° M °haṁ bhagavan yaṁ tvayâ udakaṁ pibe naṁ râjyaṁ gaccha ye° B °pitaṁ svavijitâto tam udakaṁ pitaṁ yaṁ mama°. M °gavan kaukṛi°.

17. M °shiç caṁdrâṁ râ°. — 19. BM °çaktu ma° B °tyaṁ parivno°. — 20. B °dhu mâ kri° M °dhu mo kriyatuṁ da°.

अथ खलु चन्द्रस्य वैदेहस्य राज्ञो पुत्रो च भागिनेयो च चन्द्रं वैदेहराजमेतदुवाच ॥ क्रियतु देव ऋषिस्य दण्डकर्म कौकृत्यस्य प्रतिविनोदनार्थं मा ऋषि कौकृत्येन किलम्यतु ॥ अथ चन्द्रस्य राज्ञो एतद्भूषि ॥ कीदृशमहं सूर्यस्य ऋषिस्य दण्डकर्म कुर्यंयं येन ऋषि निःकौकृत्यो भवेय ॥ अथ खलु चन्द्रो राजा अशोकवनिकां सिक्तसंमृष्टां कारापेत्वा प्रणीतं च [317ᵃ] आसनं प्रज्ञप्तं खाद्यभोज्यं च प्रवेश्यित्वा राजार्हाणि मोदकानि वृक्षशाखेषु बन्धापेत्वा सूर्यं ऋषिमेतदुवाच ॥ गच्छ भगवं अत्र अशोकवनिकायां आसाहि यं चात्र खाद्यभोज्यं शय्याविधानं च ततो यथासुखं परिभोगं अनुजानामि ॥ अथ खलु चन्द्रो राजा सूर्यं ऋषिमशोकवनिकायां षड्रात्रं वारेसि ॥ अथ चन्द्रस्य राज्ञो षड्रात्रात्ययेन एतद्भूषि ॥ कथमहं सूर्यमृषिं निःकौकृत्यं कृत्वा विसर्जेयं ति ॥ तस्यैतद्भूषि ॥ यं नूनाहं सर्वबन्धनप्रमोचं कारापेयं ॥ कारापेसि खलु भिक्षवः चन्द्रो राजा सप्तमे दिवसे सर्वबन्धप्रमोचं । सूर्यो च ऋषि अमात्येहि उक्तो ॥ गच्छथ भगवां उद्धृतदण्डो ति । राज्ञा चन्द्रेण सर्वबन्धनमोचं कारापितं ॥ सो दानि निष्कौकृत्यो पुनः आश्रमपदं गतः ॥

भगवानाह ॥ स्यात्खलु भिक्षवः युष्माकमेवमस्यादन्यः स तेन कालेन तेन समयेन चन्द्रो राजा । एष तदा राऊलभद्रकुमारो अभूषि ॥ यः सूर्यो ऋषिस्तदा अहमेवाभूवं ॥ यत्सूर्यो ऋषि अशोकवनिकायां षड्रात्रं उपरुद्धः तस्य कर्मस्य विपाकेन राऊलो कुमारो षड्वर्षाणि गर्भावासस्थितो अभूषि ॥

राऊलभद्रस्य पूर्वयोगं ॥

1. M °lu caṁdrasya vaideharâjño ° yo ca caṁdraṁ vai ° tad avocat | . — 2. M kriya ° ṇḍakarma kau°. — 3¹. M °tha caṁdrasya°. — 3². M °dṛiçaṁ ahaṁ sûryyasya ṛishidaṇḍakarma ku ° shi nikau° B °kṛityaṁ bha°. — 4. M °lu caṁdro râjâ a° B °ktasaṁrishṭâṁ kâlâpe° M °saṁsṛishṭâṁ kârâpe° B °taṁ ca â[317ᵃ]âsa ° bandhâyetvâ sûrya ṛi° M °sûryya ṛishim etad avocat | .

7. M °gavan atra a ° naṁ ca tataḥ ya ° gaṁ atujâ° — 8. M °lu caṁdro râjâ sûryyam ṛishi açe° B °traṁ dhâresi | M °traṁ dhâresi | atraṁ dhâresi | . — 9. M atha caṁdra shaṭrâtrasyâtyena e°. — 10¹. M °sûryya ṛishi niḥ° B °shiṁ kau° M °sarjayeyaṁ ti B °ti ta°.

11¹. M yaṁ nûmâhaṁ° B °sarve ba° BM °peyaṁ kâ°. — 11². B kârâropesi | kha° M °vaḥ caṁdro râ°. — 12¹. M sûryo pi ṛi° B °kto gaccha°. — 12². M gaccha bhavân uddhṛi° B °tha | bha ° udhṛita° BM °ṇḍo si | . — 13¹. B râjñe ca° M °jñâ caṁdreṇa sarvabaṁdhana° B °kâropitaṁ ‖ . — 13². M °dâni nikaukṛitya punar âçra°. — 15². M °kshavo yushmâkaṁm e° B °yena tadâ candro° M °yena caṁdro râ° BM °jâ e°.

16¹. B esha râhu° M esha ahaṁ evâbhût | . — 16². M ya sûryyo ṛishi râhulakumâro abhûshi tadâ yo sû°. — 17. M yo sûryyo° B °rishiṁ açokavaṇikâ° M °drâtram uparuddho ta ° hulaku° B° huro ku ° ṇi garbhavâ°. — 19. M iti çrîmahâvastuavadâne râ ° gaṁ samâptaṁ ‖ .

राजा दानि शुद्धोदनः शाक्यां संनिपातयित्वा आह ॥ भवन्तो यदि न कुमारो सर्वार्थसिद्धो अगारातो अनगारियं प्रव्रजितो तं राजा चक्रवर्ती भवेय बहूनां राजानसहस्राणां ईश्वरो भवन्तो पि सर्वे अनुयाता भवेथ सचे चक्रवर्तिराज्यमपहाय क्षत्रियकुलातो अगारातो अनगारं प्रव्रजितो अनुत्तरां सम्यक्संबोधिमभिसंबुद्धो सो च क्षत्रियो ब्राह्मणपरिवारो व तं नो अनुरूपं भवेत् ॥ ते दानि शाक्या आहन्सुः ॥ आणपेतु देवः किं क्रियतूति ॥ राजा शुद्धोदनो आह ॥ कुलातो कुलातो एकः क्षत्रियकुमारो प्रव्रजतु । यत्र एकः सो एकपुत्रको मा प्रव्रजतु । यत्र दुवे भ्रातरो ततो एको प्रव्रजतु । यत्रापि संबहुला भ्रातरो ततो पि एको प्रव्रजतु ॥ शलाकानि चारेथ कथं योभूयेन शाक्यगणस्य उत्पद्यतु प्रव्रजितुं शाक्यकुमारा ॥ कुलपुरुषकेण तत्र शलाकानि चारीयन्ति योभूयेन शाक्यगणस्य उत्पद्यति ॥ यदा राज्ञा शुद्धोदनेन आणत्तं प्रव्रजन्तु शाक्यकुमारा कुलपुरुषकेण यो च एकपुत्रको सो मुच्यतु तत्र दानि तेन कुलपुरुषकेण पंच कुमारशता अभिनिष्क्रमन्ति प्रव्रज्याय ॥ राज्ञो शुद्धोदनस्य भगवां च पुत्रो सुंदरनन्दो च । भगवता प्रव्रजितेन सुन्दरनंदो [317b] मुच्यति ॥ शुक्लोदनस्य पुत्रा आनंदो च उपधानो च देवदत्तो च । तेषां देवदत्तो अभिनिष्क्रमति ॥ आनन्दो पि इच्छति प्रव्रजितुं माताये मृगीये शाक्यकन्याये नानुजानीयति ॥ सो वैदेहं जनपदं गत्वान मौन-

1¹. M atha râjâ çuddhodano çâkyâ saññi°. — 1². M bhagavato yadi ° ddho agârâto ânagâri ° tañ râjâ cakravarttir bhaveya bahû° BM °çvaro bhavañto(B °bhagavanto) pi sarve anujâtâ bhavetha so (M °so na) ca cakra° B °hâya kshetriyakulâto agârâto anagâri pravrajito (*après ce passage, qui depuis* °tañ râjâ° *est ajouté à la marge, suit :* dvâ ogurisata dvâtayâ, *séparé de ce qui précède, mais rapporté à la même ligne; je ne sais qu'en faire.*) M °kulâto agârâto anagâriyañ pra° B °ttarâ saññmya° M °myaksabodhim abhisañbodhim abhi ° ddho sa va kshatriyabrâhmaṇo pa° B °ddho sa ca kshetri° BM °vâro ca tato anu°. — 5. M °hatsuḥ | .

6¹. M ânayantu deva kiñ° B °ânayatu de° M °kriyateti ‖ . — 6². B kulâto ekaḥ kshetri ° vrajitu yatra ekaḥ so ekaputro mâ pravrajitu | . — 7¹. *Omis par* M. B °vrajitu. — 7. M yatraḥ ve bhrâta° BM °to ekâ pravraja(B °ji)tu yatra ekaḥ so(M °ka ço) eka° M °putrâko mâñ pravrajayatu | B °vrajitu | . — 8. BM °hulo bhrâ° M °vrajituñ B °tu ça°. — 9. B °lâkâ pi nidhâretha° M °nidhâretha | kathañ bhûyo na ° tpadyetu°. — 10. M purusheṇa ta° B °shakena ta° M °nivâriyañti | yobhû.° kyamaṇpa(?)sya° B °gaṇañsya°.

11. M râjâ çu° B °râjño çu° M °danâna â ° vrajañtu çâ° B °vrajatuñ çâ° BM °shakena yo ca e(M °ca na)ka° M °ko sâ utpadyatuḥ tatredâni kulapurushaikena pañ° B °so muhyatu | ta° M °bhiniḥkramañti pra° BM °jyâya râ°. — 13¹. M °bhavâñ ca putro suñdarado ca B °ndo ca bha°. — 13². M °tena suñdaranañdo praccati | B °do vuccati | . — 14. BM °putro â° M °datto. — 15¹. M abhi°. — 15². M ânañdo°.

16. BM °sati çu°.

व्रतेन आसति ॥ शुक्लोदनस्य पुत्रा नन्दनो च नन्दिको च एते अभिनिष्क्रमन्ति । अपरे च दुवे पुत्रा गृहे स्थिता ॥ अमृतोदनस्य पुत्रा अनुरुद्धो च महानामो च भट्टिको च ॥ अनुरुद्धो च महानामेन पृच्छीयति । किं त्वं प्रव्रजिष्यसि गृहकार्यं वा चिन्तयिष्यसीति ॥ सो अनुरुद्धो पुण्यवन्तो न पृच्छति किं गृहमध्यावसन्तेन करणीयं किं वा प्रव्रजितेन करणीयं पुण्यवन्तो निष्पुरुषेण नाटकेन क्रीडन्तो आसति पंचहि कामगुणेहि समर्पितो समंगीभूतो । तस्य अस्तमिते आदित्ये सहस्रं दीपवृक्षाणि निशि प्रदीप्यन्ति । मोहनस्य जिज्ञासनार्थं एकूनं दीपवृक्षसहस्रं प्रदीपापितं । तस्य दानि ताव विशुद्धं मान्सचक्षुं यं तं एकूनं दीपवृक्षसहस्रं तस्य चित्ते नास्ति संपूर्णं दीपवृक्षसहस्रन्ति । तस्य दासपरिवारो सर्वो विस्मितो । अहो परिशुद्धं कुमारस्य चक्षुं ति । यत्र नाम दीपवृक्षसहस्रातो एकेन दीपेन ऊनं अविशुद्धानि दीपानि संजानाति ॥

सो दानि तं ज्येष्ठभ्रातरं महानामं पृच्छति ॥ किं गृहमध्यावसन्तेन करणीयं किं वा प्रव्रजित्वा करणीयन्ति ॥ सो नं आह ॥ गृहमध्यावसन्तेन कल्यतो एवोत्थितेन राज्ञो सुखराज्ञी दातव्या शाक्यमहत्तरकानामपि सुखराज्ञी दातव्या ये पि कान्ता ते पि अवलोकेतव्या कालगतानां पि मृतकरणीयेहि स्थातव्यं गृहजना वेष्टितव्या दासीदासकर्मकरपौरुषेया वेष्टितव्या भोजनाच्छादनेन सर्वेहि च उत्सवेहि समन्वाहरितव्या व्ययकर्मेन उत्सविकेन पारिव्ययिकेन च हस्त्यश्वअजगवेडकानि

1. BM çukloda ° putro nanda° M °no ca nandako° B °shkramantâ ‖ M °shkramañto. — 2¹. B °sthita a°. — 2². BM °putro a° M °nubuddho ° nâmâ ca bhaṭṭikâ ca B °ko ca a°. — 3¹. M anubuddho mahâ pricchati B °yati kiñ°. — 3². M °vâ ciñtayi°. — 4. M °ddho puṇyavañte pri° BM °cchati kiñ gṛihe adhyavasa° B °ntena kaṇiyañ kiñ vâ° M °ṇyavañto niḥpurushena nâ° B °ṇa nâdake ° ti | pañ° M °pañvahi kâ° BM °bhûto ta°.

6. M °ashṭam i° BM °te na âdityasahasraṁ ti dîpavṛikshâṇâñ ni° M °dîpyañti | B °dîpyañti mo°. — 7. M mâharase tijñâ° B moharese vijñâ° M °ekuṇañ dîpa ° pâdituñ | . — 8. M °dâniñ tânad viçu ° nsacakshushañ tam etasya ci° B °m ekonadîpavṛikshasahasraṁ tasya citta nâ° M °pûrṇṇa dî ° hasraṁ ti B °nti ta°. — 9. M °sya dâniñ pari ° sarva vi° B °to a°. — 10. M °pena unnamativiçuddhañ dîpâ°.

12¹. M °dâni tañ° B °jyeshṭabhrâ°. — 12². B kiñ adhyâ° M kiñ gṛihe adhyâvasañtena ° kiñ pra ° ṇiyeti | . — 13¹. B sâ nañ° M sâ nam âha ‖ . — 13². M °vasañtena kalpato evosthitena râjñâ sukharâtri dâtavyâ çâ ° ttaraṁkâmâm api su° B °ye pi krântâ te° M °pi acalokayitavyâ kâlagatân api mṛi ° gṛihajanâ veshṭitavyâ | dâsî ° sheya veshṭetanmâ | bhonanâcchâdanena sarve ca unsahehikena pâ° B °nena sarve ca utsavehi samanvâharitavyâ | vayañ karme ca utsavi° M °vyayakena ca hastya° BM °çvaajâga° M °ḍakâ niceshṭâpayitavyâ | rathayugyayârnâni veshâpayitavyâni niveshṭitavyâni pratyavekshitavyâni ca kâ° B °bhogâṇi ca pari ° pratyavekshitâni ca | .

IMPRIMERIE NATIONALE.

वेष्टापयितव्यानि रथयुग्ययानानि वेष्टापयितव्यानि ग्रामाणि च भोगानि च परिपालयितव्यानि कर्मान्तानि कालानुकालं प्रत्यवेक्षितव्यानि फलानि वाहयितव्यानि नानाप्रकाराणि धान्यजातीनि रोपयितव्यानि निवेष्टितव्यानि प्रत्यवेक्षितव्यानि च । कालानुकालं च यथाप[318a]क्वानि च धान्यजातानि लवापयितव्यानि खलधानेषु संहारापयितव्यानि ओपुनापयितव्यानि । यत्किंचिद्गृहकार्यं अभ्यन्तरबाहिरं सर्वं कर्तव्यं ॥ अनुरुद्धो आह ॥ प्रव्रजितेन पुनः किं कर्तव्यं ॥ महानामो आह ॥ प्रव्रजितेन पूर्वाह्णे भिक्षा अन्वेषितव्या लूखं वा प्रणीतं वा आहारेण आहारं कार्यं कृत्वा एकं आत्मानं दमेतव्यं शमेतव्यं परिनिर्वापयितव्यं ॥ अनुरुद्धो आह ॥ अलं मे गृहकार्येण यूयं करेथ अहं प्रव्रजिष्यामि ॥

ते दानि पंचमात्रा शाक्यकुमारशता महता राजानुभावेन महता राजऋद्धीये स्वकस्वकेहि विभवेहि अभिनिष्क्रमेन्सुः । केचिद् हस्तिपृष्ठेहि सुवर्णच्छत्रेहि सखुरप्रवारेहि केचित्सुवर्णशिविकाहि नानारत्नसंछन्नाहि केचित्सौवर्णेहि रथेहि चतुर्घोटेहि नानारत्नजालसंछन्नेहि सवैजयन्तिकेहि सनन्दिघोषेहि उच्छ्रितच्छत्रध्वजपताकेहि । केचिदश्वपृष्ठेहि सर्वालंकारविभूषितेहि हेमजालसंछन्नेहि । देवदत्तो च हस्तिनपृष्ठे स्वलंकृतेन हेमजालसंछन्नेन उच्चसिंहासने निषण्णो निर्धावितो । तस्य निर्धावन्तस्य तोरणाग्रे कर्कटकस्य मकुटं लग्नं । तेन कर्कटकेन तं मकुटं देवदत्तस्य शीर्षातो उत्क्षिप्तं महाजनकायेन अट्टप्रहासं क्षिप्तं नैमित्तिकेन च होरपाठकेन च व्याकृतो येन कार्येण देवदत्तो कुमारो अभिनिष्क्रमति तं कार्यं न प्रापयिष्यतीति । उत्तमार्थं परिहापयिष्यतीति यमेतं उत्तमांगतो मकुटं तोरणाग्रातो कर्कटकेन उत्क्षिप्तं ॥

4. M °lât kâlañ ° tâni ca lañvâpayenavyâni khalahâneshu° B °khalahâneshu sâhâ° M °oshunâ° B °opunapâyitavyâni ya°. — 5. M °abhyañtaravâttitañ sa°.

6¹. M anubaddho°. — 7. BM °lûkhañ vâ praṇîtañ vâ âhâreṇa âhâra kâ ° ekam âtmâ° B °naṁ tametavyaṁ pari° M °damenavyaṁ ça° — 9. M °kârya yû°. — 10. M tadânim̃ pañcamâtrâṇi çâ ° çatâni mahatâ râ ° jarddhiye ca sva ° kehi abhinishkrâmetsu | B °metsuḥ ‖ .

11. B °pṛishṭehi suvarṇṇacchatrehi sukhulapravâlehi kecit su° M °pṛishṭhe kecit suvarṇṇacchatrehi saravurapravârehi suvarṇṇaçivikâhi nânâratnasañcchanniti | kecin suvarṇṇarathe° B °nnâhi ket sau° M °turghaṭikehi nânâratnajâlañ sañ° BM °nnehi vai° M °jayañtikehi sa° B °sanañdighoshe°. — 14¹. B °pṛishṭehi sa ° telhi | he° BM °nnehi de°. — 14². B °pṛishṭena sva° M °svaraṁkṛi ° shasya nirddhâvi B °sharṇṇo nirddhâvi tasya°.

16¹. M °rddhântarddhâvitasya to° B °rddhâvinta ° kuṭe la° M °kuṭa la°. — 16². M °takena naṁ maku ° prahâsa kshi° B °pâthakena ca° M °pâthena vyâhṛitâ ye ° bhinihkramati | taṁ kâryeṇa prâ°. — 19. M uttamârthe pa ° titi | yaye taṁ° B °titi ‖ ya° M °kena kshiptaṁ ‖ .

अथ खलु ते पंच शाक्यकुमारशतानि महता राजानुभावेन महता राजऋद्धीये सर्वनृत्तेहि सर्वगीतेहि सर्वतूर्यताडावचरेहि कपिलवस्तुतो नगरातो निर्यात्वा येन न्यग्रोधारामं तेन प्रयासि ॥ अथ खलु ते पंच शाक्यकुमारशता यावदेव यानानां भूमिस्तावदेव यानेहि यात्वा यानेषु प्रत्योरुह्य येन भगवान्स्तेनोपसंक्रमित्वा अनेकजनसहस्रपरिवारिता भगवतः पादौ शिरसा वन्दित्वा एकान्ते अस्थान्सुः ॥

तेषां दानि शाक्यकुमाराणां उपालिर्नाम नापितदारको उपस्थानकरो कृतकुशलमूलो पुरिमकेहि सम्यक्संबुद्धेहि वासितवासनो छिन्नबन्धनो न[318b]वुत्पत्तिको आर्यधर्माणां चरमभविको लाभी ध्यानानां चाभिज्ञानां च ॥ सो दानि मातरे भगवतो उपनामितो अयं भगवतो केशानि ओतारेष्यति । भगवतापि अधिवासितं ॥ सो दानि उपालि भगवतो केशानि ओतारेति ॥ सा दानि उपालिस्य माता भगवन्तं पृच्छति ॥ सुखं भगवं उपालि केशानि ओतारेति ॥ भगवानाह ॥ सुखं केशानि ओतारेति अपि च तथागतं अभ्यासादेति ॥ सा दानि आह ॥ मा दारक भगवन्तं अभ्यासादेहि ॥ सो दानि प्रथमं ध्यानं समापन्नो ॥ सा ताव नं पुनर्भगवन्तं पृच्छति ॥ सुखं भगवं उपालिदारको केशानि ओतारेति ॥ भगवानाह ॥ सुखं दारको केशानि अवतारयति अपि तु खुरं पिलिपलिपायेति ॥ सा दानि आह ॥ मा दारक क्षुरं पिलिपलिपायेहि ॥ सो दानि द्वितीयं ध्यानं समापन्नो ॥ सा पुनः उपालिस्य माता भगवन्तं पृच्छति ॥ सुखं भगवन् उपालिदारको केशान्यवतारयतीति ॥ भगवानाह ॥ सुखं उपालिदारको केशान्यवतारयति अपि तु आश्वासप्रश्वासेहि तथागतं उपहनति ॥ सा दानि आह ॥ मा दारक आश्वासप्रश्वासेहि भगवन्तं उपहन ॥ सो तान्यतिक्र-

1. M °lu çâkumârapañcaça ° nṛtyehi sarvagî° B °tûryetâdâvacarehi | kapi° M °ryyatâdâvararehi kapi ° stuni naga ° grodhâmañ°. — 3. M °pañca ku ° çatâ yâvad eva yâtânâm bhûmiñ tâvad e° B °s tâvaddeva yânehi yâtya yâneshu° BM °pratyâru° M °sahasrehi pa° B °parivârito bha° M °vato pâ° B °dau sira° BM °sâ vañditvâ° M °ekâñte a° BM °sthâsuḥ | .

6. M °lir nâmâ pitadâ ° sthâmakaro° B °sitavâsinocchi° M °sitakâsanâ cchinnabañdhano na utpatiko â° B °jñânâm ca so°. — 8. M sho dâ° B °keçâri uttarishyati | M °otârehi api°. — 9. M api ca tathâ vâ siddhañ | B °vato pi°. — 10¹. M sâ dâ° B °pâli bhagavatâ keçâri otârehi | M °çânihi târehi. — 10². B so dâ° M °gavañtañ pṛi°.

11¹. M °gavan upâ° B °gavâm̃ u°. — 12. B °târehi a° M °bhyâsañdeti ‖ . — 13¹. M °gavañtañ abhyâsañdeti. — 13². M so dânim̃ pra° B °pannaṁ sâ°. — 14¹. M °gavatañ pṛi°. — 14². M °gavan upâ°. — 15². M mukhañ° B sukha dâ°. BM °yati a° M °tu shuraṁ pilipâyeti ‖ .

16². M °piliparipâyehi | . — 17. B punaḥ° M punar upârisya°. — 18³. M sukham upâridâ° BM °yati | âçvâse pra ° gata upahane(M °hare)ti ‖ . — 20¹. M °gavañtam upahatatha | . — 20². M °turtha dhyâ ° pannaḥ.

मित्वा तृतीयं ध्यानं चतुर्थं ध्यानं समापन्नो ॥ भगवाञ्चिचूणामाह ॥ गृह्णथ एतं भिक्षव उपालिहस्तातो चुरं मा भूमिं प्रपतिष्यति ॥ सो दानि चुरो उपालिस्य हस्तातो भिक्षुभिर्गृहीतो ॥

ते दानि शाक्यकुमाराः स्वकस्वकानि वस्त्राभरणानि उज्झित्वा उपालिस्य पुरतो निक्षिपेन्सुः । इमन्ते उपालि धनं भवतु । अस्माकं प्रव्रजितानां नैतेन कार्यं ति । भगवतो सन्तिके वयं प्रव्रजिष्यामः ॥

उपालिस्यापि एतद्भूषि ॥ इमे शाक्या कुमारा राज्यमवजहिय इमानि च वस्त्राभरणानि मम दत्त्वा अगारातो अनगारियं प्रव्रजन्ति किंपुनरस्माभिः चुरवृत्तीहि न प्रव्रजितव्यं भवेय । अहमपि प्रव्रजिष्यामि । न एतेषां वान्तन्तं परिभुंजिष्यामि ॥ अथ खलूपालिः कल्पको येन भगवांस्तेनोपसंक्रमित्वा भगवतः पादौ शिरसा वंदित्वा भगवन्तमेतद्वोचत् ॥ प्रव्राजेतु मे भगवां उपसंपादेतु मे सुगतो ॥ अथ खलु भगवां उपालिकल्पकं [319a] एहिभिचुकाए आभाषे । एहि भिचु उपालि चर तथागते ब्रह्मचर्यं ॥ तस्य दानि भगवतो एहिभिचुकाये सहोक्तेन यत्किंचिन्नृहिलिंगं गृहिगुप्ति गृहिध्वजं गृहिकल्पं सर्वमन्तर्हितं चिचीवरं चास्य प्रादुर्भवे सुंभकं च पाचं प्रकृतिस्वभावसंस्थिता च केशा ईर्यापथो चास्य संस्थिहे सव्यथापि नाम वर्षशतोपसंपन्नस्य भिचुस्य आयुष्मतो उपालिस्य प्रव्रज्या उपसंपदा भिचुभावो ॥ येनान्तरेण पंच शाक्यकुमारशता मातापितृणां मित्रज्ञातिसालोहितानां च प्रतिसंमोदेन्ति तेनान्तरेण उपालि प्रथमतरं प्रव्रजितो ॥

1¹. M °kshun âha ‖ . — 1². BM gṛihnatha° M °kshavar ûpâlihastâtâ kshuramî tâ bhû°. — 2. M °dânîm kshuramî upâ ° bhikshur gṛihitaḥ. — 4. M tadâ ° mârâ svakasvakâni casvâbha° BM °nâni mudritvâ ° petsuḥ | . — 5¹. M imamî te upâli vanamî° B °li yanamî°. — 5². M °tânâ nai ° kâryya ti ‖ .

6. M °to samnike°. — 7². B °kumâro râjyam avagâheya i° M °jyam avagâhâya vastrâ° BM °datvâ° M °vrajati kim ° vyam vayam aha° B °bhaveyam aha°. — 9². M naite° B °shâm vânnan tam° M °shâm vâmnatam pâ ° shyâmaḥ ‖ . — 10. M °khalu upâ ° mitvâ pâdau° M °gavamtam e°.

11. BM pravraje° M °gavân upasamkramyâdet sugataḥ | B °samkramyâdetu me sugata ‖ . — 12¹. M °gavân upâ ° lpako ehibhikshumkâye â° B °kalpamka ehibhikshukoe â° BM °she e°. — 12². M °caratha tathâ°. — 13. M °dânî bhagavatâ e° BM °ye sahasrehi yat kimcid gṛihalimgam gṛihiguptim(M °ptam) gṛihidhva(M °hishvam)jam gṛihi(M °hi)kalpam sarva(M °sara)m anta° B °rbhavetsuḥ subhakam pâtram ca pra° M °rbhavensu | sukam ca pâtra pra° BM °bhâvam samsthitâ° M °çâ iryyâpathe câ° B °sthihe | sayya° M °sthihe | tadyathâ ° nnasya bhikshukasya â ° jyâ sampadâ bhikshubhâvaḥ ye° B °padâ bhikshavo yenâ°.

17. BM yenântaçaçivi(M °çirvi)na çâkya(B °çâke)kumâreṇa satâ(M °tâm) mâtâ° B °nâm maitrajñâ° M °modemti | tenâmtare° B °nti | tenâ ° pâlî pra° M °jitaḥ ‖ .

अथ खलु पंच शाक्यकुमारशता येन भगवान्स्तेनोपसंक्रमित्वा भगवतः पादौ शिरसा वन्दित्वा भगवन्तमेतदुवाच ॥ प्रव्राजेतु मे भगवां उपसंपादेतु मे सुगतो ॥ अथ खलु भगवां तानि पंच कुमारशतानि स्थापयित्वा देवदत्तं एहिभिचुकाये आभाषे ॥ एथ भिक्षवः शाक्यकुमारा चरथ तथागते ब्रह्मचर्यं ॥ तेषां दानि भगवता एहिभिचुकाये आभाष्टानां यत्किंचि गृहिलिंगं गृहिगुप्ति गृहिध्वजं गृहिकल्पकं तत्सर्वमन्तरहाये चिचीवराणि च सानं प्रादुर्भवेन्सुः सुंभकानि च पाचाणि प्रकृतिस्वभावसंस्थिता केशा ईर्यापथो च सानं संस्थिहे सव्यथापि नाम वर्षशतोपसंपन्नानां भिचूणां एष आयुष्मन्तानां शाक्यकुमारशतानां प्रव्रज्या उपसंपदा भिचुभावो ॥

ते दानि भगवता वुच्चन्ति ॥ उपालि भिचु युष्माकं वृद्धतरको एतस्य पादां वन्दित्वा सर्वे पटिपाटिकाये तिष्ठत । यो च प्रथमतरं तथागतस्य उपालिस्य च पादां वन्दित्वा पटिपाटिकाये स्थास्यति सो वृद्धतरको भविष्यति ॥ ते दानि भगवतो उपालिस्य च पादां वन्दित्वा सर्वे भिचुशता पटिपाटिकाये स्थिता ॥ अपि हि जितं महाजनकायो एवमाह ॥ जितमानक्रोधा शाक्या निहतमानदर्पा शाक्या ति ॥ राज्ञापि शुद्धोदनेन सपरिवारेण शाक्येहि च उपालिस्य भिचुस्य पादा वन्दिता । आयुष्मांश्च उपालि एवमाह ॥ स्वागतं राज्ञो शुद्धोदनस्य अनुरागतं राज्ञो शुद्धोदनस्य ॥ अथ खलु राज्ञो शुद्धोदनस्य अमात्यपारि-[319b]षद्या आयुष्मन्तं उपालिं तं राजानं शुद्धोदनं आत्मना आभाषन्तं दृष्ट्वा तं विभावयेन्सुः ॥ कथं नाम उपालिकल्पको हीनजात्यो राज्ञा शुद्धोदनेन भाषति ॥

1. M °çatâni sthâpayitvâ° (*l.* 3). — 2. B pravraje ° sugata ‖ . — 3. M °ttam nahi°. — 4¹. BM esha bhi° B °ryam te°. — 4². M °bhâshânâm yat kimcid gṛihalimgam gṛihaguptam gṛihamdhvajam gṛihakalpam tant sarvam antarhâye tri° B °kimci gṛihalimga gṛihaguptim gṛihadhvajam gṛihakalpa° M °râni va sâ° BM °rbhavetsuḥ(M °tsu) | sumbhakâni ca pâ° BM °bhâva(M °vâ) samsthito keçâ iryâpathasampattâ(B °sampannâ) sam° M °sthihe | tadyathâ° B °sthihe | sayya° M °yushmamtânâm pamcânâm çâ ° sampada bhikshubhâvaḥ | .

10¹. M tadâni ° vucyati B °ccati u°. — 10². M °bhikshuḥ yu° B °sya pâda va° M °dâm vamditvâ sarve pratipâṭikâ tishthamti | B °pâṭikâ pra°.

11. BM yâ ca pra° M °lisya ca pâdau vamditvâ patipâtikâ° B °sthâsyati | so°. —.

12. M tadâni bha° BM °lisya pâdâm vandi(M °vamdi)tvâ° M °çatâ pratipâṭikâye° BM °sthitâ api°. — 14¹. M °jitum mahâjanakâyaivam âha ‖ B °jitu mahâm ja ° ha ji°. — 14². BM jitâ mânakro° M °rpâ çâkyo ti B °ti râ°. — 15. B râjâpi çu° M °lisya ca bhikshusya pâdâm vamditvâ B °kshusya pâdam vanditvâ â°.

16¹. M °pâlim eva°. — 16². M svâgatam râjño çuddhodasyânu ° sya upâli | B °nurâga ° sya upâlisya ‖ . — 17. M °yushmamtam upâli tam râ° B °upâli tam râ ° danam nâtmana âbhâyantam kshavas tam bhavikâyatsuḥ ka° M °danam âtmaja â — shamtam bhikshavaḥ tam bhâvikâyetsu. — 19. BM °râjâ çu°.

राजापि शुद्धोदनो तेषां पारिषद्यामात्यानामाह ॥ मा भवन्तो आर्यस्य उपालिस्य हीनजात्येन समुदाचरथ । अन्यास्य पुरिमा जाति अन्या एतरहिं श्रमणस्य राजऋद्धि न एष भूयो हीनजात्यो ति वक्तव्यः ॥

भिक्षू भगवन्तमाहन्सुः ॥ पश्यथ भगवं कथमायुष्मतो उपालिस्य हीनजात्यस्य भगवन्तमागम्य सराजिकाय परिषाय पादा वन्दिता ॥ भगवानाह ॥ न भिक्षव एतरहिमेव एतस्य उपालिस्य हीनजात्यस्य ममागम्य सराजिकाय परिषाय पादा वन्दिता अन्यदापि एतस्य उपालिस्य हीनजात्यस्य ममागम्य सराजिकाय परिषाय पादा वन्दिता ॥ भिक्ष भगवन्तमाहन्सुः ॥ अन्यदापि भगवन् ॥ भगवानाह ॥ अन्यदापि भिक्षवो ॥

भूतपूर्वं भिक्षवो अतीते ध्वनि नगरे वाराणस्यां काशिजनपदे द्वे दरिद्रा दारका कुल्माषपुटकानि भक्तं गृह्य काष्ठहारका गच्छन्ति प्रत्येकबुद्धो च वाराणसीं पिण्डाय प्रविशति प्रासादिकेन ईर्यापथेन अभिक्रान्तप्रतिक्रान्तेन आलोकितविलोकितेन संमिंजितप्रसारितसंघाटी पात्रचीवरधारणेन नागो पि विय कारितकारणो अन्तर्गतेहि इन्द्रियेहि अन्तर्गतेन मानसेन स्थितेन धर्मतामाप्तेन स्मृतः संप्रजानो समाहितो एकाग्रचित्तो संवृतेन्द्रियो अविक्षिप्तदृष्टी ॥ ते खु तं दृष्ट्वा प्रसादमुपसंक्रमन्ति ॥ ते दानि प्रसन्नचित्ता अन्योन्यं एवमाहन्सुः ॥ ये केचिद्दारका रुक्षवृत्तिका अशनवसनविप्रहीना मनुष्यदुर्गता मनुष्यकृपणा मनुष्यवराका यथा वयं चान्ये च सर्वे एदृशेषु द्विपादकेषु पुण्यचेत्येषु कुशलमूलानि न कृत्वा ये केचित्पुन-

1¹. BM °shâm vâhyamâtyânâm â(B °nâs â)ha | . — 1². M °bhavamto â ° jâtera sa°. — 2. BM anyasyâ pu° B °jâti anya eta° M °anyaitarahim çravaṇa° B °çramaṇo sya râjariddhi yo na esha° M °ddhi ye na esho bhûyo hinasamteti va° B °hânasamnyeti va°. — 4¹. M atha bhikshur bhagavamtam âhansu || B bhikshu bha°. — 4². M paçyata bhagavan katha ° hhagavamtam â ° dâ vamditâ || bhi° (*l.* 8¹). — 5². B °va etarahimm evam e ° tasya upâli hina ° nditâ bhi°.

8¹. M bhikshur bhagavamtam âhatsuḥ || B °gavamtam â°. — 8². M °gavan bhaga°. — 9. M °kshavaḥ B °vo bhû°. — 10. B °dhvani nânagarâto vârâṇasyâm° M °dhvani nâma nagarâto vârâṇasyâm ° de daridrâ dâradâ ca kâkulmâshapûta° B °hya kâshṭahâ° M °gacchamti pratye ° ṇasyâm piṇḍâ ° kena iryâ° BM °pathena atikrânta(M °krâmta)pratikrânte(M °krâmte)na ° âlokita(M °kina)vilokitena sasmiñjita(M °jina)pra° B °ghâti pâtra° M °go viya ° ṇo antargatehi imdriye° B °samâhito | e° BM °drishṭo pa°. — 15. BM parshâ tam° B °kramantena dâ° M °kramantena nishprapanna°.

16¹. M °cittâḥ | anyonyam evam evam âhatsu | B °nsuḥ ye°. — 16². B °ddâraka kricchavri° M °çanacasanaviprahîtâ manushyadurgatâ macashyakripaṇâ manushyacarâkâ yathâ° B °panâ manushyavarâkâ yathâ° BM °yam yam cânye ca(M °va) sa° M °sarvam edriçeshu dvipâdayeshṭha puṇyakshe° B dhano mahâbhogo ksha ° vâ anya vâ ke° M °evamrû°.

राढ्या महाधना महाभोगा क्षत्रियमहाशाला वा ब्राह्मणमहाशाला वा अन्ये वा केचित्सुखिता सर्वे ते एवरूपेषु द्विपादेषु पुण्यचेत्येषु कुशलानि कृत्वा । यं नूनं वयं इमां कुल्माषां इमस्य ऋषिस्य पात्रेषु प्रतिष्ठापयेम ॥ तेहि दानि ते कुल्माषा तस्य प्रत्येकबुद्धस्य पात्रेषु प्रति[320ᵃ]ष्ठापिता ॥ प्रत्येकबुद्धो पि तेषां दारकानां तां भिक्षां प्रतिगृह्य हंसराजा विय वैहायसेन प्रक्रमितो ॥ ते दारका तं प्रत्येकबुद्धं वैहायसेन गच्छन्तं दृष्ट्वा प्रीतिसंजाता महाभागो अस्माभिः ऋषिः पिण्डपात्रेण प्रतिमानितो ॥ ते दानि प्रीतिसौमनस्यजाताः प्रणिधानं उत्पादेन्ति ॥ एको आह ॥ अहं अनेन कुशलमूलेन राजा भवेयं क्षत्रियो मूर्धाभिषिक्तो ॥ द्वितीयो आह ॥ अनेन कुशलमूलेन ब्राह्मणमहाशालकुले उपपद्येयं आढ्यो महाधनो महाभोगो ॥

न हि चित्तप्रसन्नेन स्वल्पिका भवति दक्षिणा ।
तथागते च संबुद्धे ये च बुद्धान श्रावका ॥
सर्वे क्षयान्ता निचयाः पतनान्ताः समुच्छ्रयाः ।
संयोगा विप्रयोगान्ता मरणान्तं हि जीवितं ॥

ते दानि दारका आयुक्षयाच्च कर्मक्षयाच्च कालगता समागता तत्रैव वाराणसीयं नगरे । एको पि राजकुले राज्ञो अग्रमहिषीये उपपन्नो द्वितीयो पि पुरोहितकुले पुरोहितस्य भार्यायै कुक्षिस्मिं उपपन्नो ॥ कालेन समयेन राजभार्या पुरोहितभार्या च प्रजाता । उभये दारका जाता ॥ उभयेषां सप्ताहं रमणीयानि जातकर्म्माणि कृतानि सप्ताहस्यात्ययेन राजपुत्रस्यापि ब्रह्मदत्तो ति

2. M °vayam imam kulmâshâm imasya ri ° shṭhâpayenayena | . — 3. M tehi dâni ku° B °shṭhâpi pra°. — 4. M °kânâm nâm bhikshuṇâm bhikshâm ° hâyastena pra° BM °to te°. — 5. BM otari(B °ri)tvâ kâyam pra° M °gacchamtam dṛishṭvâ pritâ samjâ° B °prisamprajâtâ° M °smâbhi ri ° mânito | .

7. M te dânim pri ° dhânam utpâdamîti B °tpâdemîti || . — 8¹. BM eshâm aham°. — 8². M °anye ku° BM °triya mû°. — 9². M °upapadyamte | â° BM °go na°.

11. M °hi viprasa ° bhavadakshiṇâḥ | . — 12. M °ye nvabuddhân çrâvakâ ca B °kâsa°. — 13. M °kshayâmtâ nicayâḥ yanamtâḥ samucchrayo B °cchrayâḥ sam°. — 14. M mamyogâviprasamyogântâ maraṇâmtam hi°. — 15. M te dânim dâraka âyukshayâcca puṇyakshayâcca kâlagato samâgatâḥ | tatrai° B °yukshayâcca kâlagato samâgato | tatrai° BM °re e°.

16. B °jakula râjño° BM °shîye upapanno | (M °nnaḥ) dvi° M °upapannâ | . — 17. M °yena navânâm mâsânâm atyayana râ° BM °jâtâ u°. — 18¹. B ubhayo dâ ° tâ u°. — 18². BM °niyâni jâ° M °hmadato pi nâmam kritam puro ° nâmam kritam | B °ko ti nâma kritam anu°.

नाम कृतं पुरोहितपुत्रस्यापि उपको ति नाम कृतं ॥ अनुरूपा धात्री उपस्थापिता राजपुत्रो च पुरोहितपुत्रो च यथा उत्पलं वा पदुमं वा कुमुदं वा पुण्डरीकं वा तथा संवर्धन्ति ॥ यथोक्तं भगवतां ॥

कृतपुण्या हि वर्धन्ति न्यग्रोधा विय सुभूमियं जाता ।
अनुपन्थके विय द्रुमा अल्पपुण्या विहीना त्ति ॥

ते दानि यच काले विवृद्धा विज्ञप्राप्ता संजाता ततो लिपीयं पि सेखियन्ति लेखाशिल्पगणनां धारणमुद्रां ॥ राजपुत्रो पि ब्रह्मदत्तो हस्तिस्मिं अश्वस्मिं धनुस्मिं त्सरुस्मिं धावितस्मिं लंघिते जविते द्रव्यस्त्रज्ञानेषु सर्वत्र गतिंगतो संजातो ॥ पितरे च कालगतेन ब्रह्मदत्तो कुमारो अमात्येहि वाराणस्यां राज्येनाभिषिक्तो ॥ उपको च माणवको अन्यतराये माणविकाये सार्धं प्रतिबद्धचित्तो अभूषि ॥ सो दानि ताये माणविकाये कस्मिंचिदेव स्थाने कंचित्कालं अवसादितो अभूषि न तं ओलोकेति । वाराणसीयं च कौमुदी चातुर्मा[320b]सी उपस्थापिता सापि माणविका उपकस्य माणवकस्य भावानुरक्ता प्रत्यागता ॥ माणव कौमुदी चातुर्मासी उपस्थिता गन्धमाल्यं मे उपस्थापेहि यथा कौमुदी चातुर्मासी रमणीयं करेयाम ॥ सो दानि माणवको तस्या माणविकाये श्रुत्वा तुष्टो आत्तमनो अभूषि । दिष्ठा मे माणविका प्रत्यागता ति ॥ तस्य दानि उपकस्य माणवकस्य गंगाकूले माष अपरस्य पुरुषस्य सकाशातो याचनकं लब्धं । सो च नं माषो तत्रैव गंगाकूले गोपितको अभूषि ॥ सो दानि तस्य माषस्य अर्थाये विघने

1. M °laṁ vâ padmaṁ vâ puṇḍa ° rddhayaṁti | . — 3. BM °tâ kṛi°. — 4. M °puṇyo hi ° dhâ vipa subhûmiyaṁ jâ°. — 5. B °nthaka vi° M °nthakâ ciya dru ° hinaṁ ti | B °hinanti | .

6. M tadâni yana kâlaṁ vivṛi° B °kâlaṁ vivṛi° BM °piyaṁ yaṁ sekhiyanti(M °yaṁti) vikshipaçâ(M °sâ)ga° M °ṇanâ dhâ°. — 7. M °tto histismiṁ açvesmiṁ dhanusmiṁ sarûsmiṁ dhâvitesmiṁ laṁghite jiveta i° B °dhanusmiṁ sarusmiṁ dhâvitesmiṁ iṁghi° M °shu ca sarva°. — 10¹. M °vako ?va anya ° prativarddhanvito a° B °prativarddhaci°. — 10². M °tâye mâṇavakâye kasmicidveva sthâne° B °d evaṁ sthâne ° shi | naraṁ âlasheti vâ° M °shi na tam âlesati | .

12. M °siyaṁ kau ° rmâsya upasthâpitâḥ so pi° B °upasthâyitâ so pi° BM °nurakto pra° M °gataḥ ‖ . — 13. M sâ tam âha | mâṇava kaumudi câturmâsi upasthitâ gaṁdham â° BM °sthapeti | ya°. — 15. M °dâniṁ mâṇavake ta° BM °shi dṛi°.

16¹. BM dṛishṭvâ me° M °gateti | . — 16². M °dâni u ° sakâsâto vâca° B °çâto vâca°. — 17. M °traivaṁ gaṁgâkûla go°. — 18. M °rthâya vidyate madhyâ ° dhurâye kaṇḍanâriye gi° B °dhurâye karṇṇe nâriye gi° M °gâyaṁto gaṁgâkulaṁ kulaṁ ta° B °kûlaṁ ta° M °mâshaṁsya a°.

मध्याह्ने वर्तमाने हर्षेण मधुराणि किन्नरीय गीतानि गायन्तो गंगाकूले [तस्य माषस्य अर्थाये] गच्छति ॥

अद्राक्षीच्चिरवः राजा ब्रह्मदत्तो उपरिप्रासादवरगतः उपकं माणवकं मध्याह्ने विघने मधुरेण स्वरेण गायन्तं अन्तोनगरातो वहिर्नगरं गच्छन्तं दृष्ट्वा च पुनरस्य उपके माणवके प्रेम्नं निपतितं ॥ यथोक्तं भगवता ॥

पूर्वं वासनिवासेन प्रत्युत्पन्ने हितेन वा ।
एवन्तं जायते प्रेम्नं उत्पलं वा यथोदके ॥
यच मनो निविशति चित्तं वापि प्रसीदति ।
निष्ठां पण्डिता गच्छेयुः संवुत्था मे पुरा भवे ॥

एवं तस्य राज्ञो ब्रह्मदत्तस्य तच उपके माणवके सह दर्शनेन प्रेम्नं निपतितं ॥ तन राज्ञा ब्रह्मदत्तेन उपकस्य माणवकस्य दूतो प्रेषितो ॥ गच्छथ यो एषो माणवको गायन्तो अन्तर्नगरातो वहिर्नगरं गच्छति एतं आनेथ ॥ सो तेहि गत्वा उच्चति ॥ आगच्छ माणवक राजा ते शब्दापेतीति ॥ सो दानि तेहि राजपुरुषेहि राज्ञो सकाशमुपनीतो ॥ देव अयं सो माणवको आनीतो ॥ अथ खलु राजा ब्रह्मदत्तो उपकं माणवकं गाथाये अध्यभाषे ॥

मध्यन्तिके वीतिनते कुक्कुलवत्ततो मही ।
अथ गायसि वक्त्राणि न तापयति आतपो ॥
उपरि तपति आदित्यो हेष्टा तपति वालिका ।
उदग्रचित्तो सुमनो अथ वक्त्राणि गायसि ॥

3. BM °davaragataḥ(M °to) upakaṁ mâṇa(B °na)vakaṁ madhyâ° B °hne vidyane madhu° M °hne vidyane madhurena gâyakaṁ aṁtonagarâto vahnirna ° gacchaṁtaṁ dṛi ° upaka mâṇake pre°. — 5. BM °tâ pû°.

6. BM °rve nivâse(B °sa) nivâse°. — 7. M evam taṁ jâ ° premaṁ u° B °ke ta° M °ke ya°. — 8. B tatra mamo ni° M °nivisaki ci°. — 9. M nishṭhâ piṇḍata gaccheyuḥ vusto me itaḥ puro bhavet evaṁ° B °ṇḍite gacchet saṁvutto me ito pure bhaved evaṁ°. — 10. B °tasya bra ° darçaṁne°.

11¹. BM °râjño bra ° shito ga°. — 11². M gacchathaḥ | yo° B °gacchatha | yo° M °ko gâṁyaṁto aṁtenagarâ° B °antanagarâ° BM °cchati | e ° tha so°. — 12. M °ucyati | B °ti â°. — 13¹. M °ṇavika° BM °bdâvatiti | . — 13². M °tehi râjñâ sakâsam u° B °to de°. — 14¹. B °yaṁ sâ mâ° M °nitâḥ ‖ . — 14². B °mâṇakaṁ gâthâye bhâshe | .

16. M madhyaṁtike vithînate kukkulavanatâ mukhe | B °kkulâvantato mukhe | . — 17. M °gâvasi vaktrâṇi na te tâpi â° B °trâni na te tâpi âtapo u°. — 18. M tâpayaṁti aṁta tâpayaṁti tâm aṁtakâ âtapo uparipatrâhi âdityo hṛishṭâ na pati câliçca te° B °ri tapati | âdi ° kâ u°. — 19. B °no | a°.

अथ खलु भिक्षवः उपको माणवको राजानं ब्रह्मदत्तं गाथाये प्रत्यभाषे ॥

न आतपो तापयति अन्तका तापयन्ति मां ।
अन्तकाश्च विघाताश्च ते तापेन्ति न आतपो ॥
दूरतरं खु अयं तापो यो खु कायं प्रतापये ।
का[3 2 1°]र्या नाम विवादा च ते तापेन्ति न आतपो ॥

राजा दानि ब्रह्मदत्तो उपकं माणवकं गाथाये प्रत्यभाषति ॥

किन्ते जनेति संक्षोभं अयं केन प्रतप्यति ।
तापेन पीडितो कायो तं त्वं आख्याहि पृच्छितो ॥

अथ खलु भिक्षवो उपको माणवको राजानं ब्रह्मदत्तं गाथाये प्रत्यभाषति ॥

वृषली देव कान्ता मे कुंभदासी अरिंदम ।
तस्या उपस्थितो सेवां तयास्मि उपतापितो ॥

अथ भिक्षवो राजा ब्रह्मदत्तो उपकं माणवकं आमन्त्रयति ॥ कहिं माणवक गमिष्यसीति ॥ अथ खलु भिक्षवः उपको माणवको राजानं ब्रह्मदत्तं गाथाये प्रत्यभाषति ॥

माषो मे याचनालब्धो गंगातीरस्मिं गोपितो ।
पुरस्मिमे नगरस्य तदर्थाय व्रजाम्यहं ॥

अथ खलु भिक्षवो राजा ब्रह्मदत्तो उपकं माणवकं आमन्त्रयति ॥ आगमेहि

2. B °mâñ a°. — 3. M °peti na â°. — 4. B °po khu tâyañ° M °po yeshu tâpañ pra° B °paye kâ°. — 5. BM kârya nâma° B °vâdeva te° M °vâdevañ te tâpeti na â°.

6. M °dâniñ bra ° shati | vrisha°. — 7. B °jânanti sañkshobhañ kâyañ prata°. — 8. B kena tepena pîdito ayañ kâyo tañ te â°. — 9. B °jâna bhrahmadatto gâ°. — 10. BM °devi(M °deva)kâ me ° dâsi ariñ(M °liñ)dama ta°.

11. BM °sthito parvatayasmiñ u(M °smi vu)pa°. — 12[1]. M °âmañtraya°. — 13. BM °bhâsheti | . — 15. M mârsho me vâca° B °me vâca° M °labdhañ gañgâtiresmi go° B °tiresmiñ°.

16. BM °sya arthâ° B °ya pravra° M °ya pravrajâsyahañ ‖ . — 17[1]. M °âmañtra-yiti | . — 17[2]. M °hi tâhi tâva° B °ka mûhû°.

तावत् माणवक मुहूर्तं शीतलके गमिष्यसि ॥ अथ खलु उपको माणवको राजानं ब्रह्मदत्तं गाथाये प्रत्यभाषे ॥

येहि अर्थो अयालस्य ऊर्ध्वं तिष्ठन्ति तिष्ठतो ।
याने तु वह्यमानस्य पुरतो धावन्ति धावतो ।
गंसाम्यहं महाराज तस्य माषस्य कारणा ॥

(अथ खलु राजा ब्रह्मदत्तो उपकं माणवकं गाथाये प्रत्यभाषे ॥)

सचे ते अर्थो माषेण अहं माषं ददामि ते ।
करोहि कृत्यं माषेण उष्णे माणव मा व्रज ॥

उपको माणवको आह ॥ यदि देवो माषं दास्यति एतं द्वितीयं माषं एतेहि माषेहि तुष्टा भवे पि वृषली कौमुदीयं च अविघ्नं भविष्यति ॥ अथ खलु उपको माणवको राजानं ब्रह्मदत्तं गाथाये अध्यभाषे ॥

यं च माषं देवो दद्यात्तं द्वितीयं भविष्यति ।
एतेहि द्वीहि माषेहि तुष्टा सा वृषली भवे ॥

राजा आह ॥ अहन्ते माणव दुवे माषाणि दास्यामि मा च उष्णेन पच्यन्तो गच्छाहि ॥ राजा ब्रह्मदत्तो उपकं माणवकं गाथाये अध्यभाषे ॥

सचे ते अर्थो माषेहि दुवे माषा ददामि ते ।
करोहि कृत्यं माषेहि उष्णे माणव मा व्रज ॥

1. M °hmadataṁ gâ°. — 3. BM °arthâ seyâna(M °yâta)sya° B °ûrddhanti tishṭhato anyâ° M °ûrddhati nishṭhato mudâ | . — 4. BM anyâ te ayya(M °te appa)mânasya purato dhâvati dhâvato(M °taḥ |). — 5. M gaṁgâmya° B gaṁsâmahaṁ° M °tasya mârshasya kâraṇâ ‖ sa° B °ṇâ sa°.

7. M °cet te artha mârsheṇa ° mârshaṁ da° B °te ka°. — 8. M °tyaṁ mârsheṇa°. — 9[2]. BM yaṁ vadethâ mâshaṁ(M °mârsha) dâsyati yaṁ ca taṁ dvi° M °tiyam mârshaṁ etehi mârshe tu° B °tehi mâshe tu ° mudriyaṁ°. — 10. M upako mâṇavako atha khalu râ ° gâthaye a°.

12. M paṁca mârsho devasya taṁ dvi° B °devasya taṁ dvi°. — 13. M °mârshehi tu°. — 14[2]. M ahaṁ te mâṇava iva mârshâṇi°. — 15. M °udakaṁ mâ° B °she sa°.

16. BM sarve te° B °rtho mâshâhi dve mâshâ° M °rtho mârshâhi dve ca mârshâ da° B °te ka°. — 17. M °tyaṁ mârshâhi a° B °ṇavakâ vra°.

उपको आह ॥ एते च द्वे माषा तं च तृतीयं भविष्यति आमन्त्रणं च भविष्यति । एवं वृषलीये रमणीयं कौमुदिकं भविष्यति ॥

भवतश्च दुवे माषा तं तृतीयं भविष्यति ।
एतेहि चीहि माषेहि तुष्टा सा वृषली भवे ॥

राजा ब्रह्मदत्तो उपकं माणवकं एवमाह ॥ माणवक उष्णे मा गच्छाहि [321b] अहं ते चयो माषां दास्यामीति ।

सचे ते अर्थो माषेहि भूयो माषां ददामि ते ।
करोहि कृत्यं माषेहि उष्णे माणव मा व्रज ॥

माणवको आह ॥ देव एतानि व चयो माषा तं चतुर्थं भविष्यति आमन्त्रणं तत्र भूयो भविष्यति । एवं वृषलिकाये सार्धं रमणी कौमुदीयं भविष्यति ॥

भवतश्च चयो माषा तं चतुर्थं भविष्यति ।
चतुर्हि देव माषेहि उदग्रा वृषली भवे ॥

एतेन क्रमेण राजा ब्रह्मदत्तो शतसहस्रं उपकस्य माणवकस्य देति तं च माषं न मुंचति । यावदपरार्धेन ततो माषातो न निवर्तितो ॥ तेन दानि राज्ञा ब्रह्मदत्तेन अर्धराज्यं तस्य उपकस्य माणवकस्य दिन्नं । अन्तःपुरातो अर्धं दिन्नं । कोशकोष्ठागाराणां पि दिन्नमर्धममात्यभट्टबलायाणां पि अर्धं दिन्नं ॥

ते दानि उभये राज्यं कारयन्ति । उभौ अर्थानि समनुशासन्ति ॥ सो दानि माणवको पंचहि कामगुणेहि समर्पितो क्रीडति रमति परिचारयति ॥ सो दानि

1². M °mârshâ tañ ° yañ bhavishyati | âmañtraṇañ°. — 2. BM °li rama° M °mudikañ°. — 3. BM bhavâñ dve mâshâñ tañ(M °mârshât tañ) tri°. — 4. M °mârshehi tu°. — 5¹. M °vakam e°. — 5². M °yo mârshâ dâsyâmitti.

7. M sañcaite ar-mârshehi ° mârshâ da° B °te ka°. — 8. M °tyañ mârshehi° BM °ushṇañ mâṇa°. — 9². BM deva e(M °vai)tena ca tra° M °mârshâ tañ ° âmañtraṇa ta ° shyaty evañ°. — 10. BM °shalikâye° B °ramaṇiñ kau° BM °mudi na bha°.

11. M bhagavataçca° BM °mârshâ tañ° M °turtha bha° BM °ti ca°. — 12. M °turbhi deva mârshchi ° bhavet | . — 13. BM °tto râjâ ça° M °upakvasya mâṇa ° ca mârsha na muñcati | B °ca mâsha nañ muñcati | . — 14¹. BM yâvad apa(B °aya)râjyena ta° M °mârshâto na° BM °rttito te°. — 14². M °dâniñ râjñâ ° datena a° B °rddharâjyenasya u° M °jyañm asya u°. — 15. BM °râṇâñ pi dinnañ a(M °nnañm a)rddha° M °lâgrâm api arddha dinnañ | .

17¹. M tadâtiñ ubhayañ râ ° yañti u°. — 17². M °çâsayañti | . — 17³. M °ko yañca ° marpityo kri° BM °kridito rama° M °câreti | . — 18. BM sâ dâni° M °tto anyartham atica u° B °ke citsvasto° M °di karhi cid api ° tato u° BM °datvâ°.

राजा ब्रह्मदत्तो अत्यर्थं अतीव उपकस्य माणवकस्य सन्तिके विश्वस्तो यदि कहिंचि पि गच्छति ततः उपकस्य माणवकश्च उत्संगे शीर्षं दत्त्वा शयति ॥ तस्य दानि उपकस्य राज्ञा शयितेन एतद्भूषि ॥ कथं एकराज्येन दुवे राजानो यं नूनाहं इमं राजानं ब्रह्मदत्तं घातेत्वा अहमेव एको राजा भवेयन्ति ॥ तस्य दानि भूयो एतद्भूषि । न एतन्मम साधु भवेय न प्रतिरूपं यमहं राज्ञो ब्रह्मदत्तस्य कृतज्ञस्य अकृतज्ञो भवेयं ॥ द्वितीयं तृतीयकं पि एतद्भूषि । न एतं साधु भवेय न प्रतिरूपं यं एके राज्ये दुवे राजानो यं नूनाहं राजानं ब्रह्मदत्तं जीवितातो व्यवरोपयित्वा अहमेव एको काशिराजा भवेयं ति ॥ तस्य दानि द्वितीयकं तृतीयकं पि एतद्भूषि । न एतं मम साधु भवेय न प्रतिरूपं यं अहं राज्ञो ब्रह्मदत्तस्य कृतज्ञस्य अकृतज्ञो भवेयन्ति ॥ सो दानि अविधाविधन्ति प्रव्रजितो तेन राजा ब्रह्मदत्तो प्रतिबुद्धो ॥ सो तं आह ॥ उपक अविधाविधन्ति वचि ॥ सो दानि आह ॥ एवंरूपो मे देव चित्तो अभूषि । यं नूनाहं ब्रह्मदत्तं जीवितातो व्यवरोपयित्वा अहमेव एको काशिराजा भवेयं [322a] ति ॥ तस्य सो ब्रह्मदत्तो राजा न पत्तीयति ॥ सो दानि उपको आह ॥ एवमेतं देव यथा तं जल्पामीति ॥ अथ खलु राजा ब्रह्मदत्तो उपकं माणवकं गाथाये अध्यभाषे ॥

दिन्नो मे अर्धराज्यं ते स्तोकस्तोकेन माणव ।
एकं मुंचसि न माषं कथं अन्तो भविष्यति ॥

अथ खलु उपको माणवको राजानं ब्रह्मदत्तं गाथाये प्रत्यभाषि ॥

न हि अन्तो अनन्ताये तृष्णाये इह विद्यति ।
प्रव्रजिष्याम्यहं राजन् न राज्येन रतो स्मि च ॥

2. M °yitenaitad a°. — 3. M °nûnâmhañ imañ râja bra° B °râjañ bra° M °ghâṭetvâ aham evam eko bha°. — 4. M tasya idâniñ bhû° B °shi na e°. — 5. M naitañ ma° BM °bhaveyañ na° M °ttasya kṛita | sya° B °veyañ dvi°.

6¹. B °tṛitiyañkañ° M °tṛitiyañke pi°. — 6². M na râjye du° B °tañ mama sâ bhaveyañ na ° yañ ahañ eke° M °râjâto anurûpo yañ° B °jâno anurûpo yañ° M °râjatañ bra° B °râjâ bra° M °vyaparo ° râjo bhaveya ‖ . — 8. M tasyedâ° B °tiyaka tri ° shi na°. — 9. M naitañ sâdhu mama bha° B °sâ bha° BM °veyañ na° M °pañ yam a° BM °datta kri° M °veyañ ti | . — 10. M sâ dâni abhidhâvidhañ ti ° râjñâ bra°.

11¹. M so tam â°. — 11². M °abhidhâvidhañ ti vucyati ‖ B °ti vakshati ‖ . — 12¹. M °po ye devadatto abhû° B °devañ ci°. — 12². M °m evam eko kâ°. — 13. M °datto pattîyasi B °ttiyâyati ‖ . — 14³. M etam e°. — 15. M upa ° abhyabhâshate ‖ .

16. M dinnâ me° B °râjye stoka° M °jyañ tokastoke° B °va kena muñ°. — 17. M °kena mucasi na mârshañ katham añto bha° BM °shyati ‖ . — 18. BM °râjañ bra° M °datañ gâ°. — 19. BM nâsti anto(M °añto) ana ° dyati pra°. — 20. B °shyâmi ahañ ° jyena natâpi va | M °jyena târayañti ca ‖

बहूहि कामेहि अलं मे येहि बालो न तृप्यति ।
अलं मे सर्वकामेहि प्रव्रजिष्यामि नगारियं ॥
काम जानामि ते मूलं संकल्पात्काम जायसे ।
न कामं कल्पयिष्यामि ततो मे न भविष्यसि ॥
अल्पेषु बालो कामेषु बहूष्वपि न तृप्यति ।
अपहाय सर्वकामानि प्रतिबुद्धो व पश्यति ॥
इच्छामि दानं प्रभवन्ति च ते
इच्छा प्रशान्ता च न भोन्ति एवं ।
एतं व इच्छाय फलं विदित्वा
न प्रार्थये पुत्रपशुं धनं च ॥

अथ खलु उपको माणवको ब्रह्मदत्तं राजानमेतदुवाच ॥ अनुजानाहि मे देव प्रव्रजिष्यामि ॥ राजा आह ॥ मा प्रव्रजाहीति सहिता राज्यं कारयिष्यामः ॥ उपको आह ॥ न महाराज राज्येन अर्थो अनुजानाहि मे प्रव्रजिष्यामि ॥ सो दानि राज्ञा ब्रह्मदत्तेन अनुज्ञातो यदि एवं अभिप्रायो प्रव्रजाहीति ॥

तहिं दानि काशिषु उत्तरेण कुम्भकारस्य प्रव्रजितस्य ऋषिस्य पंचाभिज्ञस्य आश्रमपदं ॥ सो दानि उपको माणवको तमाश्रमपदं गत्वा तस्य कुम्भकारस्य प्रव्रजितस्य ऋषिस्य सकाशातो प्रव्रजितो ॥ तेन दानि पूर्वराचापररात्रेण जागरिकायोगमनुयुक्तेन विहरन्तेन युज्यन्तेन घटन्तेन व्यायमन्तेन चत्वारि ध्यानानि उत्पादितानि महर्द्धिको महानुभावो ऋषी संजातो चन्द्रमण्डलं सूर्यमण्डलं आश्रमे पर्यंकेन निषण्णो पाणिना परिमार्जति परामृषति यावद्ब्रह्मलोकं कायेन वशे

1. M bahuhi kâmehi anaro ca ye° B °mehi analo ca ye° M °hi bâro na tṛipyaṁti | . — 2. M °shyâmyahaṁ nagâ° B °mi nâgâ°. — 3. BM kâmaṁ jânâ° M °mi taṁm alaṁ°. — 4. M °mi tano me naṁ bha° B °me naṁ bha°. — 5. M °tṛishyati | .

6. M ayahâ ° kâmeshu prativivṛiddho la paçyati ‖ B °ddho tva paçyati ‖ . — 7. M °bhavaṁti° BM° icchâ a(M °icchâ)sânnâya na bhonti(M °bhavaṁti) | . — 9. B etaṁ ete anicchâ° M etena evam aticchâ°.

11¹. B °datta râjâm eta° M °datta râjânena uvâca ‖ . — 11². M amujâtâhi°. — 12². M °prajâhiti° BM °yishyaṁ ‖ . — 13². B °ja | râjyena anartho° M °prajishyâmi | . — 13³. B °vrajyâhiti | . — 15. M taṁrhâ dâniṁ kâçi ° ttareshu kuṁbhakâra pra° B °mbhakâraṁ pra°.

16. B °ṇavako mâṇavako tam âçramaṁpa° M °ṇavako nam âçra ° tvâ tasya kuṁbhakâra°. — 17. M tadâni pû° B te dâni pûrvaṁ râtrâ° M °viharaṁtena pûjyaṁtena ghaṭaṁte | na vyâpayaṁtena catvâri dhyânân pratyâditâ° B °vâyamantena caritvâ dhyânâny utpâ ° bhâvâ ṛi° M °bhâvâ ṛishi saṁjâtâ caṁdramaṁḍalaṁ sûryyaṁ maṁḍalaṁ âçraparyyaṁkena nisharṇṇo pâ ° yena vasa vartteti ‖ .

वर्तेति ॥ अथ खलु राजा ब्रह्मदत्तो उपकस्य माणवकस्य स्पृहयन्तो अभीक्ष्णं इमां गाथां भाषति ॥

अल्पस्य इमं महाविपाको
उपको अध्यगमे महान्तमर्थं ।
सुलब्ध लाभा खलु माणवस्य
यो प्रव्रजे कामरतिं प्रहाय [322ᵇ] ॥

राज्ञो ब्रह्मदत्तस्य अन्तःपुरिका पुनर्पुनः इमां गाथां राज्ञो ब्रह्मदत्तस्य सकाशातो शृण्वन्ति न चास्यार्थं विजानन्ति ॥ तस्य दानि राज्ञो ब्रह्मदत्तस्य गंगपालो नाम कल्पको । राज्ञो ब्रह्मदत्तस्य स विश्वस्तो यथासुखं अन्तःपुरं प्रविशति उपस्थानकरो ॥ सो दानि राज्ञा ब्रह्मदत्तेन उक्तः ॥ गंगपालक केशश्मश्रुं मे करोहीति ॥ एवं वदित्वा ओसुप्तो ॥ तेन तस्य शयितस्य केशश्मश्रु कृतं राजापि विबुद्धित्वा आह ॥ गंगपाल आगच्छ करोहि मे केशकर्म ॥ गंगपालो आह ॥ कृतं ते देव केशश्मश्रुं शयितस्य ॥ सो दानि गंगपालो आदर्शकं गृह्य राज्ञो ब्रह्मदत्तस्य अग्रीनो निध्यायतु देवो ति । राजा आदर्शकेन केशश्मश्रु निध्यायन्तो गंगपालस्य कल्पकस्य प्रीतो संवृत्तो ॥ राजा आह ॥ गंगपाल तुष्टो स्मि तव एतेन शिल्पेन अभिराज्ञो ग्रामवरेण प्रवरेण प्रवारेमि गृह्ण ग्रामं सयदि इच्छसि ॥ सो दानि आह ॥ यावत्संमन्त्रेमि ततो देवस्य सकाशातो ग्रामवरं ग्रहेष्यामीति ॥ सो दानि गंगपालो राज्ञो ब्रह्मदत्तस्य अन्तःपुरिकानां आचिक्षति ॥ अद्य मया राजा ब्रह्मदत्तो शिल्पेन आराधितो ग्रामवरेण चाहं प्रवारितो गृह्णामि ग्रामव-

1. M °hayaṁto a° B °bhishṇaṁ i° M °gâthâ bhâ°. — 3. M °vipâkaṁ upako adhvagate mahâṁtam arthaṁ B °ko adhvagame mahanta artha su°. — 5. M sulabdhe lâ° BM °ṇavakasya° M °vrajitu kâ° BM °hâya tapati râ°.

7. M râjño brahmadaṁttatasya aṁtaḥpurikâ punaḥ imâṁ gâthâ râ ° ṇvati na ° jânaṁti | . — 8. B °gaṁgâpâ° BM °ko râ°. — 9. M °sya saṁviçvastâ yathâsukhaṁ aṁtaḥpu°. — 10¹. M so dâniṁ râjño brahmadatto ukto B °rajñe bra ° ktaḥ gaṁ°. — 10². M °pâraka keçaçmaçrutva ca râ° (*l. suiv.*) B °keçmaçruṁ°.

11¹. B °vaṁ viditvâ ° pto te°. — 11². B °çmaçrutva ca râ° M °râjo pi vibuddhatvâ°. 12¹. B gaṁgâpâ° M °pâra â° BM °ccha karo me° M °karma | B °rmaṁgaṁ°. — 13¹. M °taṁ tad eva keçasmaçru ça°. — 13². B sâ dâ° M °dâniṁ gaṁgâpâ° B °gaṁgâpâ ° sya alino midhyâ° BM °vo ti râ°. — 14. B râjñâ â° M râjño âdarçatakena keçasmaçru ° vṛitaḥ ‖ . — 15². M °pâlâ tushṭo si ta ° bhirâjño grâma° B °ddho grâmavaleṇa prava° BM °gṛihna grâmaṁ°.

17². M yâvaṁtasamaṁtremi° B yâvat samantre° M °raṁ gṛihishyâ°. — 18¹. M °tta aṁtaḥpu° BM °kânâṁ âcakshati | . — 18². M °yâ râjñâ bra ° dhito grâmavaṇa câ° BM °gṛihnâmi° M °grâma cariti | .

रन्ति ॥ अन्तःपुरिका आहन्सुः ॥ मर्षेहि ग्रामवरं एषो राजा अभीक्ष्णमिमां गाथां भाषति ।

अल्पस्य इमं महाविपाको
उपको अध्यगमे महान्तमर्थं ।
सुलब्ध लाभा खलु माणवस्य
यो प्रव्रजे कामरतिं प्रहाय ॥

वयं च एताये गाथाये अर्थं न विजानामथ । ततो गच्छ राजानं ब्रह्मदत्तं जल्पाहीति अलं मे देव ग्रामवरेण यं देवो अभीक्ष्णं इमां गाथां भाषति ।

अल्पस्य इमं महाविपाको
उपको अध्यगमे महान्तमर्थं ।
सुलब्ध लाभा खलु माणवस्य
यो प्रव्रजेत्कामरतिं प्रहाय ॥

एतस्य मे महाराज अर्थं आचिक्षाहीति ॥ सो दानि गंगपालो राज्ञो ब्रह्मदत्तस्य उपसंक्रमित्वा आह ॥ देव अलं मे ग्रामवरेण यं देवो अभीक्ष्णं इमां गाथां भाषति ।

अल्पस्य इमं महाविपाको
उपको अध्यगमे महान्तमर्थं ।
सुलब्ध लाभा खलु माणवस्य
यो प्रव्रजेत्कामरतिं प्रहाय ॥

इमस्या देव गाथाये अर्थमाख्याहि ॥ एतं मे वरं भवतु ॥ राजा आह ॥

1¹. B °hatsuḥ ‖ M °hatsu ‖ . — 1². M madehi grâ ° gâthâ bhâ°. — 3. M alpasyemaṁ° vipâka upako mahâvipâko adhvagame mahâṁtam arthaṁ B °adhvagate mahântaṁ arthaṁ su°. — 5. BM °lu brâhmaṇasya yo°.

7¹. M °ca yetâye artha vijânâmitha | . — 7². BM °râjaṁ bra° BM °ti | alaṁ° M °yaṁ devâ abhi° BM °gâthâ bhâsha(M °shaṁ)ti | . — 9. B °sya mahâvipâko adhvagame° M °vipâke adhigame mahâṁtam a° B °hântaṁ arthaṁ su°.

11. M °vraje kâma° BM °hâya e°. — 13¹. M °artham ovikshâ°. — 13². BM °gaṁgâpâ°. — 14. M °yaṁ devâ abhi ° gâthâ bhâ° BM °ti | a°.

16. B °sya mahâ ° adhvaga° M °mahâṁtaṁ artha B °rthaṁ su°. — 18. B °lu brâhmaṇasya yo° M °bhâ mahâbrâhmaṇa khala yo pravraje kâmara° B °t kâmaṁra° BM °hâya i°. — 20¹. BM imasya devo gâ°. — 20². M °me bhavatuṁ ‖ . — 20³. M °jâ ââha ‖ .

उपको [323ᵃ] माणवको अर्धराज्यमपहाय कामेषु आदीनवं दृष्ट्वा ऋषिप्रव्रज्यां प्रव्रजितो सो च पंचाभिज्ञो महाभागो ऋषि संवृत्तो अहं च कामेषु प्रमत्तो । सो हं तस्य उपकस्य माणवकस्य स्पृहयन्तो अभीक्ष्णं एतां गाथां भाषामि ॥ सो दानि गंगपालो राज्ञो श्रुत्वा अन्तःपुरं प्रविश्य अन्तःपुरिकानाश्वासेति ॥ तस्य मा उत्कण्ठथ न राजा प्रव्रजिष्यति । तस्य उपकस्य माणवकस्य स्पृहयन्तो राजा अभीक्ष्णं एतां गाथां भाषति ॥ इदानीं अन्तःपुरिका हृष्टा तुष्टा आत्तमना हिरण्यस्य सुवर्णस्य च वस्त्राभरणानां च महान्तं राशिं कृत्वा गंगपालमाहन्सुः ॥ गंगपाल इदन्ते अभिक्षादं भवतूति ॥ तस्य दानि गंगपालस्य एतदभूषि ॥ सो च नाम उपको माणवको आढ्यो गृहमपहाय प्रव्रजितः किं पुनर्मया न प्रव्रजितव्यं भवेय । यं नूनाहं पि प्रव्रजेयं किं मे परेषां चित्तेन कार्यं ॥ सो दानि अन्तःपुरिका आह ॥ अलं मे तेन हिरण्यसुवर्णेन अहं पि प्रव्रजिष्यामि ॥ सो दानि ब्रह्मदत्तस्य उपसंक्रमित्वा आह ॥ देव अनुजानाहि मे प्रव्रजिष्यामि इति ॥ राजा आह ॥ कस्य सन्तिके प्रव्रजिष्यसि ॥ सो आह ॥ उपकस्य ऋषिस्य सन्तिके प्रव्रजिष्यामि ॥ राजा आह ॥ अनुजानामि प्रव्रजाहीति ॥

सो दानि गंगपालो उपकस्याश्रमं गत्वा प्रव्रजितो ॥ तेनापि पूर्वरात्रापररात्रं जागरिकायोगमनुयुक्तेन विहरन्तेन युज्यन्तेन घटन्तेन व्यायमन्तेन चत्वारि ध्यानानि निष्पादितानि पंचाभिज्ञा साक्षीकृता चन्द्रमण्डलसूर्यमण्डलपरिमार्जको ऋषि संवृत्तो ॥ अश्रोषीच्चिचवो राजा ब्रह्मदत्तो सर्वे ते चयो ऋषयो पंचाभिज्ञा संवृत्ता ते महर्द्धिका महानुभावा । तस्य दानि तेषां ऋषीणां दर्शनकामता

1. M °jyam avahâya ° âditavaṁ ° so yaṁ paṁcâ° B °vṛitto | ahaṁ° M °haṁ ca kâmeshu pravṛitto B °pramatto so ahaṁ°. — 2. M ahaṁ° B °spṛihavanto° M °spṛihayaṁto a ° gâthâ bhâsheti ‖ B °bhâshyasi | . — 3. M °gaṁgâpâ ° çrutvâ aṁtaḥpuraṁ ° çitvâ aṁtaḥpurikâtâṁ âçvâsati ‖ B °çvâsati ‖ . — 5¹. M °ṇthana râjâ pravrajiṛshyati | . — 5². M °spṛihaṁyaṁto râ° BM °gâthâ bhâ°.

6. M idânîṁ aṁtaḥpurikâṁ citâ tu° B °rikâ cittâ tu° M °nâṁ ca mahâṁtaṁ râ ° hatsu | B °nsuḥ gaṁ°. — 8¹. B °asicchâ° M °cchâdacaṁ bha° B °ti ta°. — 8². M tasyedânîṁ gaṁgapâlasyaita°. — 8³. M sâ ca tâma u° B °nâmaṁ u° BM °âgho gṛi° M °hâya pravrajito kiṁ ° na prajitavyaṁ° BM °veyaṁ | . — 10¹. M °shâṁ cito na kârya | . — 10². M °dânîṁ aṁtaḥpu°.

11¹. M me tena rûpavarṇeta ahaṁ pi pra | vra° B ayaṁ me°. — 11². M °dânîṁ bra° B °bradatta°. — 12. M °hi mema pra ° shyâmîti ‖ . — 13². M °sya saṁtike°. — 13⁴. M °shisya saṁtike°. — 14². BM °vrajyâhîti | . — 15¹. M °dânîṁ gagapâlo upakarishisyâ°. — 15². M °pûrvarâjâpara ° ktena pûjyaṁtena ghaṭaṁtena vyâyamaṁte catvâ ° kṛitâ caṁdramaṇḍalasû ° vṛito. — 18. M °bhijño saṁpravṛite pi maha° B °vṛittâ ti ma° BM °rddhiko ma° M °bhâvo B °bhâvâ ta°. — 19. M tasyedânîṁ te ° kâmanâ u°.

IMPRIMERIE NATIONALE.

उद्पासि ॥ सो दानि अमात्यपारिषद्यानामन्त्रयति ॥ गच्छाम तेषां ऋषीणां दर्शनाय कुम्भकारस्य प्रव्रजितस्य च उपकस्य च गंगपालस्य चाश्रमं सर्वे ते वयो ऋषयो चतुर्ध्यानलाभी पंचाभिज्ञा महर्द्धिका महानुभावा ति । सो कालो तथारूपाणां दक्षिणेयानां दर्शनायोपसंक्रमणाय पर्युपासनाय ॥ अमात्यपारिषद्या [323b] आहन्सुः ॥ मा देवो तेषां सकाशं गच्छतु ते नाम इह आनयितव्या ॥ [सो दानि गंगपालो राज्ञो ब्रह्मदत्तस्य आम्रवनं गतो नापितभाण्डं ओलंबयित्वा प्रव्रजितो ॥ अथ खलु अन्यतरो राजामात्यो राजानं ब्रह्मदत्तं गाथाये अध्यभाषे ॥

अयमेव सो आम्रवनो ब्रह्मदत्तस्य श्रीमतो ।
यत्र क्षुरं च भाण्डं च ओलंबित्वा प्रव्रजितो ॥]

न देवेन हीनजात्यानां सकाशं गन्तव्यं ति । तेहि नाम देवस्य सकाशमागन्तव्यं ॥ राजा आह ॥ न एष धर्मो यं दक्षिणेया वुच्चेन्सुः इह आगच्छथ राजानं दर्शनायेति । अस्माभिः तत्र गन्तव्यं ऋषयो दर्शनाय ॥ अथ खलु राजा ब्रह्मदत्तो कुमारामात्यसंपरिवृतो येन ते ऋषयस्तेनोपसंक्रमे ॥ अथ खलु गंगपालो ऋषिर्येन राजा ब्रह्मदत्तस्तेनोपसंक्रमित्वा राजानं ब्रह्मदत्तमेतदुवाच ॥ स्वागतं राज्ञो ब्रह्मदत्तस्य निषीदतु राजा ब्रह्मदत्तो ॥ अथ खलु राज्ञो ब्रह्मदत्तस्य अमात्यपारिषद्या गंगपालं ऋषिं वाचाये सन्तर्जयेन्सुः सच्छम्बितं करेन्सुः । किं

1¹. M °tyamâri ° dyâm âmaṁtrayati | B °dyâm âma ° ti ga°. — 1². B °ṛishiṇâṁ° M °ya kuṁbhakârasya pravrajitasya upakasya maṇâvakasya gaṁgâpâ ° rve te ṛishayo trayo catu° B °lâbhi paṁ° M °bhâveti | . — 3. BM sâ khalu tathâ° M °ṇeyânâ da° B °ryupâsenâya a°. — 4. M °pârishaṁâṁ ââhatsu ‖ mâ devas teshâṁ ° ihânayi° B °vyâ so°.

6. M so dâniṁ gaṁ ° datasya âçrame ca te te taṁ nâ° B °sya âçramavane te taṁ nâ° M °jitaḥ | . — 9. M °m evaṁ so âçramavane bra° BM °to ya°. — 10. B yatra ca kshuro ya bhâ° M yatra ca kshuro ca bhâ° BM °tvâna pra° B °jito ca de°.

11¹. M °çaṁ gaṁtavyeti ‖ B °ntavyeti ‖ . — 11². B tahiṁ nâ° M tahi nâ° B °kâçaṁ âga° M °kâsam âgaṁtavyaṁ ‖ . — 12¹. M °jâ ââha ‖ . — 12². M naiyo dha ° ṇepâ yucyetsu | i° B °ccetsuḥ i° M °cchatu râjaṁ da° B °râjaṁ da°. — 13¹. M asmâbhir nâma gaṁtavyaṁ°. — 13². B °kumâromâtya° M °rivṛitâḥ ye ° ṛishayo tenopasaṁkrameshu | . — 14. M °shir yyena râjâ brahmadatto teno ° hmadatam etad avocat | . — 15. M °shîdatu | râ°.

16. M °amâtyâ pârishadyâṁ gaṁ ° câye saṁtarjayetsu ‖ sacchaṁ° B °rjayetsuḥ sacchaṁ° BM °retsuḥ kiṁ°. — 17. B kiṁ ca vade° M kiṁ cadesi gaṁgapâlaṁ hi ° mânaṁ râ ° hmadaṁtto samudâcareti ‖ B °hmadatte nâme°.

वदेसि त्वं गंगपाल हीनजात्यो समानो राजानं ब्रह्मदत्तं नामेन समुदाचरसि ॥ अथ खलु राजा ब्रह्मदत्तो तां अमात्यपारिषद्यां गाथाये अध्यभाषे ॥

मा किंचि वदथ गंगपालं
मुनिनां मौनपदेहि शिक्षमाणं ।
एषो अतरे तमर्णवोघं
यं तरित्वान भवन्ति वीतरागाः ॥
तपसा प्रजहन्ति पापकानि
तपसा विधमन्ति अन्धकारं ।
भावन्तपसा अभिभूय गंगपालो
नामेन अभिभाषे ब्रह्मदत्तं ॥
सांदृष्टिकं पश्यथ यावदेवं
क्षान्तिसौरभ्यस्यिदं विपाकं ।
लोकस्य सदेवकस्य प्रव्रज्यं
देवान मनुजान वन्दनीयं ॥

अथ खलु राजा ब्रह्मदत्तो सार्धं अमात्यपारिषद्येहि तेषां ऋषीणां पादौ शिरसा वन्दित्वा एकान्ते निषीदे ॥

तस्य दानि गंगपालस्य या गृहस्थभूतस्य भार्या अभूषि सापि पतिव्रता अन्यं पुरुषं मनसापि न प्रार्थयति ॥ तस्या गंगपालो जिज्ञासनार्थं दिव्येन रूपेण निर्मितेन सुवर्णभाजनमादाय उपसंक्रम्य प्रलोभयति इमं सौवर्णं भाजनं गृह्णाहि मया च सार्धं परिचारेहि ॥ सा दा[324a]नि आह ॥ न हि पतिव्रता अर्हन्ति ॥

2. M °râjâ amâtyopâri° BM °shadyâ gâ° M °ye prabhâshate | . — 3. M °kiṁcid vada° BM °muninâ mau°. — 5. B esho nantare tvam abaṁ tamo yaṁ yaṁ caritvâ° M eshânaṁ tarena mahaṁto mâyaṁ yaṁ caritvâna bhavaṁti | vitarâgâ B °gâḥ ta°.

7. M °jahaṁti pâ ° dhamaṁti | aṁdhakâra B °raṁ bhâ°. — 9. M bhâvaṁ tapa° B °bhûya | gaṁ° M °bhûya | gaṁgâpâ ° bhibhâvaṁ brahmadataṁ B °ttaṁ mâṁ°.

11. B mâṁdri° M °tha | yâvad ekaṁ kshâṁtisau° B °kshântiṁ sau° BM °rabhyam idaṁ vishâkaṁ(M °vipâka) lo°. — 13. M °vânâṁ manujânâṁ vaṁdaniyaṁ ‖ . — 15. M °hmadato sâ ° tyaspapâri° B °tyapâripadye° M °teshâ tṛiṇâ pâdau çirasâ vaṁditvâ ekâṁte ni°.

17. M °gaṁgâpâlasya gṛihasthasya bhâ° B °lasya yo gri ° shi sâpi prativra° M °vratâ atyaṁ pu ° pi na prarthayati | B °ti ta°. — 18. BM tasya gaṁ° B °lo vijñâ ° dishvena râ° M °suvarṇṇaṁ bhâjanam â ° kramitvâ pralobheti | imaṁ sauvarṇṇabhâṁjanaṁ° BM °gṛihnâhi ma ° ricarehi ‖ . — 20¹. B so dâ° M so dânî âha | . — 20². M nabîti pa° B °hi prativra° BM °tâ bhavishyatîti | .

सो दानि देवपुत्रो तं दिवसं प्रत्याचिचितो अपरं दिवसं रूप्यभाजनमादाय उपसंक्रान्तो इमं रूप्यभाजनं प्रतिगृह्णाहि मया च सार्धं परिचारेहि ॥ सा दानि आह ॥ न हि पतिव्रता अहन्ति ॥ तं पि दिवसं प्रत्याचिचितो अपरं दिवसं कांसभाजनमादाय उपसंक्रमे इमं कांसभाजनं प्रतिगृह्णाहि मयापि सार्धं प्रविचारेहि ॥ अथ खलु सा नारी तं देवपुत्रं गाथाये ध्यभाषे ॥

नारी नरो जिह्मये वारणेन
उत्कर्षये यत्र करोति छन्दं ।
विप्रत्यनीकं खलु देवतानां
प्रत्याख्यातो अल्पतरेण एष ॥

अथ खलु देवपुत्रो तां नारीं गाथाये प्रत्यभाषे ॥

आयुं च वर्णं च मनुष्यलोके
प्रहीयते मनुजानां सुगात्री ।
तेनैव वर्णेन धनं पि अर्ज्यं
परिहीयसे जीर्णतरासि अद्य ॥

भगवानाह ॥ स्यात्खलु पुनर्भिक्षवः युष्माकमेवमस्यादन्यः स तेन कालेन तेन समयेन उपको नाम ऋषि अभूषि । न खल्वेतदेवं द्रष्टव्यं । तत्कस्य हेतोः । अहं स उपको नाम तदा ऋषि अभू ॥ नान्यः स ब्रह्मदत्तराजा । एष शुद्धोदनस्तदा ब्रह्मदत्तो नाम काशिराजा अभूषि ॥ नान्यो भिक्षवस्तदा गंगपालो नाम नापितो

1. M °tyâvikshito aparaṁ divasaṁ kâṁsa° (*l.* 4) B °nto iyaṁ rû ° gṛihnâhi ma°. — 2. B so dâ°. — 3¹. B na hi prati ° n ti taṁ°. — 3². BM °grihnâhi mayâ(B °yâ hi) sâ° M °rddhaṁ paricârehi | . — 5. M °traṁ na hi pativratâ ahaṁ pi tam api divasaṁ pratyavikshitaḥ | aparaṁ divasaṁ rûpyabhâṁjanam âdâya upasaṁkrame | imaṁ rûpyabhâṁjanaṁ pratigṛihnâhi sârddhaṁ paricârehi | so dânî âha ‖ atha khaluṁ sâ nârî taṁ devaputraṁ gâthâye adhya°.

6. B °ro nijhapayena dhânena u° M °jihmapayena dhâranena u° BM °utkarshopa yatra° M °ti cchaṁdaṁ B °ndaṁ vi°. — 8. M °tyanikaṁ ° khyânâ alpa°. — 10. M °tro nâṁ nâṁrîṁ gâ°.

11. M arya ca varṇṇaṁ° BM °ke na hi ° gâdhî te°. — 13. BM tena nai° B °naṁ pi uhyaṁ pa° M °naṁ pi dravyaṁ pa° BM °rṇṇatanâsi°. — 15². M °punaḥ bhikshavo yu° BM °m evantasyâ° M °d anyo sa tena kâlena samaye°.

16¹. M °lvevaṁ tad evaṁ drashṭaṁ | B °vyaṁ ta°. — 16². M °hetor ahaṁ°. — 16³. M sa tadâpi upako nâma ṛishi abhûshi. — 17¹. M nânya sa bra°. — 18. B °kshavos tadâ gaṁ° M °pitâ ṛishipravrejito bhût | esha° BM °s tadâpi etasya hînajâtyasya mama âgamya sarâjikâya(M °jâkâye) parishâya pâdâya vanditâ(M °vaṁditâ ‖) etarahiṁ pi | (M °tarhi pi)

ऋषिप्रव्रजितो भूद्देष उपालिस्यदापि एतस्य हीनजात्यस्य मम आगम्य सराजिकाय परिषाय पादा वन्दिता एतरहिं पि एतस्य हीनजात्यस्य ममागम्य सराजिकाय परिषाय पादा वन्दिता ॥

समाप्तं उपालिगंगपालानां जातकं ॥

भिक्षू भगवन्तमाहंसुः ॥ पश्य भगवन् कथं भगवता प्रव्रजितेन महाजनकायो अनुप्रव्रजितो ॥ भगवानाह ॥ न भिक्षवो एतरहिमेव मया प्रव्रजन्तेन महाजनकायो अनुप्रव्रजितो ॥ भिक्षू आहंसुः ॥ अन्यदापि भगवं ॥ भगवानाह ॥ अन्यदापि भिक्षवो ॥

भूतपूर्वं भिक्षवो अतीतमध्वाने राजा दिशांपती नाम अभूषि महागोविन्दीयं सूत्रं विस्तरेण व्याकरोति ॥

भगवान्सम्यक्संबुद्धो यदर्थं समुदागतो तमर्थमभिसंभावयित्वा राजगृहे विहरति गृद्धकूटे पर्वते शास्ता देवानां च मनुष्याणां च सत्कृतो गुरुकृतो मानितो पूजितो अपचितो विस्तरेण कर्तव्यं निदानं याव चेतोवशिप्राप्ता च बुद्धा भगवन्तो येहि ये[324b]हि विहारेहि आकांक्षन्ति तेहि तेहि विहारेहि विहरन्ति ॥ अथ खलु पंचशिखो गन्धर्वपुत्रो अभिक्रान्तवर्णो अभिक्रान्तकायो रात्रीयं केवलकल्पं गृद्धकूटं पर्वतं वर्णेन ओभासयित्वा येन भगवान्स्तेनोपसंक्रमित्वा भगवतः पादौ शिरसा वन्दित्वा एकान्ते अस्थासि एकमन्तस्थितो भगवन्तमेतदुवाच ॥ आरोचेमहं भदन्त

etasya hînajâtya(M °jâti)sya samâga(M °gama) sarâjikâya(M °ya sa) parishâya pâdâ vandi(M °vaṁdi)tâ ‖ .

4. M iti mahâvastuavadâne upâ ° kaṁ samâptaṁ ‖ . — 5¹. M bhikshur bhagavaṁtam âhatsu ‖ B °ntaṁm â°. — 5². M °tena mahâṁto ja° B °anuvrajito ‖ .

6¹. B °etarahiṁm eva° M °yâ pravrajaṁtena°. — 6². M °yâ pravrajaṁtena°. — 7¹. M bhikshu âha ‖ . — 7². M °gavân bhaga°. — 8. BM °vo bhû°. — 9. B °râjâ viṁçâpati° M °râjâ viṁçayati tâma abhûshi | mahâyivistîrṇṇaṁ bhûtaṁ vista° B °shi mahâbhâgo viçvîyaṁ sû° BM °ronti ‖ .

11. M °ksaṁbodhi ya ° mudâgato nam artha ° griddhakuṭe ° naṁ yâvadyetovaçi° BM °prâptâ ca bu° M °bhagavaṁto hi yehi vihârehi â° BM °kâṁkshati | tehi tehi vi° M °haraṁti ‖ . — 14. M °paṁcaçisho gaṁdhacaṁputrau atikrâmtavarṇṇo atikrâmtakâyo° B °tro atikrântavarṇṇo atikrântakâyo° M °râtriyo kevalaṁ kalpaṁ° B °kevalaṁ kalpaṁ° M °gridhrakû ° yitvâ ye ca bhagavâns te ° mitva bhagavâna pâdau ° nditvâ ekâṁte asthâsi ekâṁte sthi ° gavaṁtam etad avocat aro°.

17. M aroce 'muhaṁ bhagavan bhagavato pra ° haṁ bhadaṁta bhagavato yaṁ° M °krasya devânâm iṁdra° B °ndrasya ca mahâ° M °hmaṇâ ca sudharmâṇâṁ devasabhâyâṁ nishasyânâ saṁmukhâcchru° B °nnisharṇṇânâṁ saṁ ° mukhân prati ° bhâshemâṇânâṁ ‖ M °bhâshyamâṇâṁ | .

भगवतो प्रतिवेदेमहं भदन्त भगवतो यं मया चयस्त्रिंशानां देवानां शक्रस्य च देवानामिन्द्रस्य महाब्रह्मणो च सुधर्मायां देवसभायां सन्निषण्णानां संमुखाच्छ्रुतं संमुखात्प्रतिगृहीतं भाषमाणानां ॥ एवमुक्ते पंचशिखं गंधर्वपुत्रं भगवानेतदुवाच ॥ आरोचेहि मे त्वं पंचशिख प्रतिवेदेहि मे त्वं पंचशिख यं त्वया चयस्त्रिंशानां देवानां शक्रस्य च देवानामिन्द्रस्य महाब्रह्मणो च संमुखाच्छ्रुतं संमुखात्प्रतिगृहीतं भाषमाणानां ॥ एवमुक्ते पंचशिखो गंधर्वपुत्रो भगवंतमेतद्वोचत् ॥ एकमिदं भगवन्समयं चयस्त्रिंशा देवा शक्रो च देवानामिन्द्रो महाब्रह्मा च सुधर्मायां देवसभायां सन्निषण्णा अभूत्सुः संनिपतिता केनचिदेव देवानां करणीयेन ॥ तत्र च भगवं एके देवपुत्रा पश्चादुपपन्ना समाना अन्यां पूर्वोपपन्नां देवपुत्रां दिव्येहि पंचहि स्थानेहि अभिभवन्ति आयुषापि बलेनापि यशेनापि श्रियापि परिवारेणापि ॥ एके देवपुत्रा एवमाहंसुः ॥ इमं तावत् मारिष पश्यथ पश्चादुपपन्ना अन्यां पूर्वोपपन्नां देवपुत्रां दिव्येहि पंचहि स्थानेहि अभिभवन्ति आयुषापि बलेनापि यशेनापि श्रियापि परिवारेणापि ॥ तत्र भगवं एके देवपुत्रा एवमाहन्सुः ॥ एते खलु मारिष भगवतो श्रावका भवन्ति । ब्रह्मचर्यं चरित्वा कायस्य भेदात्परं मरणात्सुगतिं स्वर्गं कायं चायस्त्रिंशे देवनिकाये उपपन्नास्ते । एते पश्चादुपपन्ना अन्यां पूर्वोपपन्नां देवपुत्रां दिव्येहि पंचहि स्थानेहि अतीव शोभन्ति आयुषापि [वर्णेनापि] बलेनापि यशेनापि श्रियापि परिवारेणापि ॥ तत्र भगवन् एकेचादेवपुत्र एवमाहन्सुः ॥ अहो पुन मारिष चत्वारस्तथागता अर्हन्तः सम्यक्संबुद्धा लोके

3. B *omet les phrases* 3 *et* 4. M °pañcaçîrshâ gañdharvaputram etad u°. — 4. M °cehi me tvañ pañcaçîrsho prativadehi me tvañ pañcaçîrshañ ya tvayâ °krasya ca devânâm iñdrasya ca mahâ °tañ sañmukhân prati °bhâshyamâ°.

6. M °pañcaçîrsho gañdharva °gavañtam e°. — 7. BM °striñçân de(M °çânâñ de)vânâm indro(M °m idro) mahâ° B °yâñ sannisharṇṇâ abhû° M °yâñ nisharṇṇâ abhûtsu ‖ sañpatitâḥ kena cid eva tañghanîñ karaṇi° B °cid devadevânâñ° BM °yena tatra°. — 9. B °bhagavâñ e° M °bhagavân eka devaputrâ maççâ u °nnâ samâgatâḥ anyâ pûrvopapannânâñ devaputro di° B °nnâñ devaputrâ di° M °vyehi pacahi sthâ °bhavañti âyushenâpi ca ba° B °nti | âyushâpi ca ba° M °çriyenâpi pari°.

11¹. M ekade °m âhansu ‖ . — 11². M °tâvan mâri °d upapannâñ devapu° B °rvopapannâ devapu° M °bhavañti ‖ â° B °nti | â°. — 13. M °gavan ekañ devaputro evam âhatsu | . — 14¹. M °gacato çrâvako bhavañti | B °nti bra°. — 14². M °t para maraṇâ °upapannâ B °s te e°. — 15. M anyâñ pû° B °d upapannâ anyâ pûrvopapannânâñ de° M °rvopapanno de °çobhañti ‖ â° B °bhanti | â°.

17. M °gavan aikena de° B °n ekena de° M °m âhatsu ‖ . — 18. M °punar mârisha catvâraḥ ‖ tathâgatârhatsamya° BM °buddho lo° M °tpadyañsuḥ ‖ dha° B °tpadyetsu dha °çayetsuḥ hitam esyâ° M °çayetsuḥ ‖ hitasmâ devânâñ hitañ mânushâhi | yetsu ‖ âsu° B °hâyatsuḥ âsurâ kâyâ abhivarddhayetsuḥ ta° M °rddhayetsu | .

उत्पद्येन्सुः धर्मं च देशयेन्सुः हितमस्माद्देवानां हितं मनुष्याणां हायेन्सुः आसुरा काया दिव्या काया अभिवर्धयेन्सुः ॥ तत्र च भगवं एके देवपुत्रा एवमाहन्सुः ॥ दुल्लभो मारिष चतुर्णां तथागतानामर्हतां [325ᵃ] सम्यक्संबुद्धानां लोके प्रादुर्भावः । अहो पुनर्मार्ष चयस्तथागता अर्हन्तः सम्यक्संबुद्धा लोके उत्पद्येन्सुः धर्मं च देशयेन्सुः हितमस्माद्देवानां हितं मनुष्याणां च हायेन्सुः आसुरा काया दिव्या काया अभिवर्धयेन्सुः ॥ तत्र भगवन् एके देवपुत्रा एवमाहन्सुः ॥ दुल्लभो मारिष चयाणां तथागतानां अर्हतां सम्यक्संबुद्धानां लोके प्रादुर्भावः । अहो पुनर्मार्ष दुवे तथागता अर्हन्तः सम्यक्संबुद्धा लोके उत्पद्येन्सुः धर्मं च देशयेन्सुः हितमेव स्याद्देवानां हितं मनुष्याणां हायेन्सुः आसुरा काया दिव्या काया अभिवर्धेन्सुः ॥ एवमुक्ते भगवं शक्रो देवानामिन्द्रस्त्रयस्त्रिंशकां देवानामन्त्रयति ॥ अस्थानं खल्वेतं मारिष अनवकाशं यदेककाले द्वौ तथागता अर्हन्तः सम्यक्संबुद्धा लोके उत्पद्येन्सुः धर्मं देशयेन्सुः ॥ एवमुक्ते चयस्त्रिंशा देवाः तुष्टा हृष्टा अभून्सुः आत्तमनाः प्रमुदिता प्रीतिसौमनस्यजाताः ॥

अथ कलु भगवं शक्रो देवानामिन्द्रस्त्रायस्त्रिंशकां देवां तुष्टां हृष्टां आत्तमनां प्रमुदितां प्रीतिसौमनस्यजातां विदित्वा आमन्त्रयति ॥ सचेद्धि यूयं मारिष तस्य

2. M tatra bhagavan aike de °hatsuñ | B °nsuḥ du°. — 3. M durlabho° B dullabhâ mâri° M °turṇṇâ tathâgatânâñ tathâgatânâñ arhatânâñ samya° B °thâgatânâñm arhatâñ saññmya° M °rbhâvâḥ | . — 4. M °r mârishas trayas tathâgatârhan samya° BM °buddho lo° M °dyetsuḥ ‖ dha° B °dyensuḥ | dha °çayetsuḥ hitam asyâñ devânâñ hi manushyâṇâñ hâyensuḥ | âsu° M °çayetsu ‖ hitam asyâñ devânâñ ca manushyâṇâñ hâyetsu âsurâ kâyâḥ a °yetsu | B °rddheyetsuḥ | .

6¹. M °gavan aike de °hatsu B °nsuḥ du°. — 6². M durlabhâ mâri° B dullabhâ mârisha trayânâñ tathâ °rhanta samya° M °nâm'rhatâñ° B °vaḥ a°. — 7. M °punaḥ mârsha iva tathâgatârhatâ samya °ddhânâñ lo °dyetsuḥ ‖ dha° B °dyetsuḥ dha °çayetsuḥ hitam e° M °çayetsuḥ | hitam evam asyâ devânâñ ca manu° BM °hâyetsuḥ âsu° M °divya kâyâ abhivarddhayetsuḥ | B °rddhetsuḥ ‖ . — 10¹. M °gavan çakro devânâm iñdras tra° BM °triñçâñçca de° M °vânâñ mañtrayati | B °vânâñ mantra°. — 10². M aspânaṁ °çaṁ yadai-kâle °rhatasamya° B °ntaḥ saññmya° M °buddho lo °dyetsu ‖ hi° B °dyetsuḥ dha °çayetsuḥ hi° BM *ajoutent :* hitam asyâñ(M °m eva syâ) devânâ(M °nâñ) hitañ manushyâṇâñ(B °ṇâñ bhâvayetsuḥ) hâyetsur(M °yetsuḥ ‖) âsurâḥ(M °râ) kâyâḥ divyâ kâyâ (M °yâḥ) abhivarddhe(M °rddhaye)tsuḥ ‖ .

12. B °tushṭacittâ abhûtsuḥ utta° M °tushṭacitâ prabhûtsuḥ | âtamanâḥ pramuditapri °jâtâ | . — 14. M °gavan çakro devânâm iñdro trâyastriñçakâ ca devâ tushṭâ cittâ âtamanâ pri° B °triñçâñ ca devâ tushṭacittâ âtta° M °tvâ âmañtrayatiḥ | . — 15. M saced yuyañ mâri °to'rhañta saññmya° B °ntaḥ saññmya °tâñ dhamâñ çruṇetha | arvâdâ yû° M °tâñ dharmâ çriṇotha | arvâdâ yûyañ vibhave° B °tushṭacittâ â° M °tushṭâ cittâ â °ditapriti°.

भगवतो र्हतः सम्यक्संबुद्धस्य अष्टावाश्चर्याद्भुतां धर्मा शृणेथ अथ यूयं पि भवेथ भूयस्या मात्रया तुष्टा हृष्टा आत्तमना प्रमुदिता प्रीतिसौमनस्यजाता ॥ एवमुक्ते भगवंस्त्रायस्त्रिंशाश्च देवास्तं शक्रं देवानामिन्द्रमेतदवोचत् ॥ तेन हि मारिष कौशिक प्रतिभातु ते तस्य भगवतो अर्हतः सम्यक्संबुद्धस्याष्टावाश्चर्याद्भुतां धर्मानुदाहर ॥ अथ खलु शक्रो देवानामिन्द्रो भगवतो अष्टावाश्चर्याद्भुतां धर्मा भाषे ॥ यदा खलु मारिष भगवानर्हं सम्यक्संबुद्धो लोके उत्पन्नो हायन्ति आसुराः काया दिव्या काया अभिवर्धन्ति ॥ एवं च बज्रजनहिताय प्रतिपन्नं पुनर्मारिष शास्तारं लोके उत्पन्नं नैवातीतं वा समनुपश्यामि नैतरहिं वा प्रत्युत्पन्नं अन्यत्रैव भगवता अर्हता सम्यक्संबुद्धेन ॥ स्वाख्यातो खलु पुनर्मारिष तथागतस्यार्हतः सम्यक्संबुद्धस्य धर्मविनयः सांदृष्टिक अकालिको एहिपश्यिकः [325b] औपनयिकः प्रत्यात्मवेदयितव्यः विज्ञैः यमिदं मदनिर्मदनं पिपासाप्रतिविनयो आलयसमुद्घातो धर्मोपच्छेदो तृष्णाक्षयो विरागो निरोधो निर्वाणं एवं स्वाख्यातं धर्मविनयं । न पुनः मारिष शास्तारं लोके उत्पन्नं नैवातीतं समनुपश्यामि नैतरहिं प्रत्युत्पन्नं अन्यत्रैव तेन भगवतार्हता सम्यक्संबुद्धेन ॥ लाभी खलु पुनर्मारिष भगवां अर्हं सम्यक्संबुद्धो श्रावकानां शैक्षाणां प्रतिपदं अर्हतां च अकोप्यधर्माणां ॥ तेषामपि च स भगवां अर्हं सम्यक्संबुद्धो प्रनुद्य आरण्यकानि शून्यासनान्यध्यावसति प्रान्तानि विविक्तानि गतजनपदानि मनुष्यरहसेय्यकानि प्रतिसंलयनसारोप्यानि एको गणाद्व-

2. M °gavân trâya ° vânâm imdra | m eta°. — 3. B °kauçikam pra° M °gavato 'rhato samya° B °gavataḥ arhantaḥ sammyaksambusyâshṭamâçca° M °buddhosyâshṭamâçca ° dharmâm udâhare | B °dharmam udrâhare ‖ . — 5. M °nâm imdro bha° BM °ashṭamâçca° B °dharmam bhâshe ‖ M °dharmam abhâshe ‖ .

6. M °rhaṁn sammya° B °nno | hâ° M °tpannâ | hâyamti âsurâ kâyâḥ divyâ kâyâr abhivarddhamti | . — 7. M evam ba ° tipanno pu° B °tipannaḥ pu° M °sha çaram loke utpannam tehi naivâti° B °titam câ samanupaçyâma | nai° M °çyâmi | naitahim na pratyu° B °him na pratyu° M °gavatâ 'rhatâ° B °rhatâ sammya° M °buddhona B °ddhena svâ°. — 9. M °shas tasya tathâ° BM °taḥ sammya ° shṭika akâriko(M °rito) ehipaçyi-(M °çya)kaḥ aupanayikaḥ(M °ko) pratyâ° M °vyaḥ | vijñair yam idam yadanirmadana piyâsâ ° laye samudyâto dharmopatri° B °dghâ dharmopacchedatri° BM °rvâṇa evam ° yam ca pu°.

12. BM ca pu° M °vâtitam samanu° BM °him na pratyutpannam | anya ° rhatâ sammya ° ddhena lâ°. — 14. B lâbhî | kha° M °sha sa bhagavâm arhan samya° BM °pratipâdâm arhatâm(B °hantâm) ca âko° M °dharmaṇâm te° B °ṇâm te°. — 15. M teshâṁm api ca sa bhagavân arhan sammya° B °rham sammya° M °dya pranudyâraṇyâkâni çayyâsanâ dhyâvasati | prâṁtâni vivi° B °âraççakâni çayyâsanâdhyâvasati | prâ° M °shyarahe çayyâkâni pra° B °seyyâkâni pra° BM °shṭo eko ekâ nâmo eko(M °mo ekâ)nâmanâmatâ°.

पकृष्टो एको नाम एकनामनामतामनुयुक्तो । एवमेकनामतामनुयुक्तं पुनर्मार्षा शास्तारं लोके उत्पन्नं नैवातीतं समनुपश्यामि नैतरहिं प्रत्युत्पन्नं अन्यत्रैव तेन भगवतार्हता सम्यक्संबुद्धेन ॥ लाभी खलु पुनर्मार्ष भगवां अर्हो सम्यक्संबुद्धो प्रणीतानां खादनीयभोजनीयानां ऋजुरसानां प्रत्यग्ररसानां । तेषामपि च स भगवानर्हं सम्यक्संबुद्धो आहारमाहरेति । अनध्यवसितो अनधिमूर्च्छितो आदीनवदर्शावी निःसरणप्रज्ञः कामेषु विगतमदो आहारमाहरति । एवं विगतमदं आहारमाहरन्तं च पुनः मार्षा शास्तारं लोके उत्पन्नं नैवातीतं समनुपश्यामि नैतरहिं प्रत्युत्पन्नं अन्यत्रैव तेन भगवतार्हता सम्यक्संबुद्धेन ॥ अभिज्ञाय खलु पुनर्मार्षा स भगवानर्हा सम्यक्संबुद्धो श्रावकाणां धर्मं देशयति नानभिज्ञाय । एवमभिज्ञाय धर्मदेशनाप्रतिपदासंपन्नं च पुनः मार्षा शास्तारं लोके उत्पन्नं नैवातीतं समनुपश्यामि नैतरहिं प्रत्युत्पन्नं अन्यत्रैव तेन भगवतार्हता सम्यक्संबुद्धेन ॥ तीर्णविचिकित्सः खलु पुनर्मार्षा स भगवानर्हा सम्यक्संबुद्धो विगतकथंकथो वैशारद्यप्राप्तः कुशलेषु धर्मेषु । एवं तीर्णविचिकित्सं च पुनः मार्षा शास्तारं लोके उत्पन्नं नैवातीतं समनुपश्यामि नाप्येतरहिं प्रत्युत्प[326a]न्नं अन्यत्रैव तेन भगवता तथागतेनार्हता सम्यक्संबुद्धेन ॥ संस्यन्दति खलु पुनः मार्षा तस्य भगवतः अर्हतः सम्यक्संबुद्धस्य निर्वाणं निर्वाणगामिनी च प्रतिपदा सद्यथापि नाम मार्षा गंगोदकं च जमुनोदकं च संस्यन्दमानं संस्यन्दति महासमुद्रे एवमेव मार्षा तस्य भगवतः सम्यक्संबुद्धस्य संस्यन्दति निर्वाणं च निर्वाणगामिनी च प्रतिपदा । एवं सुदेशितसुप्रज्ञप्तनिर्वाणगामिनीप्रतिपदा-

1. BM evam ekâm nâ° B °yuktâm pu° M °ktam ca pu° mi naitarhi pratyu° B °tyutpannam | a° M °traivam te° B °rhatâ sammya° BM °ddhena lâ°. — 3. B lâbhî | kha° M °punaḥ mârsha bhagavât arhan sammya ° janiyânâ ṛi° B °janiyânâm riju° BM °grarasânân teshâm(B °n tesâ)m api°. — 4. M °vân arhan sammya°. — 5. BM anavadhya° M °dinacadarçâvâ nihçaraṇaprajño kâ° B °darçivî | niḥ° M °hareti | .

6. M °hâraṁ âhâramtam ca pu° B °utpannam | naivâ ° çyâmi | naitarahim° M °mi naitarhi pratyu° BM °nnam | a° M °traivam teca bha°. — 8. M °vân arha samya° B °rhâ sammya° M °dharma de° B °yati | nâ° BM °jñâya e°. — 9. M evam anabhi ° sampûrṇṇam ca pu ° nupaçyîmaḥ naitarahi na pra° B °çyâmaḥ naitarahim na pra° BM °traiva bha ° rhatâ sammya° M °ddhenâ ti°.

11. M tirṇṇam vicikitsâ | kha ° vân arhan sammya° B °rhâ sammya° BM °gatakathaṁ-(M °thâm)kathâ vai ° shu e°. — 13. M °tirṇṇo vicikitsâm ca punar mârshâ çâstâraṁ bho u ° çyâmaḥ nâpyetarhi pra° B °çyâmo | nâpyatarahim na pra° BM °nnam | a° M °gavato tathâ° BM °ddhena sa°. — 15. BM samspada(B sasyandaya)ti | khalu punaḥ mârshâ (M °rsha) tasya bhagavataḥ(M °vatasya) arhantaḥ sa(M °rhan sam)mya° M °sya nirvâṇagâmini ca pratipadâ | sayathâ nâ ° kam ca yamuno ° samsyamda ° samsyamda° BM °ti | mahâsamudre° M °m evam mârshâ ° gavato sammyaksambuddho samsyadati nirvâṇâm ca nirvâṇagâminim ca pratipadâm e° B °padâ samyam nam ca puna° (*p. suiv., l.* 1).

18. M °çitâ suprajñaptâ nirvâṇa nirvâṇagâminî ca pratipadâ sampanna ca punaḥ mârshâ °

संपन्नं च पुनर्मार्षा शास्तारं लोके उत्पन्नं नैवातीतं समनुपश्यामि नाप्येतरर्हिं प्रत्युत्पन्नं अन्यत्रैव तेन भगवता तथागतेनार्हता सम्यक्संबुद्धेन ॥

एवमुक्ते भगवं भूयस्त्रायस्त्रिंशा देवा भूयस्या मात्रया तुष्टहृष्टा आत्तमना प्रमुदिताः प्रीतिसौमनस्यजाताः शक्रं देवानामिन्द्रमामन्त्रयन्ति ॥ तेन हि मार्ष कौशिक पुनरेवं प्रतिभातु ते तस्य भगवतो ऽर्हतः सम्यक्संबुद्धस्य पुनरेवाष्टावाश्चर्याद्भुतां धर्मा ॥ अभ्युद्गहरे खलु शक्रो देवानामिन्द्रो भगवतः पुनरेवाष्टावाश्चर्याद्भुतां धर्मा ॥ यदा खलु पुनर्मार्षा स भगवानर्हा सम्यक्संबुद्धो लोके उत्पन्नः हायन्ति आसुरा काया दिव्या काया अभिवर्धन्ति । एवं बऊजनहिताय प्रतिपन्नं एवं बऊजनसुखाय प्रतिपन्नं च पुनर्मार्षा शास्तारं लोके उत्पन्नं नैवातीतं समनुपश्यामि नाप्येतरर्हिं प्रत्युत्पन्नं अन्यत्रैव तेन भगवता अर्हता सम्यक्संबुद्धेन । एवं पेयालं यावत्संस्यन्दति खलु पुनर्मार्षा तस्य भगवतः सम्यक्संबुद्धस्य निर्वाणं च निर्वाणगामिनी च प्रतिपदा । सय्यथापि नाम मार्षा गंगोदकं च जमुनोदकं च संस्यन्दमानं संस्यन्दति महासमुद्रे एवमेव मार्षा तस्य भगवतो र्हतो सम्यक्संबुद्धस्य निर्वाणं च निर्वाणगामिनी च प्रतिपदा । एवं सुदेशितसुप्रज्ञप्तनिर्वाणधर्मदेशनाप्रतिपन्नं च पुनः मार्षा शास्तारं लोके उत्पन्नं नैवातीतं समनुपश्यामि नाप्येतरर्हिं प्रत्युत्पन्नं अन्यत्रैव तेन भगवतार्हता सम्यक्संबुद्धेन ॥ एवमुक्ते त्रयस्त्रिंशा देवा भूयस्या मात्रया हृष्टा आत्तमनाः प्रमुदिताः प्रीतिसौमनस्यजाताः ॥

अथ ख[326b]लु भगवन्महाब्रह्मा त्रयस्त्रिंशां देवां भूयस्या मात्रया हृष्टां आत्तमनां प्रीतिसौमनस्यजातां विदित्वा शक्रं देवानामिन्द्रमेतद्वोचत् ॥ तेन हि मार्ष कौ-

çyâmaḥ nâpyetarhi pratyu° B °çyâmi | nâpye° M °traivaṁ tena bha° B °rhatâ saṁmya°.

3. B °bhagava bhûyas trâ° M °bhagavân bhûyas tra ° bhûyasyâ moççaryâ° (*l.* 5) B °tushṭa cittâ â°. — 4. B °to 'rhantaḥ samya ° dharmâṁ a° M °dharmân a°.

6. B apyudâhare ‖ atha kha° M apyudâharet | kha ° gavato punar evâshṭau âçca° B °r evâshṭâṁv âçca° BM °dhamâṁ | . — 7. M °punaḥ mâ ° arhan saṁmya° B °rhâ saṁmya ° ke utpannaḥ | hâ° M °utpanna hâyaṁti âsu ° rddhatyeti. — 8. BM °hitâya pratipanno (B °nno |) evaṁ° B °tipannaṁ ca pûrva mârshâ çâ° M °çyâmaḥ nâpyenarhi pra° B °tyutpannaṁ | a°. — 10. M evaṁ yepâlaṁ yâvat saṁsyaṁdate kha° B °ndate kha° M °puna mârshâ ° gavato samya ° gâminî°.

12. M tadyathâ° B °godakaṁ ca sasyandamâ° M °godakaṁ ca saṁsyaṁdamâna saṁsyaṁdati | ma° B °ti | ma° M °dre vam e° B °mevaṁ mâ° M °to 'rhata sa° B °rhatâ saṁmya° M °ddhasya saṁsyandanti | nirvâṇaṁ° B °ddhasya | evam ukte trayastriṁçâ devâ bhûyasya mâtrayâ cittâ âbhûtsuḥ ‖ nirvâṇaṁ°. — 14. M °desitasu ° naḥ mâ çâstâ ° nnaṁ ca naivânîtaṁ° B °nnaṁ ca naivâditaṁ° M °pyetarhi pra ° traivaṁ te ° gavato 'rhansamya°.

16. M °syâ mâtrayânvitâ abhûtsuḥ | âtamanâḥ° B °syâ mâtrayâ cittâ âttamanâḥ pritipramuditâḥ sau°. — 18. M atha bha° BM °gavân mahâbrâhmaṇas trayastriṁçâṁ devi bhû(M °çâ devân bhû)yasyâ ° yâ cittâṁ âttamanâ prî° B °m indraṁm e°. — 19. M °hi

शिक प्रतिभातु ते एतस्य भगवतो र्हतः सम्यक्संबुद्धस्य पुनरेवाष्टावाश्चर्याद्भुतां धर्मा ॥ अभ्युद्गहरे खलु शक्रो देवानामिन्द्रो भगवतः पुनरेवाष्टावाश्चर्याद्भुतां धर्मा ॥ यदा खलु पुनः मार्षा स भगवांस्तथागतो हैं सम्यक्संबुद्धो लोके उत्पन्नो हायन्ति आसुरा काया दिव्याः काया अभिवर्धन्ति । एवं बऊजनहितसुखाय प्रतिपन्नं च मार्षा शास्तारं लोके उत्पन्नं नैवातीतं समनुपश्यामि नाप्येतरर्हिं प्रत्युत्पन्नं अन्यत्रैव तेन तथागतेनार्हता सम्यक्संबुद्धेन । एवं पेयालं यावत्संस्यन्दति खलु पुनर्मार्षाः तस्य भगवतो र्हतः सम्यक्संबुद्धस्य निर्वाणं च निर्वाणगामिनी च प्रतिपदा । सय्यथापि नाम मार्षा गंगोदकं च यमुनोदकं च संस्यन्दमानं संस्यन्दति महासमुद्रे एवमेव मार्षा तस्य भगवतो र्हतः सम्यक्संबुद्धस्य निर्वाणं च निर्वाणगामिनी च प्रतिपदा । एवं सुदेशितसुप्रज्ञप्तनिर्वाणधर्मदेशनाप्रतिपन्नं च पुनर्मार्षा शास्तारं लोके उत्पन्नं नैवातीतं समनुपश्यामि नाप्येतरर्हिं प्रत्युत्पन्नं अन्यत्रैव तेन भगवतार्हता सम्यक्संबुद्धेन ॥ एवमुक्ते त्रयस्त्रिंशा देवा भूयस्या मात्रया हृष्टा आत्तमनाः प्रीतिसौमनस्यजाता अभून्सुः ॥

अथ भगवन्महाब्रह्मा त्रयस्त्रिंशां देवां भूयस्या मात्रया हृष्टां आत्तमनां प्रमुदितां प्रीतिसौमनस्यजातां विदित्वा गाथाभिरध्यभाषि ॥

मोदंति भो पुनर्देवाः त्रयस्त्रिंशा सशक्रकाः ।
तथागतं नमस्यन्ता धर्मस्य सुखधर्मता ॥

ततश्च देवता प्रमुदिता प्रीतिसौमनस्यजाता ॥

mâṇava kau ° bhâgate etasya bhagavatâ'rhansamya° B °taḥ saṁmya ° dbhutaṁ dharmaṁ | M °dbhutân' dharmaparyâyemâṁ | .

2¹. B athodâ° M athodâraihâ kha ° gavato pu ° dbhutadharmâ. — 2². M °rshâ ma bhagavan tathâgato 'rhan saṁmya ° loka u° B °nno | hâ° M °nno hayaṁti âsurâ kâyâḥ divyâ kâyâḥ abbivarddhaṁti. — 4. B °sukhâya pratipannaḥ | evaṁ bahujanahitâya sukhâya pratipannaṁ ca | mârshâ ° çyâme nâpye° M °pyetarhi ta pratyu° B °hiṁ na pratyu° BM °nnaṁ | a° M °traivaṁ tena ta° B °tâ saṁmya°.

6. B °laṁ pâlaṁ yâvat saṁsyandaṁti | kha° M °laṁ pâraṁ yâvan saṁsyadaṁti | khalu punaḥ mârshâ çâstâraṁ tasya ° rhato samya ° ṇaṁ ca nirvṛitau ca nirvâṇagâmi ca pra° B °dâ sa°. — 7. M tadyathâ ° godakaṁ ca pi yamumoda ° naṁ syaṁdayati mahâ° B °naṁ saṁsyandayati mahâ° BM °dre ‖ B °mârsha ta° M °to 'rhato sa° B °to rhaṁtaḥ° M °ddhasya saṁsyaṁdati nirvâṇaṁ°. — 9. B °çitâ supra° M °çinâ supra° BM °çanâpratipadâpratipannaṁ ca pu° M °utpanne naivânîmaṁ samanupaçyâmo nâpyetarhi na pratyu° B °çyâma nâ ° hiṁ na pratyu° BM °nnaṁ | a° M °traivaṁ tena bhagavato rhansamya°.

11. BM °çâ deva bhûya° B °yâ citto âtta° M °yâ tve(?)ttâ âttamanâ prî ° syatâ a° BM °bhûtsuḥ ‖ . — 13. M atha khalu bhagavân ma° BM °hâbrâhmaṇa tra(M °ṇas tra)yastriṁçâṁ(M °çânâṁ) devâṁ(M °vânâṁ) bhû° B °yâ cittâṁ â° M °yâ ciṁttâ âtamanâṁ pramuditâ prî° BM °thâbhi a°. — 15. M °puna devâs tra ° çâ maçakakâ ta° B °kâḥ ta°.

16. M °masyaṁtâṁ dharmasya° B °masyantâṁ dha ° rmatâ na°. — 17. B naratâçca° M naratâçce devâ pramuditâḥ prî°.

अथ खलु भगवं महाब्रह्मा त्रयस्त्रिंशान्देवां भूयस्या मात्रया हृष्टां प्रमुदितां प्रीतिसौमनस्यजातां विदित्वामन्त्रयेसि ॥ सचेद्धि यूयं मार्षास्तस्य भगवतो ऽर्हतः सम्यक्संबुद्धस्य दीर्घरात्रं महाप्रज्ञप्तिं शृणोथ शुश्रूषा यूयं भवेथ भूयस्या मात्रया [327a] हृष्टा आत्तमनाः प्रमुदिताः प्रीतिसौमनस्यजाताः ॥ एवमुक्ते भगवं त्रयस्त्रिंशा देवा महाब्रह्माणमेतद्वोचत् ॥ तेन हि मार्ष महाब्रह्म प्रतिभातु ते तस्य भगवतो ऽर्हतः सम्यक्संबुद्धस्य दीर्घरात्रं महाप्रज्ञप्तिं । अभ्युदाहरे खलु महाब्रह्मा भगवतो दीर्घरात्रं महाप्रज्ञप्तिं ।

भूतपूर्वं भवन्तो तीतमध्वानं राजा दिशांपती नाम अभूषि ॥ राज्ञः खलु पुनर्भवन्तो दिशांपतिस्य गोविन्दो नाम ब्राह्मणो अभूषि पुरोहितः राजाचार्यो पण्डितो निपुणो मेधावी तेषु तेष्वर्थेषु ॥ राज्ञः खलु पुनर्भवन्तो दिशांपतेः पुत्रो रेणुर्नाम अभूषि प्रियो मनापो पण्डितो निपुणो मेधावी तेषु तेष्वर्थेषु ॥ गोविन्दस्य खलु पुनर्भवन्तो ब्राह्मणस्य ज्योतिपालो नाम माणवको अभूषि एकपुत्रको प्रियो मनापः पण्डितः निपुणः मेधावी तेषु तेष्वर्थेषु ॥ अथ खलु पुनर्भवन्तो दीर्घस्याध्वनो त्ययेन गोविन्दो ब्राह्मणः कालमकार्षीत् ॥ अथ खलु पुनर्भवन्तो राजा दिशांपतिः गोविन्दे ब्राह्मणे कालगते शोचति क्लाम्यति परिदेवति उरस्ताडं क्रन्दति सम्मोहमापद्यति ॥ हंभो यस्मिं दानि वयं समये गोविन्दस्य अर्थार्थानि सम्यग्निर्यातयित्वा पंचहि कामगुणेहि समर्पिता समंगीभूता क्रीडाम रमाम परिचारेम तस्मिं समये गोविन्दो ब्राह्मणः कालगतो ति ॥ अश्रोषीत्खलु भवन्तो

1. M °gavân mahâbrahmâs trayastriñçâñ devân bhûyasyâ mâtrayâ abhûtsu ‖ ciñtâ pra° B °yâ cittâñ pra° M °tvâ âmañtrayâmi sa° B °ntrayâsi | . — 2. M °rshâ tasya bha° to 'rhan sañmya° B °'rhantaḥ sañmya° BM °jñaptâñ çriṇotha | çu(M ° | çra)ddhâ° M °bhavatha bhû° B °yâ cittâ â° M °yâ citânâtamatâñ prî° jâtâñ ‖ . — 4. B °gavâñ tra° M °gavân traya° BM °hâbrâhmaṇam eta°. — 5. B °hâbrâhmaṇa pratibhâtu te | ta° M °bhânum etasya bha° to 'rhan sañmya° B °taḥ sañmya° BM °jñaptañ a°.

6. BM °hare | kha° jñaptâñ(M °ptâñ |) bhû°. — 8[1]. M °bhagavato atî° B °râjâñ di° M °jâ viçâñ°. — 8[2]. M râtro kha° r bhadañtto viçâñ° goviñdo nâ° shi | purohito râjâ° B °taḥ râjâ âcâ° M °ṇḍito mipuno me° BM °vî teshu artheshu râ°. — 10. M râjño khalu punaḥ bhavañto viçâñpate putro° r nâmo a° B °r nâmâ a° M °yo manâyo paṇḍito nipuno me°.

11. M goviñda° r bhadañto brâ° jyotiḥpâ° mânava° B °shi | e° M °traka priyo manâpo papuno medhâvî teshva°. — 13. M °r bhavañto dî° B °rghasyadhvanâtya° M °dhvatâtya° goviñdo nâma brâhmaṇa kâ°. — 14. M °r bhavañto râjâ viçâñ° govide brâ° BM °çoca(M °çova)ti krâmya° M °ḍañi kriḍati | sañmo° B °ndanti sa° M °padyeti | .

16. M °dâtiñ ca samaye goviñdasya° B °dâni cayañ° M °ni sañmyagannirghâta° B °nirghâtayitvâ yañ cahi kâmagu° M °pañcami kâmagu° rpitâ samanvañgi° ḍâparamâ sampari° BM °rema | tasmiñ° M °goviñdo brâhmaṇa kâlagateni‖ B °gate ti |. — 18. M °bhavañto re° B °jâ kile di° M °la viçâñpati govide brâ° gate ti | atha° (*l.* 2) B °ndanti sañ° padyeti | hañbho tasmiñ dâni samaye govindo brâhmaṇo kâlañgateti ‖ .

2. M °bhavañto re° yena râjâ viçâñpatitteno° naṁ viçâñ°. — 3. B °çoca mo klâmya mo parideva mo u° M °mâ klamya mâ° ḍañ kraṁda mâ naṁ samo° B °nda mo sañ° M °padye ‖ . — 4. M °heto ‖ . — 5. M °goviṁdasya brâ° jyotishpâlo° yo manâpo paṇḍito° vi teshvateshvarthe° ṇḍitatarâ ṇipu° ktataro kaspa yâñ° B °ktataro kaçca yâñ°.

7. B yâñ pi sa pitâ° M yâñ pi pâso pitâ kiñcit sañjâtâ ti sarvañ° B °jânâti | sarvañ° M °pâlona mâṇa° BM °ho numâsâstaṁ tañ(M °staṁ) ma°. — 8. M mahâ° BM °râja sva° B °payitu° M °tu | yadimaiñ paurohitya govindaye | B °rohitasya go°. — 9[1]. M °bhagavañto râjâ viçâñ° m âmañtrayati. — 9[2]. M °tvañ bho pu° jyotiḥpâlo° BM °ṇavakos teno° M °jyotiḥpâlaṁ mâṇavakaṁ evañ° BM °hi râ°. — 10. M râjâ viçâñpatir bhavâcatañ jyotiḥpâlam âmañtrayati | B °ntrayati upasaṁkramitvâ jyotipâlaṁ mâṇavakaṁ evaṁ vadehi râjâ diçâñpatir jyotipâlaṁ mâṇavakam âmantrayati u°.

11. M °kramitu bhagavân jyotipâla ye° B °tu | bha° M °jâ viñçâñ° BM °tiḥ sâ°. — 12. M °hâraṁ ti sa° B °hârâjanti sa° M °sho viçâñpati râjñasya° na jyotiḥpâla mâṇa° taṁ jyotiḥpâ°. — 13. M râjâ viçâñ° B °r bhagavantaṁ° M °r bhagavata jyotiḥpâlam âmañtrayati | u° kramitu jyotiḥpâlo° jâ viçâpatiḥ goviñdo brâhmaṇa kâ° B °tiḥ | govindabrâ° BM °te sâ°. — 15. M °bhavañ ti° B °van ti jyo° M °jyotiḥpâlo mâṇavako ta° shasya çru° jâ viñçâpatis te° BM °rddhañ samodani° B °dayitvâ sârâpaṇîyâñ kathâñ vya° M °dayitvâ mârâpaṇîyâñ kathâñ vyâtesârayitvâ ekâñte nishâdi e°.

रेणुकुमारो राजा किल दिशांपतिर्गोविन्दे ब्राह्मणे कालगते शोचति क्लाम्यति परिदेवति उरस्ताडं क्रन्दति संमोहमापद्यति ॥ अथ खलु भवन्तो रेणुकुमारो येन राजा दिशांपतिस्तेनोपसंक्रमित्वा राजानं दिशांपतिमेतद्वोचत् ॥ मा महाराज शोच मा क्लाम्य मा परिदेव मा उरस्ताडं क्रन्द मा संमोहमापद्य । तत्कस्य हेतोः । अस्ति महाराज गोविन्दस्य ब्राह्मणस्य ज्योतिपालो नाम माणवको पुत्रो प्रियो मनापः पण्डितो निपुणो मेधावी तेषु तेष्वर्थेषु पितुः पण्डिततरो निपुणतरो व्यक्ततरश्च । यं पि च पिता किंचित्संजानाति सर्वं [327b] ज्योतिपालेन माणवकेन रहो न्वभ्यस्तं ॥ तं महाराजा स्वके पैतृके स्थाने स्थापयतु यदिदं पौरोहित्ये गोविन्दिये ॥

अथ खलु भवन्तो राजा दिशांपतिरन्यतरं पुरुषमामन्त्रयति ॥ एहि त्वं पुरुष येन ज्योतिपालो माणवकस्तेनोपसंक्रमित्वा ज्योतिपालं माणवकमेवं वदेहि ॥ राजा दिशांपतिर्भवन्तं ज्योतिपालमामन्त्रयति । उपसंक्रमतु भवां ज्योतिपालो येन राजा दिशांपतिः ॥ साधु महाराज इति स पुरुषो दिशांपतिराज्ञस्य श्रुत्वा येन ज्योतिपालो माणवकस्तेनोपसंक्रमित्वा तं ज्योतिपालमेतद्वोचत् ॥ राजा दिशांपतिर्भवन्तं ज्योतिपालमामन्त्रयति उपसंक्रमतु भवां ज्योतिपालो येन राजा दिशांपतिः गोविन्दे ब्राह्मणे कालगते ॥ साधु भवन्ति ज्योतिपालो माणवो तस्य पुरुषस्य प्रतिश्रुत्वा येन राजा दिशांपतिस्तेनोपसंक्रमित्वा राज्ञा दिशांपतिना सार्धं

संमोदनीयां कथां संमोदयित्वा सारायणीयां कथां व्यतिसारयित्वा एकान्ते निषीदि ॥ एकान्ते निषण्णं ज्योतिपालं माणवं राजा दिशांपतिरेतद्वोचत् ॥ ओवदतु मे भवां ज्योतिपालो अनुशासतु मे भवां ज्योतिपालो मा च भवां चिरायतु अस्माकं ओवादानुशासनीये । एते च वयं भवन्तं ज्योतिपालं स्वके पैतृके स्थाने स्थापेम यदिदं पौरोहित्ये गौविन्दीये ॥ अथ खलु भवन्तो ज्योतिपालो माणवः स्वके पैतृके स्थाने स्थापितो पौरोहित्ये गोविन्दीये यदप्यस्य पिता कर्म कारापयति तदपि कर्म कारापयति यदप्यस्य पिता कर्मान्तानि अभिसंभुणोति तां पि ज्योतिपालो माणवो कर्मान्तां अभिसंभुणोति यदप्यस्य पिता अर्थार्थं समनुशासति तं ज्योतिपालो माणवो अर्थार्थं समनुशासति यदप्यस्य पिता अर्थार्थं अभिसंभुणोति तदपि ज्योतिपालो माणवो अर्थार्थमभिसंभुणोति ॥ अपि हि जितं ब्राह्मणगृहपतिनो नैगमजानपदा एवमाहन्सुः ॥ गोविन्दो पुनर्भवन्तो ज्योतिपालो माणवो महागोविन्दो ज्योतिपालो [328ᵃ] इति ॥ अपि हि जितं ज्योतिपालस्य माणवकस्य गोविन्दो महागोविन्दो ति एवमचरमयिन्यं उपनिपते ॥

अथ खलु भवन्तो महागोविन्दो ब्राह्मणो येन ते चचियाखेनोपसंक्रमित्वा तेषां चचियाणामेतदुवाच ॥ एन्तु भवन्तो एन्तु भवन्तो येन रेणुकुमारखेनोपसंक्रमित्वा रेणुं कुमारमेवं वदेथ ॥ यंसुखी भवां रेणुः तंसुखी वयमपि यंदुःखी भवान् रेणुः तंदुःखी वयमपि । अयं भो रेणु राजा दिशांपति जीर्णो वृद्धो महल्लको अध्वगतो वयमनुप्राप्तो दुर्जयं खलु पुनः तं भो रेणु यमिदं जीवितं मरणान्तं ॥

2¹. M ekâṁte nisharṇṇaḥ | jyotishpâlaṁ ° jâ viçâṁpa°. — 2². BM opa(B ova)tu me bhavâṁ jyoti(M °bhagavâṁn jyotiḥ)pâlo(M °laḥ) anuçâsa(B °si)tu me bhavâṁ jyoti(M °vân jyotiḥ)pâla mâ ca bhavâ(M °mâ ra bhavâṁ)n âgirâyatu | asmâ° B °ovâdyanu° BM °niye e°. — 4. M °bhavaṁtaṁ jyotiḥpâlaṁ svapai° B °pema | ya° M °d imaṁ paurohitya goviṁdiye | . — 5. M °bhavaṁto jyotiḥpâ ° ṇavo sva° M °hityagoviṁdiye | yad apyasya pitâ karma kârâpayati taṁ jyotipâlo mâṇavako karmaṁ kâraya | te yad apyasya pitâ (*l.* 8) B °hitya gauvindîye yad apyasya pitâ karma kârâpayati | yad apyasya pitâ karmântânyabhisaṁbhuṇoti taṁ pi jyotipâlo mâ ° çâsati | taṁ jyo° M °çâsati taṁ jyotiḥpâ° BM °çâsati | ya° M °noti | tadâpi jyotiḥpâ°.

10. BM °jidaṁ brâ° B °hapatinâ nai° M °hapati nai ° evam âha | evaṁm ahatsu go°. — 11. M goviṁdo punar bhagavaṁto jyotiḥpâlo mâṇavo goviṁdo jyotiḥpâleti | . — 12. B °jidaṁ jyo° M °jyotiḥpâ ° kasya goviṁdo yena aksha° B °ti yenam aksharam agniṁnyaṁ upaniyate ‖ . — 14. M °bhavaṁto mahâgoviṁdo brâ° B °yena te kshetriyâs te ° shâṁ kshetriyâṇâṁm e° M °shâṁ kshatriyâṇâm e°. — 15. M yeṁtu bhavaṁto yenu(?) kva(?)mâro teno ° tvâ reṇuku°.

16. M yaṁsukhî bhavân re° BM °reṇuṁ taṁsu ° n reṇuṁ taṁduḥ°. — 17. B ahaṁ bho reṇu râ° M ayaṁ bho reṇuḥ râjâ viçâṁ° BM °dhvagata vaya° M °prâptaḥ du ° punas taṁ bhâ reṇu ° maraṇataṁ sa° B °ntaṁ sa°.

सचेद्धि भो रेणु राज्ञो दिशांपतेरत्ययन राजकर्तारो भवन्तं रेणुं राज्येनाभिषिंचिष्यन्ति शक्ष्यति भवां रेणु अस्माकमपि राज्येन संभजितुं ॥ एवमुक्ते भगवां रेणुकुमारो षट् चचियानेतद्वोचत् ॥ सचेत् मां भवन्तो राज्ञो दिशांपतेरत्ययेन राजकर्तारो राज्येनाभिषिंचिष्यन्ति संविभजिष्याम्यहं भवन्तो राज्येन ॥ अथ कोचि दानि अस्माकं राज्ये अन्यो नाप्येवं सुखमेधिष्यति अन्यत्रैव भवद्भिः ॥

अथ खलु भवन्तो दीर्घस्याध्वनो त्ययेन राजा दिशांपतिः कालमकार्षीत् ॥ अथ खलु भवन्तो राजकर्तारो येन रेणुकुमारखेनोपसंक्रमित्वा रेणुकुमारमेतदुवाच ॥ राज्यं सि कुमार प्राप्तो राज्येन त्वामभिषिंचाम ॥ एवमुक्ते भवन्तो रेणुः कुमारो तां राजकर्तारां एतद्वोचत् ॥ तेन हि भवन्तो सुखी भवथ यस्येदानि कालं मन्यथ ॥ अथ खलु स रेणुराजा राज्येनाभिषिक्तो पंचहि कामगुणेहि समर्पितः समंगीभूतः क्रीडति रमति परिचारयति ॥ अथ खलु भवन्तो महागोविन्दो ब्राह्मणो येन ते षट् चचिया तेनोपसंक्रमित्वा तान् षट्चचियानेतद्वोचत् ॥ एन्तु भवन्तो अयं हि भवन्तो रेणुराजा राज्येनाभिषिक्तो पंचहि कामगुणेहि समर्पितो समंगीभूतो क्रीडति रमति परिचारयति कामा च नाम एते भवन्तो मदनीया ॥ एन्तु भवन्तो येन रेणुराजा तेनोपसंक्रमित्वा रेणुं राजानमेवं वदेथ । स्मरति भवां रेणु तं वचनं ॥ साधु भवन्ति एते षट् चचिया महागोविन्दस्य ब्राह्मणस्य प्रतिश्रुत्वा येन रेणुराजा तेनोपसंक्रमित्वा रेणुं राजानमेतदवोचत् ॥

1. M °jño viçâṁ° B °tyayena râjâ karttâro bhavantaṁ reṇuḥ râjyenâbhishiṁcishyanti çakyati bhavâṁ° M °ro bhavaṁtaṁ reṇuḥ râjyenâbhishicishyanti | çakshyati | bhavâṁ ° saṁvibhajituṁ ‖ . — 2. M °m uktaṁ bhagavân reṇuṁ kumâro yo kshatri° B °bhavâṁ reṇu°. — 3. M sacen mâṁ bhavaṁto râjño viçâṁ° BM °tyayena râjâ karttâ° M °ro râjyonâbhishicishyati saṁbhavishyâ ° bhavaṁto râjyena | . — 4. M °dâniṁ asmâkaṁ anyonyapye° B °sukhaṁ snedhishyati | anya° M °sukhaṁ svapishyati | anyatraivaṁ bha°.

6. M °bhavaṁto dî ° râjâ viçâṁ°. — 7. BM °bhavanto(M °vaṁto) râjâ karttâ° M °yena reṇukumâro teno ° tvâ reṇuṁ ku ° tad avocat | . — 8¹. B °jyena tvabhi°. — 8². M °bhagavaṁto re ° mâraḥ tâṁ ° rtâram e°. — 9° M °hi bhavaṁtaḥ su° B °khî bhavatha | ya° M °dânîṁ kâ°. — 10. M °ṇu kumâro râjânâ râjye ° paṁcabhi kâ ° rpito samanvaṁgibhûtaḥ sukhî bhavatha yasyedâniṁ kâlaṁ manyatha | atha khalu sa reṇukumâro râjânâ râjyenâbhishikto paṁcabhi kâmaguṇehi samarpito samanvaṁgibhûtaḥ kriḍati ramate paricârayati | kâmâ ca nâma bhavaṁto mardanîyâ eṁtu bhavaṁto | atha°.

11. M °bhavaṁto mahâgoviṁdo brâ° BM °ṇo yena te shaṭ kshetriyân e(M °shaṭ kenniyâm e)tad a°. — 13. M eṁtu bhavaṁto ayaṁ hi bhavaṁto re° B etu bhavanto ahaṁ hi bhavaṁto re° M °rpito samanvagibhûtaḥ krî° B °yati | kâ° M °kâmâ ca se naite bhavaṁto yena° B °niyâ e°. — 15. B etu bha° M yena ° râjânaṁm e ° dethâ | B °tha sma°.

16¹. M °ṇu naṁ va°. — 16². B °bhavanto ti e° M °bhavaṁte ti | e° B °shaṭ kshetri° M °goviṁdasya brâ° B °yena reṇurâjân etad a°.

स्मरति भवां रे[328b]णु तं वचनं ॥ एवमुक्त भवन्तो रेणुराजा तां षट् चचिया-
नेतदवोचत् ॥ स्मराम्यहं भवन्तो तं वचनं । अथ को पि दानिमिमां महापृथिवीं
सप्तधा भाजयिष्यति ॥ एवमुक्ते भवन्तो षट् चचिया रेणुं राजानमेतदुवाच ॥
अथ को हि दानि भो रेणु तेन भगवता महागोविन्देन अन्यो पण्डिततरो वा
व्यक्ततरो वा य इमां महापृथिवीं सप्तधा भाजयिष्यति ॥ अथ खलु भवन्तो रेणु-
राजा अन्यतरं पुरुषमामन्त्रयति ॥ एहि त्वं भो पुरुष येन महागोविन्दो ब्राह्म-
णस्तेनोपसंक्रमित्वा महागोविन्दं ब्राह्मणं एवं वदेहि । राजा रेणुर्भगवन्तं महा-
गोविन्दमामन्त्रयति ॥ साधु महाराजेति स पुरुषो रेणुस्य राज्ञः प्रतिश्रुत्वा येन
महागोविन्दो ब्राह्मणस्तेनोपसंक्रमित्वा महागोविन्दं ब्राह्मणमेतदुवाच ॥ राजा
रेणुर्भगवन्तं महागोविन्दं आमन्त्रयति । उपसंक्रमतु भवां महागोविन्दो येन
राजा रेणुः ॥ साधूति महागोविन्दो ब्राह्मणः तस्य पुरुषस्य प्रतिश्रुत्वा येन रेणु-
राजा तेनोपसंक्रमित्वा रेणुना राज्ञा सह संमोदनीयां कथां संमोदयित्वा सारा-
यणीयां कथां व्यतिसारयित्वा एकान्ते निषीदि ॥ एकान्ते निषण्णो महागोविन्दो
ब्राह्मणो रेणुं राजानमेतदुवाच ॥ इमा भवन्तो महापृथिवी सप्तराज्यविस्तीर्णा ।

दक्षिणेन संछिन्ना शकटमुखसंस्थितं ।
अण्डमध्यमं रेणुस्य राज्ञः आसि अतः पुरं ॥
कलिंगानां च अस्मकानां यो . . . . . ।
माहिष्मती च . . . . . सौवीराणां च रोरुकं ॥

1². M evaṁm ukte bhavaṁto re° BM °shaṭ kshetri°. — 2¹. M °bhavato taṁ°. — 2². M atha kvacid idâ imâṁ° B °ko ci hi dâni° BM °thivi sa° M °dhâ bhoja°. — 3. M °bhavaṁto shaṭ kshatriyâṁ reṇurâ°. — 4. M atha kvacid idânîṁ bho° B °ko ci hi° M °reṇus te° govide BM °thivi saptadhâsya bhâ(M °bho)ja°. — 5. M °bhavaṁto re° sham âmaṁtra°.

6. M °goviṁdo brâ° B °hmaṇos teno° B °dehi râ°. — 7. M °r bhagavaṁtaṁ mahâgo-viṁdaṁm âmaṁtrayati | B °vindaṁm â°. — 8. M °ti satpuru° B °reṇasya° M °reṇusâ râjño pra° yena mahâgovido brâhmaṇe teno° goviṁdaṁ brâ° m etad avocat | . — 9. M °reṇuṁ bhavaṁtaṁ mahâgoviṁdaṁ âmaṁtrayati | . — 10. M °kramitu bhavân mahâgoviṁdo ye° BM °ṇuḥ sâ°.

11. M °goviṁdo brâhmaṇo tasya pu° BM °niyâṁ kathâ saṁmodayitvâ sârâpaṇi(M °pa-ṇi)yâṁ° M °ekâṁte ni° B °shidi e°. — 13. M ekâṁte nisharṇṇo mahâgoviṁdo brâ° re-ṇurâ°. — 14. BM imâṁ bhavanto(M °vaṁto) ma° B °ptadhâ râje vistirṇṇaṁ dakshi° M °râje vistirṇṇo dakshi°. — 15. B dakshiṇadakshiṇe ° ptâ sakaṭamukhasaṁsthitâṁ a° M °ṭamukheshu sasthitâ a°.

16. B °jñaḥ asi a° BM °si an(M °aṁ)taḥpu° BM °raṁ ka°. — 17. B °yo tanaṁ mâ° M °yo ttanaṁ mâ°. — 18. BM mâhi(M moha)shyati ca vartti(M °rti)nâṁ sau° M °ṇâṁ ca lolakaṁ B °kaṁ mi°.

मिथिलां च विदेहानां . . . अंगेषु मापये ।
वाराणसीं च काशिषु एतं गोविन्दमापितं ॥

अथ खलु भवन्तो गोविन्दो ब्राह्मणस्तां षट चचियां स्वकस्वकेषु राज्येषु प्रति-
ष्ठापये ॥

अचिराभिषिक्ता च षड्राजानः क्षिप्रमेव संनिपतिता येन महागोविन्दो ब्राह्म-
णस्तेनोपसंक्रमित्वा महागोविन्दं ब्राह्मणमेतदवोचत् ॥ ओवदतु मो भवां महा-
गोविन्दो अनुशासतु मो भवां महागोविन्दो यथा च भवां महागोविन्दो रेणुस्य
राज्ञः अर्थार्थानि समनुशासति तथा इमेषु [329a] षड्डु राज्येषु अर्थार्थानि सम-
नुशासतु ॥ तेन खलु पुनस्समयेन महागोविन्दो ब्राह्मणः सप्तानां राज्ञां अर्था-
र्थानि समनुशासति । सप्त च ब्राह्मणशतसहस्राणि मन्त्रां वाचेति सप्त च स्नात-
कशतानि मन्त्रां वाचेति । वदतो मे नुवदथ ॥

अपि हि जितं ब्राह्मणगृहपतिनो नैगमजानपदा च महाभागं गोविन्दं ब्राह्मणं
एवं संजानन्ति ॥ पश्यति आर्यो महागोविन्दो साचात्महाब्रह्माणं महाब्रह्मणा च
पुनः सार्धं विज्ञेयं मन्त्रिय मन्त्रिय अर्थार्थानि समनुशासति ॥ अश्रोषीत्खलु
भवन्तो महागोविन्दो ब्राह्मणो । मम किल ब्राह्मणगृहपतिनो नैगमजानपदा एवं
संजानन्ति आर्यो महाभागो गोविन्दो साचात्पश्यति ब्रह्माणं महाब्रह्मणा च पुनः
सार्धं चिन्तयति यान्यर्थार्थानि समनुशासति । न खलु पुनरहं पश्यामि साचात

1. BM °dehâṁ ca yâ aṁge° M °shu mâmaye B °ye vâ°. — 2. B °ṇasi ca° M °râṇaṁsi ca ° goviṁdam âropitaṁ ‖ . — 3. M °bhavaṁto goviṁdo brâ° B °shaṭ kshetri° BM °jyehi pra°. — 5. M °cirâdbhishi° shaḍ râjâ ° kshipraṁm evaṁ sannipatitânâṁ ca mahâgoviṁdo brâhmaṇah teno° B °nipatitânâṁ ye° M °goviṁdaṁ brâ°.

6. BM pravadatu bhavâṁ ma(M °vân ma)hâgovindo(M °vida) a ° tu me bhavâṁ ma-(M °vân ma)hâgovindo(M °viṁda) yathâ° M °bhavân mahâgoviṁda re ° râjño arthârthaṁ samanu ° çâsati tena° B °çâsati | . — 9. B açroshit tena kha° M °lu samaye ° goviṁdo brâ ° râjñâ a°. — 10. M °srâṇi tatrâ vâceti sa° B °srâṇi maṁtrâṁ vâceti sa° M °tâni taṁtrâ vâceti.

11. BM vadatu me bhavâm â(M °vân â)ha ‖ . — 12. BM °patinâṁ(M °nâ) naiga-majâ(M °ja)napadena mahâ° B °bhâgo govi° M °goviṁdaṁ brâ ° jânaṁti B °nti pa°. — 13. M paçyati | âryyamahâ° B °ârye mahâ° M °goviṁdo sâkshât mahâbrâhmaṇa puṇah° B °kshân mahâbrâhmaṇo mahâbrâhmaṇâ ca ° rddhaṁ dinneyam amantreyaṁ mantriyaṁ a° M °rddhaṁ dinneyaṁ maṁtreya maṁtriyaṁ a° B °ti a°. — 14. M °lu puna bha-vaṁto mahâgoviṁdo brâ° B °hmaṇa ma°. — 15. M sama ki° BM °patinâ nai° M °jânaṁ-padâ evaṁ sajânaṁti | âryâ mahâbhogo goviṁdo sâ° BM °çyati(M °ti]) brâhmaṇamahâ-brâhmaṇâ° M °rddhaṁ ciṁtayati yo arthârthâni° B °yati yo 'rthârthâ sa°.

17. M na khalu punar aṁhaṁ mahâbrâhmaṇena sârddhaṁ viṁdaya maṁtriya a° B °t mahâbrâhmaṇaṁ ° hâbrâhmaṇena sârddhaṁ vindiyati vindiya mantriya a° BM °çâsati ‖ .

IMPRIMERIE NATIONALE.

महाब्रह्माणं न च पुनरहं महाब्रह्मणा सार्धं विज्ञेयं मन्त्रिय मन्त्रिय अर्थार्थानि समनुशासामि ॥ न खलु पुनर्मे तत्साधु न प्रतिरूपं यमहं अभूतं असन्तं वर्णं अधिवासयेयं ॥ श्रुतं खलु पुनर्मे तं पौराणानामाचार्याणां प्रवयानां जीर्णानां वृद्धानां महल्लकानां अध्वगतवयमनुप्राप्तानां संमुखाद्भाषमाणानां । यो चत्वारि वार्षिकां मासां प्रतिसंलीनो करुणं ध्यानं ध्यायति तं साक्षात् महाब्रह्मा उपसंक्रमति यश्चास्यार्थो अभिप्रेतो भवति तं वास्य पृच्छितेन विसर्जयति । यं नूनाहं चत्वारि वार्षिकानि मासानि प्रतिसंलीनः करुणं ध्यानं ध्यायेयं सचे तं भगवां रेणु अनुजानाति ॥ एवमुक्ते भवन्तो रेणुराजा महागोविन्दं ब्राह्मणमेतदुवाच ॥ तेन हि भो महागोविन्द सुखीभव यस्य व कालं मन्यसीति ॥

अथ खलु भवन्तो महागोविन्दो चत्वारि वार्षिकां मासां प्रतिसंलीनः करुणं ध्यानं ध्याये ॥ अथ खलु भवन्तो महागोविंदो ब्राह्मणो चतुर्णां वार्षिकानां मासानां अत्ययेन तद्दहो पोषधेयं चतुर्दश्यां पौर्णमास्यां शीर्षस्नातो आहतवस्त्रशुचिवस्त्रनिवस्तो अन्तरा च वेदिं अन्तरा चाग्निं स्नातशरीरो पट्टशिलायां आज्यानुलेपनायां अन[329b]न्तरहितायां अग्निं प्रज्वालेत्वा आज्ञानां गृहे निषीदे उत्तरामुखो ॥ अथ खलु भवन्तो नचिरस्यैव उत्तरातो दिशातो महतो आलोकस्य प्रादुर्भावो अभूषि ॥ अद्राक्षीत्खलु भवन्तो महागोविन्दो उत्तरातो दिशातो महतो आलोकस्य प्रादुर्भावं दृष्ट्वा च पुनरात्मयाभुतं संविग्नरोमहृष्टजातो अभूषि यथापीदं अदृष्टपूर्वं दृश्यते ॥ अथ खलु भवन्तो महाब्रह्मा नचिरस्यैव उत्तरातो दिशातो वैहायसमागत्वा महागोविन्दस्य ब्राह्मणस्योपरिवैहायसमन्तरीचे अस्थासि ॥ अद्राक्षीत्खलु महागोविन्दो ब्राह्मणो ऊर्ध्वं उल्लोकेन्तो महाब्रह्माणं उपरि-

2. M °tu punar etat sâ° BM °paṁ yâm ahaṁ bhû° M °taṁ asaṁtaṁ va° B °vâseyeyaṁ çru°. — 3. B çrutaṁ | kha° BM °paurâṇânâṁm âcâryâṇâṁ(M °ryyâṇâ) prâvaryâṇâṁ jî° M °llakâtâṁ adhva° BM °shamâṇâ(M °nâ)nâṁ yo°. — 4. BM °rshikânâṁ mâsâṁ(M °sâ) pra° naṁ dhyâyeti(M °ti |) taṁ sâ° preto(M °pretâṁ) bhavati(M °ti |) taṁ câsya pricchito yena visarjjayati | .

6. BM °rshikânâṁ mâsânâṁ(M °sânaṁ) pra° B °yeyaṁ | sa°. — 8[1]. M °bhavaṁtâ re° goviṁdaṁ brâ°. — 8[2]. M °goviṁdo su° BM °yasya ca kâ° M °nyasi iti | . — 10. M °bhavaṁto mahâgoviṁdo ca ° lina kalunadhyânaṁ°.

11. M °bhavaṁto ma ° ṇo caturṇṇâ vâ ° ho mosha° B °dheyaṁ cadasyâṁ paurṇṇaṁmâsyâṁ° M °shadheyaṁ caturdaçyâṁ çirsha° BM °âhatavaçucivastranivasto anta(M °nivastro aṁta)râ ca devî antarâ câgniṁ shva(M °aṁtarâyâgniṁ tya)ktaçarîraṁ pathakshiptâyâṁ ajâ(B °atrâ)nulepanâyâṁ ananta(M °naṁta)rahitâyâṁ agni prajvâletvâ çrutvânâṁ gṛihya nishî°. — 15. M °bhavaṁto nacirasyaivaṁ u ° diço âlo°.

16. M °bhavaṁto mahâgoviṁdo u° B °çcaryâṁdbhu° M °romakṛishṭa ° rvaṁ ca dṛi°. — 18. M °bhavaṁto mahâbrâhmâ ° syaivaṁ u ° goviṁdasya brâ°. — 20. M °lu bhavaṁto

वैहायसमन्तरीचे स्थितं दृष्ट्वा च पुनर्येन महाब्रह्मा तेनांजलिं प्रणामेत्वा महाब्रह्माणं गाथाये ध्यभाषति ॥

बलं वा यशं वा द्युति वा किन्तुवमसि मारिष ।
अजानन्तो ते पृच्छामि कथं जानेम ते वयं ॥

एवमुक्ते भवन्तो महाब्रह्मा महागोविन्दं ब्राह्मणं गाथाये प्रत्यभाषति ॥

यं कुमारो ति संजानन्ति ब्रह्मलोके सनातनं ।
देवा पि संजानंति एवं एवं गोविन्द जानथ ॥

एवमुक्ते भवन्तो महागोविन्दो ब्राह्मणो महाब्रह्माणं गाथाये भाषति ॥

आसनं उदकं पाद्यं मधुरकल्पं च पायसं ।
प्रतिगृह्णेहि मे ब्रह्म अर्घं अभिहराभि ते ॥

अथ खलु भवन्तो महाब्रह्मा महाब्राह्मणं महागोविन्दं गाथाय प्रत्यभाषति ॥

आसनं उदकं पाद्यं मधुरकल्पं च पायसं ।
प्रतिगृह्णामि गोविंद अर्घं अभिहराहि मे ॥

एवमुक्ते भवंतो महागोविंदो ब्राह्मणो महाब्रह्माणं गाथाये भाषति ॥

दृष्टे धर्मे हितार्थं वा संपरायसुखाय वा ।
कृतावकाशो पृच्छेयं यं मे मनसि प्रार्थितं ॥

mahâgoviṁdo brâ ° ûrddha ullo° B °ûddhaṁ u° BM °kento(M °keṁto) mahâbrâhmaṇaṁ u° M °hâyasam aṁtarî ° praṇame° BM °tvâ mahâbrâhmaṇaṁ gâ° M °bhâsheti | .

3. BM °çaṁ vâ cyutiṁ vâ kin(M °kiṁ) tu tvaṁ asi ° sha a°. — 4. M ajânaṁto ne pri° B °ma | te°. — 5. M °bhavaṁto ma ° goviṁdaṁ brâ ° bhâshaye.

6. M kumâ° B ye ku° BM °ro ti taṁ jâ° M °jânaṁti | bra° BM °naṁ de°. — 7. M devâṁ pi saṁjânaṁti e° B °nti evaṁ go° M °goviṁda jâ°. — 8. M °bhavaṁto mahâgoviṁdo brâ° BM °ṇo mahâbrâhma(B °hmaṁ)ṇaṁ ° shati | balaṁ vâ(M °câ) yaçaṁ vâ cyutiṁ vâ kiṁ tvam asi mârisha ajânanto(M °naṁto) te pricchâmi kathaṁ jânema te vayaṁ || atha khalu bhavanto(M °vaṁto) mahâgovinda(M °viṁdo brâhmaṇo) â°. — 9. M âhanaṁ uda° BM °saṁ pra°. — 10. BM °gṛihnehi me brahme a° M °graṁ atiha°.

11. M °bhavaṁto mahâbrahmâ mahâgâthâye pratyabhâsheti | . — 12. B *omet 12, 13 et 14.* M °kaṁ vâdyaṁ madhuka ° saṁ pra°. — 13. M °grihnâmi goviṁde agraṁ abhihasami te | . — 14. M °viṁde brâhmaṇa mahâbrâhmaṇa mahâbrâhmaṇaṁ gâthâ shati || . — 15. M dṛishṭve vaṁ me hi° B °shṭe varme° BM °rthaṁ saṁ° M °parâṇi su° B °khâni vâ kṛi°.

16. M °kâçe pricchеyaṁ | paṁca me manami prâ° B °ccheyaṁ me°.

एवमुक्ते भवन्तो महाब्रह्मा महागोविन्दं ब्राह्मणं गाथाये प्रत्यभाषति ॥

दृष्टधर्मे हितार्थं वा संपरायसुखाय वा ।
कृतावकाशः पृच्छाहि यं भवत्यभिप्रार्थितं ॥

अथ खलु पुनः भवन्तो महागोविन्दस्य ब्राह्मणस्येतदभूषि ॥ प्रवारितं मे खलु महाब्रह्मणा प्रश्नव्याकरणेन किं दानिं महाब्रह्माणं पृच्छेयं दृष्टधार्मिकं अर्थमारभ्य [33o^{a}] उताहो सांपरायिकं ॥ अथ खलु भवन्तो महागोविन्दस्य ब्राह्मणस्येतदभूषि ॥ अस्ति तावदयं दृष्टधार्मिको अर्थो यमिदं पंच कामगुणानारभ्य । यं नूनाहं महाब्रह्माणं सांपरायिके अर्थे प्रश्नं पृच्छेयं ॥ अथ खलु महागोविन्दो ब्राह्मणो महाब्रह्माणं सांपरायिके अर्थे प्रश्नं पृच्छे ॥

पृच्छामि ब्रह्माणं सनत्कुमारं
कांक्षी अकांक्षं परिचारियेषु ।
कथंकरो किन्तिकरो किमाचरं
प्राप्नोति मनुजो ऽमृतं ब्रह्मलोकं ॥

एवमुक्ते भवन्तो महाब्रह्मा गोविन्दं ब्राह्मणं गाथाये प्रत्यभाषति ॥

हित्वा ममत्वं मनुजेषु ब्रह्म
एकोतिभूतो करुणो विविक्तो ।
निरामगन्धो विरतो मैथुनातो
प्राप्नोति मनुजो ऽमृतं ब्रह्मलोकं ॥

1. B evaṁm u° M atha khalu punar bhavaṁto mahâbrâhmâ goviṁda brâhma ° bhâshe. — 2. M dṛishṭhadha ° sukhâyani vâ | B °khâni vâ | . — 3. M °kâça pṛi° BM °yaṁ bhâvasyâbhi° M °prârthaye | . — 4^{1}. M °punar bhavaṁto mahâgoviṁdasya brâ°. — 4^{2}. BM °lu mâhâbrahmâ praçna° B °dânim emama brâhmaṇaṁ° M °nîṁ maṁ mama brâhmaṇaṁ ° kam artha ârabhya jâto sâṁ°.

6. M °bhavaṁto mahâgovidasya brâ°. — 7^{1}. M pravâritaṁ me khalu tâ ° dṛishṭvâdhârmikorthâ yam i ° ṇânâṁ rabhya B ° rabhya yaṁ°. — 7^{2}. BM °hâbrâhmaṇaṁ° M °artha praçna pri°. — 8. M °goviṁdo brâ° BM °ṇo mahâbrâhmaṇaṁ(M °ṇa) sâṁparâyikaṁ arthaṁ pra° B °cchehaṁ pṛicchâ° M °ccheyaṁ ‖ . — 10. BM °mi brâhmaṇaṁ satâṁ (M °satya) ku° B °raṁ kâkshi akâṁkshi paricâriyeshu ka° M °raṁ kâçi akâkshi parivârayeshu ka°.

12. M kakaroti kiṁ ca karohi mâṁ vâro prâ° B °thaṁ karoti mâ vâro kiṁ ca karohi prâ° BM °pnoti anyo amṛi°. — 14. M evaṁm ukte bhavaṁto mahâgoviṁdo mahâbrahmâṇaṁ gâthâ ° bhâshiti ‖ B °bhâsheti ‖ . — 15. B °shu brâhme e° M °brahme e° BM °ruṇe vivikto(M °kte) | .

17. M °magaṁdho vi° B °viratâ mai ° ti manyo amṛitaṁ brâhma° M °ti manye amṛi°.

एवमुक्ते भवन्तो महागोविन्दो ब्राह्मणो महाब्रह्माणमेतदवोचत् ॥ हित्वा ममत्वं ति वयं भवन्तो महाब्रह्मणो भाषमाणस्य एतमर्थमाजानाम यदेकत्वो अगारस्मानगारियं प्रव्रजे अल्पं भोगस्कन्धं प्रहाय महान्तं वा भोगस्कन्धं प्रहाय अल्पं वा ज्ञातिवर्गं प्रहाय महान्तं वा ज्ञातिवर्गं प्रहाय । उच्चकुलाद्वा नीचकुलाद्वा संभवति अपहृतगृहित्वंजनो संघाटीपात्रचीवरमादाय शिक्षति शिक्षापदेषु कायकर्मवाचाकर्मणा समन्वागतो परिशुद्धेन परिशुद्धाजीवो हित्वा ममत्वं ति वयं भवन्तो महाब्रह्मणो भाषमाणस्य एतमर्थं जानाम ॥ एकोतीभावं भवन्तो महाब्रह्मणो एतमर्थमाजानाम ॥ यदिहैकत्वो वितर्कविचाराणां व्युपशमाद्ध्यात्मसंप्रसादाच्चेतस एकोतीभावाद्वितर्कमविचारं विवेकजं प्रीतिसुखं प्रथमं ध्यानमुपसंपद्य विहरति एकोतीभूतो ति वयं भवन्तो महाब्रह्मणो भाषमाणस्य एतमर्थमाजानाम ॥ करुणो विविक्तो ति वयं भवन्तो महाब्रह्मणो भाषमाणस्य एतमर्थमाजानाम ॥ यदिहैकत्वो करुणापरेण चेतसा एकाद्दिशां स्फरित्वोपसंपद्य विहरति विपुलेनमुन्नतेन अद्वयेनाप्रमाणेनावैरेणाव्याबाधेन तथा द्वितीयं तथा तृतोयं तथा चतुर्थमिति ऊर्ध्वमधो तिर्यक्सर्वेहि सर्वत्रताये सर्वावन्तं लोकं स्फरित्वोपसंपद्य विहरति करुणो [33o^{b}] विविक्तो ति वयं भवन्तो महाब्रह्मणो

1^{1}. M °bhavaṁto mahâgovido brâ° B °hâbrâhmaṇa° M °brahmam e°. — 1^{2}. B °tvâ mamatveti yaṁ yaṁ bhavanto mahâbrâhmaṇo° M °tvâ mamatveti yaṁ ya dravaṁto mahâbrâhmaṇo ° etam arthaṁm âjânâmâ | yathedaṁ ekanyo a° B °jâma yadai° BM °je analpaṁ bhogaskandhaṁ(M °skaṁdhaṁ) pra(B °prahâyama)hâya mahântaṁ(M °hâṁtaṁ) vâ bhogaskandhaṁ(M °skaṁdha) prahâya(B °ya |) alpaṁ vâ jñâ° M °jñânivargaṁ prahâya mahâṁtaṁ va duvaku° B °prahâya ucca°. — 4. BM °kulâd(M °le) vâ nicakulâd(M °le) vâ saṁbhavati | (B °ti) a ° gṛihavyaṁjanâ(M °janaṁ) saṁghâ° B °ṇâ samatvâgato° BM °çuddho ji° M °jivo hitvâṁ mamatvan ti | vayam api matvanti | vayam api mahâbrâhmaṇo° B °hitvâ mamatva ti ° hâbrâhmaṇo ° etam arthe jânâma eko°.

7. B °tivayaṁ bha° M °ticayaṁ bhavato mahâbrâhma° B °hâbrâhma ° tam arthaṁm âjâ° M °tam arthaṁ jâ°. — 8. B °haikatyâ vitarkavicârâ° M °çamâd adhyânmasaṁ° B °dâc caitasa° M °bhâvâd avitarkam avive ° harâmi | ekonibhûto ni vayaṁ bhavaṁto mahâ° B °harati | ekotibhû ° hâbrâhma ° tam arthaṁm âjânâma ka° M °tam arthaṁ jânâmaḥ ka°.

11. M karûṇo vimukteti cayaṁ bhavaṁto mahâbrâhmaṇasya e° B °ruṇo vimukto ° hâbrâhma° BM °tam arthaṁ âjâ°. — 12. BM °haikatyo(M °tye) karu(M °ṛû)ṇo pano na ce (M °paro na ca) tasya ekân diçâṁ sphâritvo(M °kâ diçaṁ sphârayitvâ u)pasaṁpadya viharati | vipulena madga ° pramâṇenâvaire(M °nâvale)ṇâvyâbaddhe(M °rddhe)na tathâ dvi ° rtham iti urddham a(M °ûrddhaṁ a)dho tiryat sa(M °tiryag sa)rve° M °rvâvaṁtaṁ lo° B °saṁpadyati viha° BM °ruṇe vivikte ti vayaṁ bhavanto(M °vaṁto) mahâbrâhmaṇo bhâ° B °rtham âjâne âmaga° M °rtham âtone ânma°.

भाषमाणस्य एतमर्थमाजानाम ॥ निरामगन्धं वयं भवन्तो महाब्रह्मणो भाषमाणस्यार्थं न जानाम ॥

के आमगंधा मनुजेषु ब्रह्म
एतं न विन्दे तद्वीर ब्रूहि ।
येनावृता वारिवहा कुकूल
आपाथिका निर्वृता ब्रह्मलोकं ॥

एवमुक्ते महाब्रह्मा महागोविन्दं ब्राह्मणं गाथाये प्रत्यभाषति ॥

क्रोधो मृषावाद कथंकथा च
..... अतिमानो ..... ।
ईर्ष्या च हिंसा परवादरोषणा
ते आमगन्धा मनुजेषु ब्रह्म ।
येनावृता वारिवहा कुकूल
आपाथिका निर्वृता ब्रह्मलोकं ॥

एवमुक्ते भगवान्महागोविन्दो महाब्रह्मणमेतदुवाच ॥ आमगन्धो ति वयं भवन्तो महाब्रह्मणो भाषमाणस्य एतमर्थं जानाम ॥ तं न मे श्रद्धमगारमध्यावसता एकान्तसंलिखितं एकान्तानवद्यं एकान्तपरिशुद्धं पर्यवदातं च ब्रह्मचर्यं चरितुं । अल्पकं जीवितं गमनीयो सांपरायः नास्ति जातस्यामरणं तस्माज्ज्ञातव्यं मन्तव्यं बोद्धव्यं कर्तव्यं कुशलं कर्तव्यं ब्रह्मचर्यं न किंचिल्लोके पापं कर्म करणीयं ॥

1. M ânmagamũdhaṁ vayaṁ bhavaṁto mahâbrâhmaṇasya bhâshamâṇâsyâ° B °hâbrâhma bhâ° BM °rthaṁ jânâma e°. — 3. B eke â° M ete âtmagamũdhâ yanuje° B °shu brâhmaṇa evaṁ na° M °shu brâhmaṇa eva na viṁde tad vanaṁ krûhi B °d vîra kruhî me°. — 5. B menâvri° M yenâpûto pâripahâ° BM °kukkula° M °âyâpikâ°.

7. M evaṁm ukte mahâbrâhmaṇa mahâgoviṁdaṁ brâ° B °kte mahâbrâhmâ °vindo brâ°. — 8. BM °thâ ca kariyaṁ atimâno ti andhâ(M °mâto ni aṁdhâ) i°. — 10. BM irshyâ hiṁsâ ca pa° B °ṇâ ete âmagamũdhâ manu° M °ṇâ ye te âtmagamũdhâ manujeshu brâhmaṇenâ B °brahme ye°.

12. M yaṇa nirvṛitâ vâ° BM °kukkula° M °pâpikâ° B °rvṛittâ bra°. — 14¹. M evaṁm u °goviṁdo mahâbrâhmaṇa° B °ndo mahâbrâhmaṇa° M °tad avocat ‖ . — 14². M âmagamũdho ti° BM °bhavanto(M °vaṁto) mahâbrâhma °nâma taṁ°. — 15. M taṁ ta me° satâ ekoṁtasalikhitaṁ prikâṁtam anavayaṁ kritapari° B °satâ ekântaṁ samli °dyaṁ kritapariçu° M °ryyavadâtaṁ bra° B °tuṁ a°.

17. BM alpâkaṁ° M °jîvituṁ ga° BM °niyaṁ sâṁparâyaḥ(M °yo) nâsti(B °nâsmiṁ) jâ° M °smât jñâtavyaṁ maṁtavyaṁ bodhakartavyaṁ ku° B °ryaṁ na kiṁcillo°.

प्रव्रजिष्यामि दानि हंभो महाब्रह्म अगारस्मानगारियं सचेत् मे भगवां महाब्रह्मा अनुशासेय ॥ एवमुक्ते भवन्तो महाब्रह्मा महागोविंदं ब्राह्मणमेतदवोचत् ॥ तेन हि भो महागोविन्द सुखीभव यस्येदानिं कालं मन्यसि ॥

श्रुतं च मे तं भगवां किल तेन समयेन महागोविन्दो नाम ब्राह्मणो अभूषि स्मरति भगवां ॥ एवमुक्ते भगवां पंचशिखं गन्धर्वपुत्रमेतदवोचत् ॥ एवमेतं पंचशिख अहं तेन समयेन महागोविंदो नाम ब्राह्मणो अभूषि स्मरामि चाहं न च ते पुनः पंचशिख श्रुतं यथा सो महागोविन्दो ब्राह्मणो अगारस्मानगारियं प्रव्रजितो ॥ अहं खलु सो पंचशिख महागोविन्दः ब्राह्मणो येन रेणुराजा तेनोपसंक्रमित्वा रेणुं राजानं गाथाये अध्यभाषि ॥

आमन्त्रेमि महाराज रेणु भूमिपते तव ।
प्रव्रजामि प्रजहित्वा राज्यं पौरोहित्यं च मे ॥

एवमुक्ते पंचशिख रेणुराजा महागोविन्दं ब्राह्मणं गाथाय प्रत्यभाषति ॥

सचेद[33 1ᵃ]स्ति ऊनं कामेहि वयन्ते पूरयामथ ।
को वा भवन्तं हेठेति वयन्ते धारयामथ ।
भवां पिता वयं पुत्रो मा गोविन्द प्रव्रजाहि ॥

एवमुक्ते पंचशिख महागोविन्दो ब्राह्मणो येन रेणुराजा तेनोपसंक्रमित्वा रेणुं राजानं गाथाये अध्यभाषति ॥

न अस्ति ऊनं कामेहि हेठयिता न विद्यति ।
अमनुष्यवचनं श्रुत्वा कथं वर्तेम अन्यथा ॥

1. B °bho mahâbrahme agâ° M °bho mahâbrahme satrioyeṁ me bhagavâṁ mahâ° B °sacet se bha °hâbrâhmâ° BM °seyaṁ ‖ . — 2¹. M °bhavaṁto mahâbra °goviṁda brâ °tad uvâca ‖ . — 2². M °goviṁdo sukhîbhavasya dâli kâlaṁ manyami | B °kâla manyasi | . — 4. M °me bhagavâ kila °goviṁdo nâ °shi | smarati bhavân | B °ti bhagavâṁ – vam u°. — 5¹. M °gavâṁn paṁcaçishaṁ gaṁdharva° B °ndharvaṁpu°. — 5². BM °naḥ paṁcaçikha(M °çishaṁ) çrutaṁ(B °taṁ |) yathâ(M °thâ ço) so mahâgovindo(M °viṁdo) brâ°.

8. BM evaṁ(M eve) bhagavaṁ ahaṁ° B °çikho mahâgoviṁdaḥ brâ° M °çisha mahâgoviṁdo brâ°. — 10. M âmaṁtremi° B °ntresi mahâ °tava pra°.

11. M prajânâmi prajânâti prajânâṁ sarvasvarâ° B °vrajâmi prajânasvarâ°. — 12. M evaṁm ukte °govidaṁ brâ °thâye pra°. — 13. M °hi vayaṁ ne pû° BM °tha ko°. — 14. M °bhavaṁtaṁ heṭheti capaṁ te dhâ° B °ṭheti caya° M °mathâ | B °tha bha°. — 15. B °pitâ ca yaṁ putra mâ° M °putra mâ goviṁdam uvrâjâ(?)hi | .

16. M evaṁm u °çisha mahâgoviṁdo brâ °tvâ reṇurâjâ° B °ṇuṁ râjâṇaṁ gâ°. — 18. B nâsti° M nâsti ûtaṁ kâmehi viheṭha°.

एवमुक्ते पंचशिख रेणुराजा महागोविन्दं ब्राह्मणं गाथाये प्रत्यभाषति ॥

अमनुष्यो कथं वर्णो किं वा अर्थ अभाषत ।
यस्य वाचं श्रुत्वा जहासि अस्माकं गृहं च केवलं ॥

एवमुक्ते पंचशिख महागोविंदो ब्राह्मणो रेणुराजानं गाथयाध्यभाषति ॥

सर्वतो यष्टुकामस्य उपवुस्थस्य मे सतः ।
अग्नि प्रज्वालितो आसि कुशचीरपरिच्छदो ॥
ततो हंमि प्रादुरङ्ग ब्रह्मा लोके सनातनो ।
यस्य वाचं श्रुत्वा जहामि युष्माकं गृहं च केवलं ॥

एवमुक्ते पंचशिख रेणुराजा महागोविन्दं ब्राह्मणं गाथाये प्रत्यभाषति ॥

अहधाम वयं भवतो यथा गोविन्दो भाषति ।
अमनुष्यवचनं श्रुत्वा कथं वर्तेम अन्यथा ॥

अन्यापि वचना भवां महागोविन्दो कुशलानि येव आचिचति । या च भवतो गोविन्दस्य गतिर्भविष्यति सा अस्माकं अपि गतिर्भविष्यति ॥

यथा आकाशे विमलो शुद्धो वैडूलियो मणिः ।
एवं शुद्धो चरिष्यामि गोविन्दस्यानुशासने ॥

एवमुक्ते पंचशिख महागोविन्दो ब्राह्मणो रेणुराजानं गाथाभिरध्यभाषति ॥

सचेज्जहथ कामानि यत्र रक्ताः पृथग्जनाः ।
शक्यं भवेदृढीभवथ क्षान्तीबलसमाहिता ॥

1. M °goviṁdaṁ brâ°. — 2. M °kiṁ vâmarthaṁ° BM °shati ‖ . — 3. BM yasya tvaṁ vacanaṁ çru° B °tvâ jânesi asmâ° M °tvâ asmâkaṁ gṛihake°. — 4. B °gâthâyâ° M °gâthâye adhya°. — 5. B sarve te yashṭu° M sarve te yaṁstukâmasya omavrasta° B °masya opavu° M °satâṁ | B °sataḥ a°.

6. B °si kûsaci° M °çalîcamari-dâ | . — 7. B °haṁ pi prâ° BM °r ahi brahmalo ° nâtanaṁ | . — 8. BM yasyâhaṁ vacanaṁ çru° M °shmâka gṛi°. — 9. M evaṁṁ u ° ṇuyatâ mahâgoviṁdo brâ°. — 10. M °dhâmeti vayaṁ° B °yaṁ bhagavato° M °to yabhâ goviṁdo bhâ° B °vinda bhâ°.

12¹. BM °vacanâṁ(M °cato) bha° M °goviṁda kuçalena evaṁ â° B °kuçalena ye ° ti yâ°. — 12². M yâ ca bhagavato goviṁdasya gatir bhavishyati | . — 14. BM °kâça vi° B °ddho ruli° M °ddho ca rucire maṇi | . — 15. M °goviṁdasyâ°.

16. M °çikho mahâgoviṁdo brâ ° reṇuṁ râ°. — 17. M °mâni yatra çaktâ pri° B °mâni putrâ çaktâḥ pri° BM °thakjanâḥ sa(M °ça)°. — 18. B sastaṁ° M °ve dṛiḍhi° B °d dṛiḍhâ bhava° M °tha kshâṁticarasamâhitaḥ | .

एष मार्गो ब्रह्मपुरे एष मार्गः सनातनः ।
सद्धर्मविद्भिराख्यातो ब्रह्मलोकोपपत्तये ॥

अश्रोषीत्खलु पंचशिख ते षड्राजानो महागोविन्दो ब्राह्मणो अगारस्यानगारियं प्रव्रजिष्यतीति । ते क्षिप्रमेव संनिपतेन्सुः ॥ अथ खलु पंचशिख महागोविन्दो ब्राह्मणो येन ते षड्राजानस्तेनोपसंक्रमित्वा तां षड्राजां एतदवोचत् ॥ एन्तु भवन्तो एन्तु भवन्तो अन्यं दानि आचार्यं पर्येषथ यो वो स्वकस्वके[331b]षु राज्येषु अर्थार्थानि समनुशासिष्यति ॥ तत्कस्य हेतोः ॥ प्रव्रजिष्याम्यहं अगारस्यानगारियं ॥ श्रुतं हि मया महाब्रह्मणो संमुखादाभगन्धं भाषमाणस्य । तं न शक्यं अगारमध्यावसता एकान्तसंलिखितमेकान्तानवद्यं परिशुद्धं पर्यवदातं ब्रह्मचर्यं चरितुं अलं जीवितव्यं गमनीयो संपरायो नास्ति जातस्यामरणं तस्माद् ज्ञातव्यं प्राप्तव्यं बोद्धव्यं कुशलं चरितव्यं ब्रह्मचर्यं न च किंचिल्लोके पापं कर्म कर्तव्यं ॥

अथ खलु पंचशिख तेषां षण्णां राज्ञामेतदभूषि ॥ ब्राह्मणा हि नामैते भोगलुब्धा भवन्ति । यं नूनं वयं महागोविन्दं ब्राह्मणं भोगेहि उपनिमन्त्रयेम ॥ अथ खलु पंचशिख ते षड्राजानो महागोविन्दं ब्राह्मणं भोगेहि उपनिमन्त्रेन्सुः ॥ संविद्यन्ति मो महागोविन्द इमेषु षट्सु राज्येषु प्रभूता मानुष्यका भोगा धार्मिका धर्मलब्धा धार्मिकेन बलेन अभिसाहृता अभिसमूढा ततो भवां महागोविन्दो धनमादियतु मा भवां महागोविन्द अगारस्यानगारियं प्रव्रजतु ॥ एवमुक्ते पंच-

1. B °hmapare e° M °hmayâne eva mârga samaṁtaraṁ B °saṁmatanaḥ sa°. — 2. BM °rmashaḍbhir âkhyâ(B °khyâto) bra° M °lokaprapattaye | . — 3. M °çikho te shaṭ râjâto mahâgoviṁdo brâ°. — 4¹. M °saṁnimatetsu | B °tetsuḥ | . — 4². M °paṁcaçirsha mahâgoviṁdo brâ° B °brâhma ye° M °te shaṭ râjâno teno ° ḍ râjânam eta° B °ḍ râjâ eta°. — 5. B etu bhavanto etu bhavanto a° M ettra bhavaṁto yetu bhadaṁtaḥ | dâpi âcâryya yaryepratha° BM °yo vâ svaka° M °keshu arthârthâni ° çâsati | .

8¹. M °yâ brâhmaṇaḥ saṁ° B °hâbrâhmaṇo saṁ° M °d âmagaṁdha bhâvamâ° BM °ṇasya taṁ°. — 8². M taṁ na çûkshmâ agârasyâriyaṁ agâ° B °kyaṁ nagâ° M °dhyâvasittâ ekâṁtasaṁli° M °kâṁnânava° BM °tuṁ(M °tu) alpa jivitavyaṁ(B °vyaṁ |) gamaniyaṁ saṁ° M °ṇaṁ tasyâ jñâtavyaṁ prâ° B °smâd dhâtavyaṁ prâ ° ryaṁ ca na ki.ṁ° M °ryyaṁ ca | na | kiṁ ° paṁ karttavyaṁ ‖ .

12¹. M °râjñâṁ yatad a°. — 12². M °hmaṇo hi ° bhavaṁti | . — 13¹. M °naṁ ceyaṁ mahâgoviṁdâ brâhmaṇo bhogeha upanimaṁtrehi ‖ B °vindo brâhmaṇo bho°. — 13². M atha khala paṁ° B °çisha te° M °goviṁdaṁ brâ ° nimaṁtretsuḥ | B °ntretsuḥ | . — 14. M saṁvidyaṁti bho mahâgovido i ° tâ | manu ° bdhâ dhârmakena ba° BM °bhisâhitâ abhisaṁmu(M °mû)ḍhâ° M °ḍhâ tataḥ bhavâṁ mahâgoviṁdo dhanam âdiya ° govido agârasyâcagâri°.

17. B °çisha ma° M °goviṁdo brâ ° ḍ râjñam eta° B °ḍ râra eta°.

श्चिख महागोविन्दो ब्राह्मणो षड्राजां एतदवोचत् ॥ संविद्यन्ति खलु भवन्तो अस्माकमपि प्रभूता मानुष्यका भोगा धार्मिका धर्मलब्धा धार्मिकेन बलेनाभिसाहृता अभिसमूढा तानपि चाहं अपहायागारस्यानगारियं प्रव्रजिष्यं ॥ तत्कस्य हेतोः ॥ श्रुतं हि महाब्रह्मणः संमुखादामगन्धं भाषमाणस्य । तं न शक्यं अगारमध्यावसता एकान्तसंलिखितं एकान्तानवद्यं परिशुद्धं पर्यवदातं ब्रह्मचर्यं चरितुं अल्पकं जीवितव्यं गमनीयं सांपरायं नास्ति जातस्यामरणं तस्माज्ज्ञातव्यं प्राप्तव्यं बोद्धव्यं कर्तव्यं कुशलं चरितव्यं ब्रह्मचर्यं न किंचिल्लोके पापं करणीयं ॥ अथ खलु पंचश्चिख तेषां षण्णां राज्ञामेतदभूषि ॥ ब्राह्मणा हि नाम एते स्त्रीलुब्धा भवन्ति । यं नूनं वयं महागोविन्दं ब्राह्मणं स्त्रीभिरुपनिमन्त्रयेम ॥ अथ खलु पंचश्चिख षड्राजानो महागोविन्दं ब्राह्मणं स्त्री[332a]भिरुपनिमन्त्रेन्सुः ॥ संविद्यन्ति भो महागोविन्द इमेषु षट्सु राज्येषु प्रभूता स्त्रियः प्रासादिका दर्शनीया अत्युद्रावकाशा परमया शुभवर्णपुष्कलतया समन्वागता ततः भवां महागोविन्दो स्त्रियः आदियतु मा भवां गोविन्द अगारस्यानगारियं प्रव्रजतु ॥ एवमुक्ते पंचश्चिख महागोविन्दो ब्राह्मणो तां षड् राजां एतदवोचत् ॥ संविद्यन्ति खलु भवन्तो अस्माकमपि चत्वारिंशत्सदृशीयो भार्या प्रासादिका दर्शनीया अत्युद्रावकाशा परमया शुभवर्णपुष्कलतया समन्वागता ता पि चाहमपहाय अगारस्यानगारियं प्रव्रजिष्यं ॥ तत्कस्य हेतोः ॥ श्रुतं हि ब्रह्मणो संमुखादामगन्धं भाषमाणस्य । तं न शक्यमगारमध्यावसता एकान्तसंलिखितं एकान्तानवद्यं परिशुद्धं पर्यवदातं ब्रह्मचर्यं चरितुं अल्पकं

1. B savidya° M samvidyaṁti khalu bhavaṁto a° B °bhogâ dhârmiko dharma° BM °balenâ(M °le)bhyâhṛitâ abhisaṁmû° M °hâya agârasyâ° B °hâyogârasyâ° M °jishyati | . — 4^1. BM °hâbrâhmaṇaḥ(M °ṇo) saṁ° M °d ânagaṁdhaṁ bhâ° BM °sya taṁ°. — 4^2. M tan na° BM °dhyâvasatâ(B °to |) ekântaṁ(M °kâṁtaṁ) saṁlikhitaṁ ekânto(M °kâṁtâ)navadyaṁ° M °sâṁparâyo nâsti jâtamaraṇaṁ tasyâ jñâtavyaṁ prâ° B °smâṭ ṭâtvyaṁ prâ° ryaṁ na hi na hi kiṁ°.

7. M °çikho teshâṁ sharṇṇâ dâtâm eta° B °râjñâṁm eta° BM °shi brâ°. — 8. M °bhavaṁti | . — 9^1. M °nûnâhaṁ vayaṁ mahâgoviṁdaṁ brâ° BM °bhir ûpa° M °niyaṁtrayema | . — 9^2. M °shaṭ râjâno mahâgoviṁdabrâ° B °ḍ râjâno mahârâjâno mahâgo° BM °bhir ûpa° M °nimaṁtrayetsu B °ntretsuḥ ‖ . — 10. M saṁvidyaṁti mahâgoviṁda i° BM °bhûtâ prâ° M °çâ paramâye çu ° latâye sa° B °samatvâga° M °taḥ bhavân mahâgoviṁdo striyo âdiyatu mâṁ bhavâṁ mahâgovida agânagâri° B °agârisyâ ° vrajitu | .

13. M °râjñâm e° B °shaṭ râjñâm e°. — 14. M saṁvidyaṁti ° bhavaṁto a ° riṁçan sa ° ramâye çu ° gatâ pi câhaṁ apa° B °gatâ pi câha | agârisyâ° BM °jishyaṁti ‖ .

17^1. M çrutvâ taṁ hi mayâ brâhmaṇaṁ saṁ° B °hi brâhmaṇaṁ saṁ° M °d âtmagaṁdhaṁ bhâvamâ° B °gandhâṁ bhâ° BM °ṇasya taṁ°. — 17^2. M taṁ na çyakyaṁ agâ ° dhyâvasitâṁ ekâṁtaṁ saṁ | likhitaṁ ekâṁtânavadyaṁ° B °satâ ekântaṁ saṁlishitaṁ | ekântâ ° jivitavyaṁ mamani° M °gamaniyaṁ nâsti ° brahmaryaṁ° B °llokaṁ pâ°.

जीवितव्यं गमनीयः संपरायो नास्ति जातस्यामरणं तस्माज्ज्ञातव्यं प्राप्तव्यं बोद्धव्यं कर्तव्यं कुशलं चरितव्यं ब्रह्मचर्यं न च किंचिल्लोके पापं करणीयं ॥ एवमुक्ते पंचश्चिख ते षड्राजानो महागोविन्दं ब्राह्मणमेतदुवाचत् ॥ तेन हि महागोविन्द प्रतिपालेहि सप्त वर्षाणि यावद्वयं स्वकस्वकेहि राज्येहि पुत्रभ्रातॄकां स्थापयित्वा आगमिष्याम यावच भवतो महागोविन्दस्य गतिर्भविष्यति सा चास्माकमपि गतिर्भविष्यति ॥ एवमुक्ते पंचश्चिख महागोविन्दो ब्राह्मणस्यां षड्राजां एतदवोचत् ॥ अतिचिरं खल्वेतं भवतां यमिदं सप्त वर्षाणि प्रव्रजिष्याम्यहं अगारस्यानगारियं ॥ तत्कस्य हेतोः ॥ श्रुतं हि मया महाब्रह्मणः संमुखादामगन्धं भाषमाणस्य तं न शक्यं ..... पापं कर्म करणीयं ॥ एवमुक्ते पंचश्चिख ते षड्राजानो महागोविन्दं ब्राह्मणमेतदवोचत् ॥ तेन हि त्वं महागोविन्द प्रतिपालेहि षड्वर्षाणि । एवं पेयालं पंच वर्षाणि चत्वारि वर्षाणि चीणि वर्षाणि द्विवर्षाणि एकवर्षं । सप्तमासानि प्रतिपालेहि [332b] यावद्वयं महागोविन्द स्वकस्वकेहि राज्येहि पुत्रभ्रातॄकां स्थापयित्वा आगमिष्यामः यावच भवतो गोविन्दस्य गतिर्भविष्यति सा चास्माकं पि गतिर्भविष्यति ॥ एवमुक्ते पंचश्चिख महागोविन्दः ब्राह्मणस्यां षड्राजां एतदवोचत् ॥ अतिचिरं खल्वेतं भवन्तो यमिदं सप्त मासा प्रव्रजिष्याम्यहं अगारस्यानगारियं ॥ तत्कस्य हेतोः ॥ श्रुतं मया महाब्रह्मणः संमुखादामगन्धां भाषमाणस्य तं न शक्यं ..... पापं करणीयं ॥ एवमुक्ते पंचश्चिख ते षड्राजानो महागोविन्दं ब्राह्मणं एतदवोचत् ॥ तेन

2. B °çisha te° M °jâto mahâgoviṁdaṁ brâ° B °hmaṇaṁm e° M °m etad avocat | . — 3. M °mahâgoviṁdâ pra° B °shyâmi yâ° M °shyâma | yâvad bhagavato mahâgoviṁdasya ° smâkaṁ gati°. — 5. M evaṁm u ° goviṁdo brâhmaṇaṁ strinad râjñâm e° B °ḍ râjñam eta°.

6. M khalvena bha ° pta ca va° BM °agârisyâ°. — 7^2. BM °hâbrâhmaṇaḥ(M °ṇa) saṁ° M °d ânmagandhaṁ ° sya taṁ çakyaṁ° B °çakyam agâ° M °dhyâvasinâ ekâṁtasaṁ ° ekâṁtaanavadyaṁparivadâ ° lpajivitaṁ ga° B °jivitaṁ ga° M °ṇaṁ jñâtavyaṁ prâptabo°. — 9^1. M °çikha shaḍ râ° B °govindo brâ° M °goviṁdo brâhmaṇaṁm e°. — 9^2. B °hi to mahâ° M °hi bho mahâbhovida pranipâ° B °nda prâtipâ°. — 10. M °peyâtaṁ | paṁca varshâṇi trini varshâṇi catvâri varshâṇi hi varshâṇi e° B °catvâra va°.

11. M °yaṁ mahâgoviṁda svaka ° bhrâtṛiṇâṁ sthâ ° shyâmiḥ yâvad bhagavato goviṁdasya° B °maḥ | yâ ca bhagavato go° BM °ti | sâ (M °ti so) câ°. — 13. M °vindo brâ° B °ḍ râjñâ e° M °ḍ râjânam eta°. — 14. M °lvedaṁ bhavaṁto yam idaṁ sa mâsâṁ pra° B °mâsâṁ pra ° haṁ | a ° riyaṁ ta°. — 15^2. BM °hâbrâhmaṇaḥ(M °ṇa) saṁmu° M °d âmagaṁdhâ bhâ ° sya naṁ ta na ça ° dhyâvasita ekâṁtasaṁ° BM °khitaṁ ekânta(M °kâṁta)navadyaṁ° M °jivitaṁ gamaniyaṁ sâṁpa° B °niyaḥ | sâṁpa ° ṇaṁ | tasmâ° M °prâptaṁ bo ° kiṁvillo°.

$17.^1$ M evaṁm u ° ḍ râjâto mahâgoviṁdaṁ brâhmanam eta° B °ḍ râno mahâgovindo brâ°. — 17^2. M °goviṁda pra ° shan mâ yâvad va ° bhrâṭriṁkâṁ°.

हि महागोविन्द् प्रतिपालेहि षण्मासां यावद्वयं स्वकस्वकेहि राज्येहि पुत्रभ्रातृकां स्थापयित्वा आगमिष्यामः । एवं सर्वत्र कर्तव्यं येयालं पंच मासां चत्वारि मासां त्रीणि मासां द्वे मासां एकमासं याव वयं स्वकस्वकेहि राज्येहि पुत्रभ्रातृकां स्थापयित्वा आगमिष्यामः या च भवतो महागोविन्दस्य गतिर्भविष्यति सा चास्माकं पि गतिर्भविष्यति ॥ एवमुक्ते पंचशिख महाब्राह्मणो महागोविन्दस्तां षड्राज्ञ एतद्वोचत् ॥ अतिचिरं खल्विदं भवन्तो यमिदं अर्धमासं प्रव्रजिष्यामि अहं अगारस्थानगारियं ॥ तत्कस्य हेतोः ॥ श्रुतं हि ..... पापं कर्म करणीयं ॥ एवमुक्ते पंचशिख ते षड्राजानो महागोविन्दं ब्राह्मणमेतद्वोचत् ॥ तेन हि भो महागोविंद प्रतिपालेहि सप्त दिवसानि यावद्वयं स्वकस्वकेहि राज्येहि पुत्रभ्रातृकां स्थापयित्वा आगमिष्यामः या च भवतो गोविन्दस्य [333ᵃ] गतिर्भविष्यति सा अस्माकमपि गतिर्भविष्यति ॥ एवमुक्ते पंचशिख महागोविन्दो ब्राह्मणस्तां षट् क्षत्रियानेतद्वोचत् ॥ अल्पकं खल्विदं भवन्तो यमिदं सप्त दिवसानि तेन हि भवन्तो सुखीभवथ यस्येदानिं कालं मन्यथ ॥

अथ खलु पंचशिख महागोविन्दो ब्राह्मणो येन तानि सप्त ब्राह्मणमहाशालसहस्राणि सप्त च स्नातकशतानि तेनोपसंक्रमित्वा एतद्वोचत् ॥ एन्तु भवन्तो एन्तु भवन्तः अन्यं दानि उपाध्यायं पर्येषथ यो वो मन्त्राणि वाचयिष्यति । प्रव्रजिष्याम्यहं अगारस्थानगारियं ॥ तत्कस्य हेतोः ॥ श्रुतं हि मया महाब्रह्मणो संमुखादामगन्धं भाषमाणस्य ..... पापं कर्म करणीयं ॥ एवमुक्ते पंचशिख

2. M °triṇi mâsâr dve mâso ekamâsâṁ yâvad vayaṁ° B °shyâmaḥ | yâ° M °shyâma | yâvad bhavaṁto mahâgoviṁda ° ti | so câsmâkam api° B °vishyati e°. — 5. M evaṁm u° B °çisha mahâbrâhma mahâgovindos tâṁ° M °çikha mahâbrâhmaṇas tâṁ shaḍ râjñaṁ eta°.

6. M °khalvedaṁ bhavaṁto ya ° jishyâmyahaṁ°. — 7². M °hi tayâ° BM °hâbrâhmaṇaḥ (M °ṇa) saṁmu ° gaṁdhâ bhâ° M °çakyaṁ agâram adhyâ ° tâ ekâṁtasaṁli ° ekontonavadyaṁ ° lpaji ° sâṁparâyanaṁ tasmâ ° çalaṁ nvaritavyaṁ bra°. — 7³. M °goviṁdaṁ brâhmaṇaṁm e°. — 8. M °bho goviṁda pra° BM °lehi yâvad va(M °d dha)yaṁ° M °maḥ yâvad bhagavato goviṁdasya gatir bhavishyati | so alokam api°.

11. M °goviṁdo brâ °shaṭ satri° B °shaṭ kshetri°. — 12. M °lvidaṁ bhagavato ya° BM °sahâ di° M °hi bhavaṁto sukhîbhavagha yasya idânîṁ kâ°. — 14. M °goviṁdo brâhmaṇâ ye° B °ndo brâhmaṇe ye ° eta vocat ‖ . — 15. M etu bhavanto entu anyadâpi u° B entu bhavato entu bhavataḥ anya dâni u ° ryepetha° M °ryyepatha yâpa maṁtrâni vâ° B °ntrâni vâ°.

16. B °yaṁ ta°. — 17². BM °hâbrâhmaṇaḥ sa(B °ṇa saṁ)mu° M °d âmagaṁdhâ bhâ° B °gaṁdhâṁ bhâ ° kyaṁm agâramadhye vasa° M °satâ ekaṁtasaṁlikhitaṁ | ekâṁtâṁnavadyaṁ° BM °sâṁparâyo nâsti jâtasyâ(M °sya)maraṇaṁ(M °ṇaṁ |) tasmâ° M °bodhavyaṁ karttavyaṁ brahmacaryyaṁ caritavyaṁ na kiṁ ° pâpaṁ karaṇiyaṁ ‖ . — 18. BM °hâsâ-(M °çâ)lasahasrâ sapta(M °srâṇi saptaka) snâ° M °govidaṁ brâ°.

तानि च सप्त ब्राह्मणमहाशालसहस्राणि सप्त च स्नातकशतानि महागोविन्दं ब्राह्मणमेतद्वोचत् ॥ मा भवां गोविन्दो अगारस्थानगारियं प्रव्रजतु प्रव्रज्या हि नामैषा ते महागोविन्द् अल्पार्थिका च अल्पभोगा च अल्पेशाख्या च अल्पानुशंसा च ब्राह्मणं पि नामैतं भो महागोविन्द् महार्थियं च महाशालं च महेशाख्यं च महानुशंसं च ॥ एवमुक्ते पंचशिख महागोविन्दो तानि च सप्त ब्राह्मणसहस्राणि सप्त च स्नातकशतानि एतद्वोचत् ॥ मा भवन्तो एवं वदित्थ प्रव्रज्या हि नामैषा भवन्तो महर्द्धिया च महालाभा च महेशाख्या च महानुशंसा च ब्राह्मणं पि नामैतं भवन्तो अल्पार्थियं च अल्पलाभं च अल्पेशाख्यं चाल्पानुशंसं च यं पि तावद्भवन्तः किंचित्संजानन्ति सर्वन्तं अस्माकमेव निदानं ॥ एवमुक्ते पंचशिख सप्त ब्राह्मणसहस्राणि सप्त च स्नातकशतानि महागोविन्दं ब्राह्मणमेतद्वोचत् ॥ एवमेतं भो उपाध्याय एवमेतं प्रव्रज्या नामैषा महर्द्धिया च महालाभा च महेशाख्या च महानुशंसा च ब्रा[333ᵇ]ह्मणं पि नामैतं भो उपाध्याय अल्पार्थियं चाल्पलाभं चाल्पानुशंसं च यं पि तावद्वयं किंचिदाजानाम सर्वन्तं तवोपध्याय निदानं या च भवतो उपाध्यायस्य गतिर्भविष्यति सा अस्माकमपि गतिर्भविष्यति ॥ एवमुक्ते पंचशिख महागोविन्दो ब्राह्मणो तानि च सप्त ब्राह्मणमहाशालसहस्राणि सप्त च स्नातकशतानि एतद्वोचत ॥ तेन हि भवन्तो सुखीभवथ यस्येदानिं कालं मन्यथ ॥

2. M °vâṁ goviṁda agârasyâ° BM °jyâ hi nâmeshâṁ(M °shâṁ) to mahâgovindo (M °viṁdo) alpârthikâ(M °ko) ca alpabhogâ ca alpasaṁkhyâ ca alpânu(M °lpâtusaṁ)çâ ca brâhmaṁṇyaṁ(M °hmaṇaṁ) hi nâmai(M °nâme)taṁ° M °bho mahâ bho goviṁda maharddhikaṁ ca mahâçâlaṁ° B °vindaṁ maharddhiyaṁ ca mahâçâraṁ ca mahe° M °nuçâsaṁ ca ‖ B °çaṁsâ ca ‖ . — 5. M evaṁm u ° çisha mahâgoviṁdo tâ ° snânaka°.

6. M mâ bhavaṁto evaṁ carishyatha pra° B °evaṁ carittha ° jyâ hi nâmeshâ° M °jyâ hi nâmeshâṁ bhavaṁto maharddhiko yâvat mahâlâbhaṁ ca mahânusaṁçâ ca mahâbrâhmaṇaṁ hi nâ° B °ṇyaṁ hi nâ° M °bhavaṁto alpârthikâṁ ca alpalâbhaṁ ca alpasaṁkhyâ alpanusaṁçâ ca(*ou* va?) yaṁ pi° B °bhaṁ ca alpasaṁkhyâ câ° M °bhavaṁto kiṁ ° jânaṁti saṁrva ° kam evaṁ ni°. — 9. M °ṇi sapta ca stâtakaça ° goviṁda brâ°. — 10. B evam etaṁ bho upadhyâye evam etaṁ bho pra° M °evaṁm etaṁ bho prajyâ mesho maharddhikâ ca mahâlâbhâ° B °shâ upâdhyâya maharddhi° M °khyâ ca mahânusaṁçâ ca brâ° B °hmaṇaṁ hi nâmai° M °ṇyaṁ dvi nâmetaṁ upâdhyâyaṁ nidânaṁ yâvad bhagavato bho upâdhyâya alpârthikaṁ câlpalâ ° lpânusaṁçâ ca ya pi tâva vayaṁ kiṁcid âjânima sarvâvaṁtaṁ bhaṁvataṁ evaṁ taṁ evopâdhyâya ni° B °rvan taṁ evopâdhyâ° M °dânaṁ | yâvacca(?) bhavaṁto upâdhyâya nidânaṁ yâvad bhavaṁto upâdhyâyasya gatir bhavishya | sâ câsmâkaṁ pitâ gatir bha° B °dânaṁ yâva bhavato upâdhyâyasya gatir bhavishyati | sâ asmâkaṁm api°.

14. M °goviṁdo brâhmaṇo ° hmasâmahâ°.

16. M °bhavaṁto su ° tha | yasya idânî kâ° B °dânî kâla manyathâ ‖ .

अथ खलु पंचशिख महागोविन्दो ब्राह्मणो येन ता चत्वारिंशत्सदृशी भार्या तेनोपसंक्रमित्वा चत्वारिंशत्सदृशीयो भार्यायो एतदवोचत् ॥ एन्तु भोतीयो या इच्छन्ति स्वकस्वकानि ज्ञातिकुलानि गच्छन्तु या इच्छन्ति अन्यं भर्तारं पर्येषन्तु या इच्छन्ति ता इमस्मिन् एव ब्राह्मणकुले वसन्तु ॥ संविद्यन्ति इमस्मिं ब्राह्मणकुले प्रभूता मानुष्यका भोगा धार्मिका धर्मलब्धा धार्मिकेन बलेनाभिसाहृता अभिसमूढा । प्रव्रजिष्याम्यहं अगारस्यानगारियं ॥ तत्कस्य हेतोः ॥ श्रुतं हि मया महाब्रह्मणः संमुखादामगन्धं भाषमाणस्य तं न शक्यं अगारमध्यावसता एकान्तसंलिखितं एकान्तानवद्यं परिशुद्धं पर्यवदातं ब्रह्मचर्यं चरितुं ॥ तत्कस्य हेतोः ॥ अल्पकं जीवितं गमनीयं सांपरायं नास्ति जातस्यामरणं तस्मात् ज्ञातव्यं प्राप्तव्यं बोद्धव्यं कर्तव्यं कुशलं चरितव्यं ब्रह्मचर्यं न किंचिल्लोके पापं कर्म करणीयं ॥ एवमुक्ते पंचशिख ताश्चत्वारिंशत्सदृशीयो भार्यायो महागोविन्दं ब्राह्मणमेतदवोचत् ॥ आर्यो खल्वस्माकं गोविन्दो भर्ता भर्ताकाले सखा सखीकाले या च आर्यस्य महागोविन्दस्य गतिर्भविष्यति सा अस्माकमपि गतिर्भविष्यति ॥ एवमुक्ते पंचशिख महागोविन्दो ब्राह्मणो तां चत्वारिंशत्सदृशीयो भार्यायो एतदवोचत् ॥ तेन हि भोतीयो सुखीभवथ यस्य दानिं कालं मन्यथ ॥

अथ खलु पंचशिख महागोविन्दो ब्राह्मणो तदहो सप्त[334a]मे दिवसे केशश्मश्रूण्यवतारयित्वा काषायाणि वस्त्राणि आच्छादयित्वा अगारस्यानगारियं प्रव्रजितः ॥ तथा प्रव्रजितं पुनः समानं सप्त च राजानो अनुप्रव्रजेन्सुः सप्त च

1. M °goviṁdo brâ° BM °yena sâ(M °so) catvâriṁçat(M °çatân) sadṛiçî bhâryâ te° M °kramitvâ riṁçat bhâryân eta°. — 2. B ento bhotiyo yâvad itsati | svaka° M entu bho bhrâtṛiyo yâvadi svaka° BM °lâni icchantu(M °cchaṁtu) yo icchanti(M °cchati) anyaṁ° B °raṁ payesha° M °raṁ preshayaṁtu yâ icchaṁti tâ imasmiṁ evaṁ brâ° B °smin evaṁ brâ° M °le vasaṁtu B °santu saṁ°. — 4. M saṁvidyaṁti | i ° bhûta manu ° kena cale° BM °nâbhisâhitâ abhisaṁmûdhâ°.

6[3]. BM °hâbrâhmaṇaḥ° B °gandhâṁ bhâ° M °magaṁdhâ bhâshamâṇa tan na ça ° satâṁ ekâṁtasaṁ ° ekâṁnânavadyaṁ° BM °ddhaṁ payavadâ°. — 8. M °hetor alpa°. — 9. B °taṁ ramaṇiyaṁ sâṁ° BM °smât | jñâtavyaṁ prâ° M °ptavyaṁ prâptavyaṁ bo ° hmacaryaṁ ca kiṁ°. — 10. M °kha tâṁ catvâ ° çiyaṁ bhâryâṁ ye mahâgoviṁda brâ°.

12. M âryya khalvasmâkaṁ mahâgoviṁdo devo kâle bharttâ bharte kâlaṁ sakhâ sakhakâle yâvad âryа° B °ndo kâle bharttâ bharttakâle sakhâ | sakhi° M °goviṁdasya° B °shyati | sâ° M °sâ câsmâkaṁ pi°. — 13. M evaṁm u ° goviṁdo brâ ° riṁça sadṛi ° ryâye(?) e°. — 14. B °hi yo bhoti ° tha | ya° M °sya idâniṁ kâ° B °kâla manyathâ ‖ .

16. M °goviṁdo brâ° B °çmaçrunya° M °çmaçrunyavatâ ° shâyânyâcchâ ° agânagâriyaṁ° B °agârisyâ° M °jito. — 18. M °naḥ samâno sapta râjâ° BM °no anupravrajetsuḥ(M °tsu |) sapta ca brâ ° çatâni anupravrajetsuḥ tâ (M °tsûḥ |) catvâ ° ryâyo(M °ryâye) anupravrajetsuḥ | kaḥ (B °tsuḥ kaḥ) pu° M °jananâye B °janatâye sâ a°.

ब्राह्मणमहाशालसहस्राणि सप्त च स्नातकशतानि अनुप्रव्रजेन्सुः ता चत्वारिंशत्सदृशीयो भार्यायो अनुप्रव्रजेन्सुः कः पुनर्वादो अन्यायै वेलासिकायै जनतायै ॥ सा अभूषि परिषा अनेकशता अनेकसहस्रा ॥

महागोविन्दो खलु पुनः पंचशिख ब्राह्मणो बाहिरको कामेषु वीतरागो सो ब्रह्मलोकसहव्रतायै श्रावकाणां धर्मं देशयति ॥ ये खलु पुनः पंचशिख महागोविन्दस्य ब्राह्मणस्य श्रावकाः सर्वेण सर्वं धर्मं देशितमाजानन्ति ते ब्रह्मलोकसहव्रतायै उपसंपद्यन्ति ॥ ये खलु पुनः पंचशिख महागोविन्दस्य ब्राह्मणस्य श्रावका न सर्वेण सर्वं धर्मं देशितमाजानन्ति ते कामावचरेषु देवेषूपपद्यन्ति ॥ अप्येकत्या चतुर्महाराजकायिकानां सहव्रतायै उपपद्यन्ति अप्येकत्या चयस्त्रिंशानां देवानां अप्येकत्या यामानां अप्येकत्या तुषितानां अप्येकत्या निर्माणरतीनां अप्येकत्या परनिर्मितवशवर्तीनां देवानां सहव्रतायै उपसंपद्यन्ति ॥ ये खलु पुनः पंचशिख स्त्रियो वा पुरुषा वा महागोविन्दे ब्राह्मणे प्रसन्नचित्तानि श्रावकेषु चास्य ते कायस्य भेदात्परं मरणादपायदुर्गतिविनिपातं नरकेषूपपद्यन्ति ॥ ये खलु पुनः पंचशिख स्त्रियो वा पुरुषा वा महागोविन्दे ब्राह्मणे . . . . चित्तानि श्रावकेहि चास्य ते कायस्य भेदात्परं मरणात् सुगतिं स्वर्गं कायं देवेषूपपद्यन्ति ॥ यं खलु पुनः पंचशिख महागोविन्दो ब्राह्मणो ग्रामं वा निगमं वा उपनिश्राय विहरति तत्रापि भवति राजा वा राष्ट्रस्य देवो वा गृहपतिकायै ब्रह्मा वा ब्राह्मणानां ॥ यत्रापि निष्क्रमति प्रतिपद्यति तत्रापि भवति राजा वा राष्ट्रस्य देवो वा गृहपतिकायै ब्रह्मा वा ब्राह्मणानां ॥ अपि हि जितं ब्राह्मणगृहपतिका निगमजानपदा उत्खलिता इमं उदानमुदानयन्ति ॥ नमस्तस्य आर्यस्य महागोविन्दस्य नमो आर्यस्य सप्तपुरोहितस्य ॥

3. M sya abhûshi | pa° B °risho anekaça° M °çatâ anekaha° BM °sraṇi ma°. — 4. M °hâgovido kha° B °ndo ‖ kha° M °go sa bra° B °loke sa° BM °çrâvakâye dha°. — 5. M °puna paṁ ° goviṁdasya brâ ° çrâvakâ sarve ° çitâ jânaṁti te° B °çitâm âjâ° M °saṁpadyaṁti | .

7. M °goviṁdasya çrâvaka sarve° B °çrâvakâṁ sarve° M °jânaṁti | te° B °jânanti | te° M °shûpapadyaṁte | . — 8. M °yikânâṁ sahavratâya upapadyaṁti | apyekanyâ tra° BM °çânâṁ devânâṁ apyekatyâṁ(M °kanyâ) yâmânâṁ tushitânâṁ apyekatyâṁ nirmâṇarati(M °kanyâ nimâtarani)nâṁ apyekatyâ(B °tyâṁ) paра° M °saṁpadyaṁti | .

11. M °çikha striṁyo° BM °purusho vâ mahâ° M °goviṁde brâ° B °nde karusha° M °ṇe karusha ° câsyâṁte kâ° B °câsyânte kâ° M °keshupapadyaṁti | . — 13. B °çikho stri° M °çikha mahâ° (l. 16) B °purusho vâ mahâ ° ṇe cittâ°. — 15. M °goviṁdo brâ ° upaviçrâ° BM °rati(M °ti |) tatra ca bhavati râjâ(M °jo) vâ râshṭra° M °patir brâhmaṇâ vâ brâhmaṇena vâ api hi° (l. 19) B °kâya brâhmâ vâ brâhmaṇena | .

17. B °dyati | tatrâpi ° patiko vâ bra ° nâṁ vâ api°. — 19. B °taṁ | brâ ° uskhali° M °imam udânam udânayaṁti ‖ . — 20. M °goviṁdasya tato sapta° BM °hitasya ‖

इदमवोचद्भगवान् राजगृहे विहरन्तो गृध्रकूटे पर्वते इमस्मिंश्च पुनर्व्याकरणे भाष्यमाणे पंचशिखस्य गन्धर्वपुत्रस्य विरजं विगतमलं धर्मेषु धर्मचक्षुर्विशुद्धं आत्तमनः पंचशिखो गन्धर्वपुत्रो भगवतो भाषितमभ्यनन्दे ॥

भगवानाह ॥ स्यात्खलु पुनर्भिक्षवो युष्माकमेवमस्यादन्यः स तदा महागोविन्द नाम ब्राह्मणो अभूषि । न खल्वेतदेवं द्रष्टव्यं । तत्कस्य हेतोः । अहं स भिक्षवः तेन कालेन तेन समयेन महागोविन्दो नाम ब्राह्मणो अभूषि । तदापि मया प्रव्रजितेन महाजनकायो अनुप्रव्रजितो । एतरहिं पि मया प्रव्रजितेन महाजनकायो अनुप्रव्रजितो ॥

समाप्तं गोविन्दीयं भगवतो पूर्वेनिवाससंप्रयुक्तं सूत्रं ॥

भगवां सम्यक्संबुद्धो यदर्थं समुदागतस्तमर्थमभिसंभावयित्वा श्रावस्त्यां विहरति जेतवने अनाथपिण्डस्यारामे शास्ता देवानां च मनुष्याणां च सत्कृतो गुरुकृतो मानितो पूजितो अपचितो विस्तरेण निदानं कृत्वा यावच्चेतोवशिप्राप्ता च पुनर्बुद्धा भगवन्तो येहि येहि विहारेहि आकांक्षन्ति विहरितुं तेहि तेहि विहारेहि

(M °sya) idam avocad bhagavân idaṁ vaditvâ [334b] sugato athâparaṁ(M °pare) etad uvâca ‖ çâstâ(M °stâ ‖ ‖) bhûtapûrvaṁ çrutaṁ bho brahmadatte(M °tto) ca veçyâ abhû | (M °bhût |) atha bharataruṇadhṛitaràshṭro(M °râjño) ityete ashṭa bhrâtaro ‖ .

1. BM °harato gri° M °ddhakuṭe ° imasmiṁ ca punar vyâ° M °sya gaṁdha° BM °virajo vigatamalaṁ dharme(M °dhame)shu° M °kshuviçu ° âtamano paṁ ° kho gaṁdharva ° bhyanaṁdann iti ‖ . — 4². M °d anya sa tena kâlena tena samayena mahâgoviṁdo nâma mahâbrâ° B °shi | na°. — 5¹. B °lvevaṁ dra°. — 5². M °hetor ahaṁ°. — 5³. M °yena mahâbrâhmaṇa a°.

7. M etarhi pi mayâ pravraṁjaṁtenâ ma ° vrajate ‖ . — 9. M iti çrimahâvastuavadâne goviṁdo bha° B °ndiye bha° M °pûrvani ° traṁ samâptaṁ ‖ . — 10. M atha khalu bhagavân samya° B °ddho yadartha samupâgatas ta° M °ddho yadartha samudâgatasya tam arthaṁ abhi ° yitvâ irâvastyâṁ ° piṇḍâdasyâ° B °çiprâpta ca punar bu° M °çitâprâpto ca puna buddhâ bhâ bhagavaṁto yehi yehi vihareti ujja° B °kâṁkshati viharituṁ° BM °jju(M °jja)cittâ mṛiducittâ(M °ducitâ) karmaṇiyarihâhita(M °hina)cittâ maitra-(M °tracittâ maitra)cittâ dânta(M °dâṁta)cittâ çânta(M °çâṁta)cittâ muktacittâ çuddhacittâ vimalacittâ pâṇḍa(M °pâṁṇḍu)cittâ ° viniva(M °nica)raṇacittâ ṛi ° sthitacittâ(M °sthiracitâ) supratishṭhi(B °tisthi)tacittâ asaṁgacittâ asa(M °ça)ktacittâ adushṭacicittâ amû ° pṛithivîsamacittâ âpa(B °âyo)samacittâ tejo° B °vâyusamacittâ ‖ kâci° M °spaçopamacittâ indrakîlopamacittâ suvimuktaprajñâ ° ptapârishâ âveṭipṛâkârâṇiragaü ârya° B °ptapânikhâ âveṭipṛâkâ nirargaḍa ârya° M °dharmâ dhvaja 'gramaçottamâ brâhmaṇotamâ ksha° BM °triyasnâta(M °snâna)kâ ve° M °tyavâdino martha ° paritavâdino tathâvâdino avitatha ° smâ tathâgataḥ avitathâvâdino ti vâcati | B °t tathâgato ananyathâvâdino vuccati ‖ .

विहरन्ति उज्जुचित्ता मृदुचित्ता कर्मणीयसमाहितचित्ता मैत्रचित्ता दान्तचित्ता शान्तचित्ता मुक्तचित्ता शुद्धचित्ता विमलचित्ता पाण्डुचित्ता प्रभास्वरचित्ता विनीवरणचित्ता ऋजुचित्ता स्थितचित्ता सुप्रतिष्ठितचित्ता असंगचित्ता असक्तचित्ता अदुष्टचित्ता अमूढचित्ता पृथिवीसमचित्ता आपोसमचित्ता तेजोसमचित्ता वायुसमचित्ता काचिलिंदिकमृदुरुशैोपमचित्ता इन्द्रकीलोपमचित्ता सुविमुक्तचित्ता सुविमुक्तप्रज्ञा उत्क्षिप्तपरिखा आवेठितप्राकारा निरर्गडा आर्यधर्मध्वजाग्रमणोत्तमा ब्राह्मणोत्तमा क्षत्रिया स्नातका वेदपारगा सत्यवादिनो अर्थवादिनो न्यायवादिनो अविपरी[335a]तवादिनो अवितथवादिनो अनन्यथावादिनो (तस्मात्तथागतो अनन्यथावादीति उच्यति) ॥

तत्र खलु भगवानायुष्मन्तमानन्दमामन्त्रयति ॥ एकपिण्डपाचेणाहं आनन्द चैमासं निषीदिष्यं पुरिमकानां तथागतानां अर्हतां सम्यक्संबुद्धानां विहारेहि विहरिष्यं मा मे कथंचिदुपसंक्रमितव्यं अन्येन ॥ साधु भगवन्निति आयुष्मानानन्दो भगवतः प्रत्यश्रोषीत् ॥ अथ खलु भगवान्चैमासं निषीदेत् एकपिण्डपाचेण पुरिमकानान्तथागतानामर्हतां सम्यक्संबुद्धानां विहारेहि विहरन्तो ॥

अथ खलु भगवां चैमासस्यात्ययेन सायाह्नसमये प्रतिसंलयना व्युत्थाय विहारातो निर्गम्य पर्यंके निषीदेत् ॥ अद्राक्षीत्खलु आयुष्मानानन्दो कुटीप्रच्छदनायां पर्यंके निषण्णं भगवन्तं दृष्ट्वा च पुनः येन भगवान्स्तेनोपसंक्रमित्वा भगवतः पादौ शिरसा वन्दित्वा एकान्ते निषीदि । एकान्ते निषण्णो भगवन्तमेतद्वोचत् ॥ उपशान्तप्रणीतानि भगवत इन्द्रियाणि परिशुद्धो छविवर्णो शुभजातो मुखवर्णो । अथ खलु भगवां प्रणीतेहि विहारेहि विहरन्तो ॥ एवमुक्ते भगवानानन्दमेतद्वोचत् ॥ एवमेतं आनन्द आकांक्षमाणो आनन्द तथागतः एकपिण्डपाचेण कल्पं

10¹. M yan khalu ° yushmaṁtaṁ ânaṁdam âmaṁtrayati | . — 10². M ekapiḍapâ° BM °trenâhaṁ° M °ânaṁda trai° B °nishidishyaṁ° M °shyaṁ pûri ° thâgatâ 'nâṁ 'rhatâṁ° B °rhatâ saṁmya° M °vyaṁ atyayâ B °vyaṁ anyeyâ sâ°.

12. M °dhu bhagavân i | â° B °shmânando° M °n ânaṁdo bhagavato pra°. — 13. B °shidet | e° M °shide e° B °trena pu ° rhatâ saṁmya° M °hâre viharaṁto | . — 15. M °bhagavân traimâ° B °sâyâṁhna° M °samaya pra ° yanâd vyu ° mya paryyaṅke ni°.

16. B °yushman â° M °yushmâm ânando kuṭṭipracchannâyâṁ paryyaṅke niyaṇo bhagavaṁtaṁ dri° B °kuṭipracchanâyâṁ paryaṅke nisha° M °punar yena bhagavan teno ° ekâṁte ni° BM °di e°. — 18. M ekâṁtanishaṇo bhagavaṁtam e° B °sharṇṇo bha°. — 19. M upaçâṁtapra ° gavato i° B °cchavivarṇṇo bhâjanatamu° M °cchavivarṇṇo bhâṁjanasuvarṇṇeṁ (?) | . — 20¹. M °gavân praṇi ° haraṁto | . — 20². M °vân ânaṁdam e°.

21. M °m etam ânaṁda âkâṁ° B °taṁ âna âkâṁ° M °gato ekapi° B °taḥ | ekapi° M °shiditvâ kalpâ°.

IMPRIMERIE NATIONALE.

वा निषीदे कल्पावशेषं वा ॥ तत्कस्य हेतोः ॥ एवमेतं आनन्द् भवति पुरिमकानां तथागतानामर्हतां सम्यक्संबुद्धानां विहारेहि विहरन्तानां यथा दानपारमिताप्राप्तानां शीलपारमिताप्राप्तानां क्षान्तिपारमिताप्राप्तानां वीर्यपारमिताप्राप्तानां ध्यानपारमिताप्राप्तानां प्रज्ञापारमिताप्राप्तानां ॥ तदा आनन्द् असंख्येयकल्पे अप्रमेये असंख्येये कल्पे इन्द्रध्वजो नाम तथागतो ईं सम्यक्संबुद्धो अभूषि ॥ इन्द्रध्वजस्य खलु पुनरानन्द् तथागतस्यार्हतः सम्यक्संबुद्धस्य इन्द्रतपना नाम राजधानी अभूषीत् । द्वादश योजनानि आयामेन पुरस्तिमेन पश्चिमेन च सप्त योजनानि विस्तारेण सप्तहि प्राकारेहि परिक्षिप्ता अभूषि सौवर्णेहि सौवर्णच्छन्नेहि । इन्द्रतपना खलु पुनः [335b] आनन्द् राजधानी सप्तहि तालपंक्तीहि परिक्षिप्ता अभूषि विचित्राहि दर्शनीयाहि सप्तानां वर्णानां सुवर्णस्य रूप्यस्य मुक्ताया वैडूर्यस्य स्फटिकस्य मुसारगल्वस्य लोहितिकाये । सौवर्णस्य तालस्कंधस्य रूप्यमया पत्रा च फला च अभूषि रूप्यमयस्य तालस्कन्धस्य मुक्तामया पत्रा च फला च अभूषि मुक्तामयस्य तालस्कंधस्य वैडूरिकामया पत्रा च फला च अभूषि वैडूर्यमयस्य तालस्कंधस्य मुसारगल्वमया पत्रा च फला च मुसागल्वमयस्य लोहितिकामया पत्रा च फला च अभूषि लोहितिकामयस्य तालस्कंधस्य सुवर्णमया पत्रा च फला च अभूषि ॥ तेषां खलु पुनरानन्द् तालस्कंधानां वातेरितानां वातसंघट्टितानां घोषो निश्चरति वल्गु मनोज्ञः अश्रेचनकः अप्रतिकूलः श्रवणाय । सद्यथापि नाम पंचाङ्गिकस्य तूर्यस्य कुशलेहि वादकेहि सम्यक्संप्रवादितस्य घोषो निश्चरति वल्गु मनोज्ञो अश्रेचनको अप्रतिकूलः श्रवणाये एवमेवानन्द् तेषां ताल

1¹. M °hetor e°. — 1². M evam evam ânanda° BM °bhavati tathâgatâ(M °gate)nâm arhatâm samyaksambuddhânâm puri° M °gatânâm arha ° ddhânâm | tadâ° (l. 4) B °harantânâm | yathâ°. — 4. M °ânamda° BM °khyeyakalpâ a(M °lpân a)prameyâ asamkhe-(M °khye)yâ asamkheye(M °khyeya) kalpe i° M °to rhan sa° B °rham sammya°.

6. M °ânamda tathâ ° rhata sammya° B °tah sammya ° dhâni abhûshit | M °bhûshi | . — 7. M °prâkâreṇa pari ° shi suvarṇṇe ° cchannâni i°. — 9. M indrapatano kha° B °ndratayano kha° M °punar ânamda râjadhâni sapta° BM °tâlapakti ° shi | vi° M °citrâdarça° B °ktâvai° M °sya sphâṭikasya musâgalvasya lohitakapi B °lohitakâye sau°.

11. BM sau(M su)varṇṇasya tâlaskamdhasya rûpyamayam ca patram ca phalam ca abhûshi rûpyamayasya tâlaskandha(M °skamdha)sya mu ° vaiḍûryya(B °ḍulikâ)mayâ patrâ ca phalâ ca abhûshi vai ° musâ(B °sâra)galvamayâ ca (B °yâ patrâ musâgalvamayasya) lo ° shi | lohi° M °rṇṇamayâ ca pa°.

16. M °punar ânamda tâ ° dhânâm vâtari° B °dhânâm vâtenari ° ghoshâ nihcarati° M °nojña asecanako apratikulo çra°. — 18. M tadyathâ° B °kehi sammya° BM °tikûlah (M °lo) çravaṇâye | evam evânanda(M °namda) teshâm(B °shâms) tâla° M °ndhâvânâm vâte° B °ndhânâm vâtari° M °ti | vâlgu°.

स्कन्धानां वातेरितानां वातसंघट्टितानां घोषो निश्चरति वल्गु मनोज्ञो अश्रेचनको अप्रतिकूलो श्रवणाये ॥ तेन खलु पुनरानन्द् समयेन इन्द्रतपनायां राजधान्यां सोण्डामनुष्यापेया ते तेन तालपवनिर्घोषेण पंचहि कामगुणेहि समर्पिता समंगीभूता क्रीडेन्सु रमेन्सुः परिचारयेन्सुः ॥

इन्द्रतपना खलु पुनरानन्द् राजधानी सप्तहि वेदिकाजालेहि परिक्षिप्ता अभूषि चित्राहि दर्शनीयाहि सप्तानां वर्णानां सुवर्णस्य रूप्यस्य मुक्ताये वैडूर्यस्य स्फटिकस्य मुसागल्वस्य लोहितिकाये । सौवर्णस्य पादस्य रूप्यमयी सूचिका आलम्बनं अधिष्ठानकं च । रूप्यमयस्य पादकस्य मुक्तामयी सूचिका आलम्बनमधिष्ठानकं चाभूषि । मुक्तामयस्य वैडूर्यमयी सूचिका आलम्बनकमधिष्ठानकं च । वैडूर्यमयस्य स्फटिकामयी सूचिका आलंबनकमधिष्ठानकं चाभूषि । स्फटिकमयस्य पादकस्य मुसागल्वमयी सूचिका आलंबनकमधिष्ठानकमभूषि । मुसागल्वमयस्य पादकस्य लोहितिकामयी सूचिका आलंबनकमधिष्ठानकं चाभूषि । लोहितिकामयस्य पादकस्य सौवर्णिका सूचिका आलंबनकमधिष्ठानकं [336a] चाभूषि ॥ ते खलु पुनरानन्द् वेदिकाजाला द्विहि द्विहि हेमजालेहि प्रतिच्छन्ना अभून्सु । सौवर्णकस्य हेमजालस्य रूप्यमयी किङ्किणीका अभून्सु । रूप्यमयस्य हेमजालस्य सौवर्णिका किंकिणीका अभून्सुः ॥

इन्द्रतपना खलु पुनः आनन्द् राजधानी समन्तेन चीणि द्वाराणि अभूषि चि-

2. BM khalu punar ânanda(M °namda) tena samaye° B °nyâm saundamanushyâyeyâ te tenâ tâla° M °nyâm saundâmanushya peyâla tenâto kulaputra nirgho° B °shena pam° M °rppitâ sammanvamgi° B °kriḍetsu rametsuḥ ‖ M °ḍetsu rametsu paricârayetsu | . — 5. B °tapano kha° M °tapana kha ° vedikâkâlehi pârikâ abhûshi ‖ citrâṇi darçaniyâni saptâ° B °ptânâm | varṇṇâ ° kâye sau°.

7. M suvarṇṇasya vedikalpa rû° B °rṇasya vedikasyarû° M °sûcikâ âlamcanambanam a° BM °dhisthânakam ca(M °cá) rû°. — 8. M °pyamayî pâda ° âlamba° BM °dhishtâna° B °shi mu°. — 9¹. B °âlambanakam adhisthânakam ca vai° M °shthânam câbhûshi | lohitikâmayasya pâdapasya sauvarṇṇikâ sûcikâ âlambanam adhishthânakam vâbhûshi | muktâmayasya vaiḍûryyasya sphaṭhikasya sûcikâ âlambanakam adhishthânakam câbhûshi | lohitikâmayasya pâdayasya sauvarṇṇikâ sûcikâ âlambanam adhishthânakam câbhûshi | muktâmayasya vaiḍûryyasya sphaṭikasya sûcikâ âlebanakam adhisthânakam câ vai°. — 9². B °ryamaya sphâṭi° M °tikasyamayî ° banam adhisthâna° B °shthânamkam°. — 10. M sphâṭi ° dayasya musâkhalva° BM °yî musâgalvamayî sû° M °dhisthâna°.

11. M musâkhalva ° dayasya lo ° banam adhisthâna ° shi ‖ ‖ tena kha° (l. 14). — 14. BM tena kha ° dikâjâla dvihi dvihi hemajâlehi âpra° M °bhûtsu | . — 15¹. B °pyamayîm kinkinikâ° M °yî kimkini ° bhûtsuḥ | . — 15². BM rûpyâmaya° M °varṇṇakâ kimnikâ abhûtsuḥ | B °kimkani°.

17. M °punar ânanda° B °dhâni samante° M °ni samamtena tri° BM °shi | ci° M °rṇṇânâm suvarṇṇarûpyasya muktâyâ vaiḍûryyasya sphâṭi°.

चाणि दर्शनीयानि सप्तानां वर्णानां सुवर्णस्य रूप्यमयस्य मुक्ताये वैडूर्यस्य स्फटिकस्य मुसागल्वस्य लोहितिकाये ॥ तेषां खलु पुनरानन्द द्वाराणां द्विन्नां वर्णानां दृष्टका अभूषि सुवर्णस्य रूप्यस्य च ॥ तेषां खलु पुनरानन्द द्वाराणां द्विन्नां वर्णानां सोपाना अभूषि सुवर्णस्य च रूप्यस्य च ॥ तेषां खलु पुनरानन्द द्वाराणां द्विन्नां वर्णानां धरणीयो अभूषि सुवर्णस्य च रूप्यस्य च ॥ तेषां खलु पुनरानन्द द्वाराणां द्विन्नां वर्णानां तुला अभूषि सुवर्णस्य च रूप्यस्य च ॥ तेषां द्वाराणां द्विन्नां वर्णानां प्रतिमोदका अभूषि सुवर्णस्य च रूप्यस्य च ॥ तेषां द्वाराणां द्विन्नां वर्णानां प्रतिकूलं अभूषि सुवर्णस्य च रूप्यस्य च ॥ तेषां खलु पुनरानन्द द्वाराणां चतुर्णां वर्णानां फलिकफलकानि अभून्सुः सुवर्णस्य च रूप्यस्य च मुक्ताये च वैडूर्यस्य च ॥ तेषां द्वाराणां द्विन्नां वर्णानां फलकसारा अभून्सुः सुवर्णस्य च रूप्यस्य च ॥ तेषां खलु पुनरानन्द द्वाराणां द्विन्नां वर्णानां एलूका अभूषि सुवर्णस्य च रूप्यस्य च ॥ तेषां द्वाराणां पुरतो दृषीकानि मापितानि अभून्सुः त्रिपौरुषनैखन्यानि त्रिपौरुषोच्चानि द्वादशपुरुषउद्वेधेन चित्राणि दर्शनीयानि सप्तानां वर्णानां सुवर्णस्य रूप्यस्य मुक्ताये वैडूर्यस्य स्फटिकस्य मुसागल्वस्य लोहितिकाये च ॥ तानि खलु पुनरानन्द द्वाराणि द्विहि द्विहि हेमजालेहि प्रतिच्छन्ना अभून्सुः सौवर्णमयेन च रूप्यमयेन च हेमजालेन । सौवर्णस्य हेमजालस्य रूप्य-

2. M °nâm̃ bhinnâ varṇṇâ° B °nnâm̃ varṇṇâm̃ i ° shi | su° M °bhûtsuḥ ‖ su° BM °rṇṇasya rûpyasya ca te°. — 3. M °nda dvinnâ varṇṇânâm̃ sâpânânâm̃ a° B °sopânâm̃ a° BM °shi | su° M °rṇṇasya rû° BM °pyasya ca te°. — 4. BM °dvinnâ varṇṇâ° M °ṇiya a° BM °shi | su° M °pyasya B °pyasya ca te°. — 5. M °dvinnâ varṇṇâ° B °shi | su° M °rṇṇasya rû° BM °pyasya ca te°.

6. M teshâ chinnânâm̃ chinna varṇṇâ° B °nâm̃ patimo° BM °shi | su° M °pyasya dvâ° B °pyasya ca te°. — 7. M dvârâṇiṁ cchinnâ varṇṇâtâm̃ pra° BM °shi ‖ su° M °rṇṇasya rû° BM °pyasya ca te°. — 8. M °punar ânam̃da dvârâṇâm̃ chinnâ varṇṇâ° B °ṇâm̃ dvinnâm̃ varṇṇâ° BM °phalikhahalaçâri(M °çâli)tu abhûnsuḥ(M °tsu) | su° M °pyasya muktâya vai° B °ktâye vai° M °ryyasya te° B °ryasya ca te°. — 10. M °râṇâm̃ phala° B °dvivarṇṇâ° bhûnsuḥ | su° M °bhûtsu | suvarṇṇasya rû° BM °pyasya(B °sya ca) teshâm̃ dvârâṇâm̃ caturṇṇâm̃ (M °shâ dvârâṇâm̃ ca su)varṇṇânâm̃ patimodakâ abhûnsuḥ(M °tsu) | suvarṇṇasya rûpyasya muktâye vai(M °ye ca)dûrya(M °ḍûryya)sya ca te°.

11. M °ânam̃da dvârâṇam̃ cchinnâ varṇṇânâm̃ elukâ° B °lûka a° BM °shi | su° B °rṇṇarûpyasya ca te°. — 12. M °ishikâvinâ mâpi° B °bhûnsuḥ ‖ stripurushanakhanyâni stripaurusharoccâ° M °bhûtsuḥ suvarṇṇasya rûpya ca stripurushanakhanyâ pi stripurusharoddhâ dvâdaçapurupurushaudvehena ci° B °uddehena ci° M °ptânâm̃ varṇṇasya ca rû° B °pyasya ca muktâ° M °ktâyo vai° B °ṭikasya ca musâ°. — 15. BM teshâm̃ kha° M °ânam̃da dvâ° B °dvârâhi dvi° M °ṇi dvehi dvihi he ° ticchinnâ abhûtsu | sau° B °nsuḥ | sau° BM °pyamayena he° B °lena sau°.

16. M suvarṇṇahe° BM °yio kim̃kiṇi(M °ni)kâ abhûnsuḥ(M °tsu) | teshâm̃°.

मयीओ किंकिणीका अभून्सुः रूप्यमयस्य हेमजालस्य सौवर्णिका किंकिणीका अभून्सुः ॥ तेषां खलु पुनरानन्द हेमजालानां वातेरितानां वातसंघट्टितानां घोषो निश्च[336b]रति वल्गु मनोज्ञो असेचनको अप्रतिकूलः श्रवणाय ॥ तद्यथापि नाम पंचांगिकस्य तूर्यस्य कुशलेहि वादकेहि सम्यक्प्रवादितस्य घोषो निश्चरति वल्गु मनोज्ञो असेचनको अप्रतिकूलः श्रवणाय एवमेवानन्द संघट्टितानां निश्चरति वल्गु मनोज्ञो असेचनको अप्रतिकूलः श्रवणाय ॥ इन्द्रतपना खलु पुनः आनन्द राजधानी अविशून्या अभूषि इमेहि एवंरूपेहि शब्देहि सथ्यथीदं हस्तिशब्देहि अश्वशब्देहि रथशब्देहि पत्तिशब्देहि भेरीशब्देहि पणवशब्देहि शंखशब्देहि वेणुशब्देहि वीणाशब्देहि गीतशब्देहि वादितशब्देहि [गीतवादितशब्देहि] अश्नथ खादथ पिबथ देथ दानानि धर्मं चरथ श्रमणब्राह्मणेषु भद्रमस्तु वो ति शब्देहि ॥

इन्द्रतपनायां पुनरानन्द राजधान्यां वलया नाम यष्टी अभूषि चित्रा दर्शनीया सप्तानां वर्णानां सुवर्णस्य रूप्यस्य मुक्ताया वैडूर्यस्य स्फटिकस्य मुसागल्वस्य लोहितिकाया द्वादश योजनानि उद्वेधेन चत्वारि योजनानि अभिनिवेशेन ॥

इदं अवोचद्भगवानिदं वदित्वा
ह्यथापरं एतदुवाच शास्ता ।
इन्द्रध्वजो नाम अभूषि शास्ता
सुवर्णवर्णो शतपुण्यलक्षणो ॥
महानुभावो ऋषि संघनायको
विनेति सो कोटिशतानि सप्त ।

2. M °ânam̃da he ° ritânâm̃ vâtavâtasam̃ghaṭitânâm̃ gho ° pratikulo çravaṇâya ca | . — 3. M °pam̃caçishasya tûryya° BM °kehi am̃myakpravâ(M °kpracâ)di° M °manojñâ asevanako apratikulo çra° B °pratishkûlaḥ° M °ṇâya evâm evânam̃da samghaṭitânâm̃° B °ti | va° pratishkûlaḥ° M °kûlo çra° B °ṇâya i°.

6. M im̃dra° B indratapâ kha° M °punar ânam̃da râjadhâniṁ aviçunyâ° B °dhâni aviçû° shi ‖ i° M °imam̃hi lokehi evam̃ ° rathaçabdehi bhe° BM °ṇavaçabdehi çam̃(M °ça)khaçabdehi(B °hi veṇuçabdehi) vîṇâçabdehi gîtaçabdehi vâditaçabdehi gîta(M °hi aṇva(?)tha)vâditaçabdehi açva(M °hi | aṇva)tha vâdatha pibatha detha(M °pitratha datha çabdehi) dâ° M °dharma ratha çravaṇabrâ ° vo ti mastu çabdehi | .

12. M im̃drata ° ânam̃da râja° B °nyâm̃ ca vala° M °citrâṇi darçanîyâni saptâ ° ktâyâ sphaṭikasya vaiḍûryasya musâgarasya musâgarasya lo° B °vaidûrya ° çena i°. — 15. BM °vân ida vadi(M °n idaivam̃ hi)tvâ sugato jyathâ°.

17. M idradhva° BM °kshaṇo mahâ°. — 19. B °sam̃hanâ° BM °vineti | so ° saptati pu°.

परस्कृतो श्रमणगणस्य नायको
सो प्राविशे इन्द्रतपनां सुनिर्मितां ॥

इन्द्रध्वजो आनन्द तथागतो ऽर्हं सम्यक्संबुद्धो महाध्वजं तथागतमर्हन्तं सम्यक्संबुद्धं व्याकार्षीत् ॥ महाध्वजो आनन्द तथागतो ह्रं सम्यक्संबुद्धः ध्वजोत्तमं तथागतमर्हन्तं सम्यक्संबुद्धं व्याकार्षीत् ॥ ध्वजोत्तमो आनन्द तथागतो ह्रं सम्यक्संबुद्धो ध्वजरुचिरं तथागतं व्याकार्षीत् ॥ ध्वजरुचिरो आनन्द तथागतो ह्रं सम्यक्संबुद्धो ध्वजकेतुं तथागतं व्याकार्षीत् ॥ ध्वजकेतुरानन्द तथागतो केतुध्वजं तथागतं व्याकार्षीत् ॥ केतुध्वजो आनन्द तथागतो ह्रं सम्यक्संबुद्धः ध्वजध्वजं तथागतं व्याकार्षीत् ॥ ध्वजध्वज आनन्द तथागतः ध्वजमपराजितं तथागतं व्याकार्षीत् ॥ ध्वजमपराजित आनन्द तथा[337ᵃ]गतो ऽपराजितं तथागतं व्याकार्षीत् ॥ अपराजितो आनन्द तथागतो सुप्रतापं तथागतं व्याकार्षीत् ॥ सुप्रताप आनन्द तथागतः प्रदीपं तथागतं व्याकार्षीत् ॥ प्रदीपो आनन्द तथागतो सुप्रतिष्ठितं तथागतं व्याकार्षीत् ॥ सुप्रतिष्ठितो आनन्द तथागतो नागमुनिं तथागतं व्याकार्षीत् ॥ नागमुनिरानंद तथागतो महामुनिं तथागतं व्याकार्षीत् ॥ महामुनिरानंद तथागतो मुनिप्रवरं तथागतं व्याकार्षीत् ॥ मुनिप्रवर आनन्द तथागतः संवृतस्कन्धं तथागतं व्याकार्षीत् ॥ संवृतस्कंध आनन्द तथागतो बंधुमं तथागतं

1. M °çravaṇaga ° so viprama indrâtâpanaṁ sunirmitaṁ ‖ B ᵇso praviçe°. — 3. M °to 'rhan saṁmyaksaṁbuddho ° jaṁ tathâgataṁ vyâ°. — 4. M °jo ânaṁda tathâgato 'rhan saṁmyaksaṁbuddho° B °rhaṁ saṁmyaksaṁ° M °ttamas tathâgataṁ vyâ°. — 5. M °ttama ânaṁda samyaksaṁbuddho tathâgato rhaṁ dhvajaru°.

6. M °cira ânaṁda tathâgato rhan samya° B °ânando tathâgato°. — 7. M °tur ânaṁda tathâgato rhan samyaksaṁbuddho ‖ ketudhvajaṁ°. — 8. M ᵇdhvaja ânaṁda tathâgato rhan saṁmyaksaṁbuddho dhva°. — 9. B dhvajadhvajaṁ ânanda° M dhvajadhvajo ânaṁda tathâgato 'rhan samyaksaṁbuddho dhvajaṁa°. — 10. M ᵇânaṁda tathâgato rhan samyaksaṁbuddho a° B °ânada tathâgato°.

11¹. M ᵇânaṁda tathâgato rhan samyaksaṁbuddho su°. — 11². M °tâpo ânaṁda tathâgato rhan saṁmyaksaṁbuddho pradî°. — 12. M °to rhan samyaksaṁbuddho su°. — 13. M °ânaṁda tathâgato rhan saṁmyaksaṁbuddho sunipravara tathâgataṁ vyâkârshit ‖ munipravara tathâgato ânaṁda saṁvṛittaṁskaṁdhaṁ tathâgataṁ vyâkârshit | saṁvṛittaskaṁdhaṁ ânaṁdâ tathâgato rhan samyaksaṁbuddho nâgamuni tathâgataṁ vyâkârshit | nâgamunir ânaṁda tathâgato rhan samyaksaṁbuddho mahâmuniṁ tathâgataṁ vyâkârshit ‖ mahâmuni tathâgata ânaṁda samyaksaṁbuddho rha munipracara tathâgataṁ vyâkârshit | munipravara ânaṁda tathâgato rhan samyaksaṁbuddho baṁdhumataṁ tathâ° (l. 16) B °muni tathâgaṁ vyâ°. — 14². B °pravara tathâ°. — 15. B ᵇrshit | saṁvṛitaskaṁdhaṁ vyâkârshit | .

व्याकार्षीत् ॥ बन्धुमस्तथागत आनन्दारिष्टं तथागतं व्याकार्षीत् ॥ अरिष्टस्तथागत आनन्द विजिताविं तथागतं व्याकार्षीत् ॥ विजितावी तथागत आनन्द क्रकुच्छन्दं तथागतं व्याकार्षीत् ॥ क्रकुच्छन्दस्तथागतो आनन्दासमसमं तथागतं व्याकार्षीत् ॥ असमसमस्तथागत आनन्द प्रभंकरं तथागतं व्याकार्षीत् ॥ प्रभंकरस्तथागत आनन्द ओघजं तथागतं व्याकार्षीत् ॥ ओघजस्तथागतो आनन्द महाबलं तथागतं व्याकार्षीत् ॥ महाबलस्तथागत आनन्द सुजातं तथागतं व्याकार्षीत् ॥ सुजातस्तथागत आनन्द पारंगतं तथागतं व्याकार्षीत् ॥ पारंगतस्तथागत आनन्द महाप्रसादं तथागतं व्याकार्षीत् ॥ महाप्रसादस्तथागत आनन्द सुखेन्द्रियं तथागतं व्याकार्षीत् ॥ सुखेन्द्रियस्तथागत आनन्द नक्षत्रराजं तथागतं व्याकार्षीत् ॥ नक्षत्रराजस्तथागत आनन्द शतपुष्पं तथागतं व्याकार्षीत् ॥ शतपुष्पस्तथागत आनन्द विरजं तथागतं व्याकार्षीत् ॥ विरजस्तथागत आनन्द ब्रह्मस्वरं तथागतं व्याकार्षीत् ॥ ब्रह्मस्वरस्तथागत आनन्द शिरसाङ्क्यं तथागतं व्याकार्षीत् ॥

शिरसाङ्क्ये खु आनन्द तथागते पुष्पावती नाम राजधानी अभूषी द्वादश योजनानि आयामेन पुरस्तिमेन पश्चिमेन च सप्त योजनानि विस्तारेण दक्षिणोत्तरेण च सप्तहि प्राकारेहि परिक्षि[337ᵇ]प्ता सौवर्णेहि सौवर्णच्छदनेहि सप्तहि तालपङ्क्तीहि परिक्षिप्ता चित्रा दर्शनीया सप्तहि वर्णेहि पूर्ववद्यावत्सुवर्णस्य तालस्कन्धस्य रूप्यमया पत्रा फला च ॥ तेषां खलु पुनरानन्द तालस्कन्धानां वातेरितानां वातसंघट्टितानां वल्गु मनोज्ञः घोषो निश्चरति ॥ ये पुनरानन्द

1¹. M °ndhumano ânaṁda tathâgato rhan samyaksaṁbuddho arishṭaṁ°. — 1². M arishṭa tathâgata ânaṁda vijitâvi tathâgataṁ°. — 2. M °ânaṁda krakucchaṁda tathâgataṁ° B °cchanda tathâgataṁ°. — 3. M °kucchaṁda tathâgata ânaṁda samaṁ samaṁ° BM °gatagaṁ vyâ°. — 4¹. M °s tathâgataṁ ânaṁda pra°. — 4². M °bhaṁkaraṁ ânaṁda o° B °bhaṁkara tathâgata ânanda oghañjanaṁ tathâgataṁ°. — 5. B ojaṁjanas ta° M oghato tathâgata ânaṁda mahâ° B °laṁ vyâ°.

6. M °bala tathâgata ganaṁda su ° gata vyâ°. — 7¹. M °jâto tathâgato ânaṁda pâ° B °jâtaṁ tathâgata°. — 7². M pâraṁ tathâgato ânaṁda mahâpradyotaṁ tathâgataṁ° B °hâpramâdaṁ°. — 8. B °pramâda° M °pradyotaṁ tathâgata ânaṁda su° BM °gata vyâ°. — 9. M suravendri ° ânaṁda nakshatrarâja tathâgataṁ°. — 10¹. M °ânaṁda ça° — 10². M °shpa tathâgata ânaṁda vi°.

11. B virajaṁ tathâgataṁ â° M °ânaṁda bra° B °hmaçvaraṁ°. — 13. M °hvayas tathâgato ânaṁda pu ° bhûshi ‖ dvâ° BM °ça jojanâni â° M °stimeta paçci ° stâreṇa ca saptahi prâkârehi parikshiptâhi suvarṇṇe° B °kshiṇotta° BM °cchadanehi saptahi tâla-(M °his târa)paktihi pari° B °ptâni ci° M °citrâṇi darçaṇiyâni saptavarṇṇehi pûrvaṁvad yâ ° laskaṁdhasya rû ° trâ ca pha°.

17. M °laskaṁdhâ ° nojña gho°. — 18. M ânaṁda pushpâ° B °shpâtyaṁ° M °tyaṁ

6. M °ti ‖ su (*l.* 11). — 7. M *omet les lignes 7 et 8.* B pratyotasya bu°. — 9. *Dans* M *les lignes 9 et 10 sont transposées entre nos lignes 14 et 15.* M °ticaraṁ ca°. — 10. B °pûjanâṁ kâ° M °pûja kâhiṁti te°.

11. M °netralokapradyoto adṛishṭvâ satka° B °dyoto dṛishṭvâ sa satka°. — 13. M °kusumau nâmau° B °nâmo lo°. — 14. M °rishyaṁti te°. — 15. B °çreshṭho saṁ°.

16. M °rishyaṁti te°. — 17. M pushpaṁ câ tatra saṁ° B pushpaṁ câgrasaṁ° M °dotamaṁ ‖ . — 18. M kâhiṁti pa°. — 19. M °nareṁdrâ° B °ndrânâṁ ye° BM °ye sahasraṁ satka°. — 20. M °kalpesmiṁ°.

21. BM °tkâra(B °ro) jihvâvi°. — 22. B bahvecchâ te çru° M bahvacchâ tena çruṇitvâ te°.

ये च संगणिकारामा गणवासे प्रतिष्ठिता ।
विवेकं श्रुत्वा बुद्धेन तेषां च सौमनस्यता ॥
ये च दुःशील श्रुत्वान एवं बुद्धेन भाषितं ।
नता लोकप्रदीपस्मिं तीव्रं काहिन्ति गौरवं ॥
ये ते व्याकृता बुद्धेन बोधिसत्वा अनागता ।
सूरता सुखसंवासा तेषां तुष्टिर्भविष्यति ॥
येषां विवर्तना नास्ति बुद्धज्ञानातो सर्वशः ।
ते इदं सूत्रं श्रुत्वान भविष्यन्ति सुखिता नराः ॥
ये हि पुरिमबुद्ध सत्वसारा
गुरुकृता सत्कृता पूजिता नरेन्द्रा ।
प्रणतमना शिष्ट बुद्धज्ञाने
नरवरवर्ण श्रुणित्व तुष्ट भोन्ति ॥
येषामविकला समन्त श्रद्धा
वरगुणकोटिशतेहि ये उपेता ।
ये च धारयि धर्म लुज्जमानं
मुदितमना सुगतस्य शासनस्मिं ॥
ये च अचपला अनुद्धता च
अमुखरा अभू अकीर्णवाचा ।
सुसखिलवाचा न मानुपेता
जिनवरवर्ण श्रुणित्व तुष्ट भोन्ति ॥
येषामपरित्यक्तं बुद्धज्ञानं

1. BM °gaṇaṁ vàsa pra°. — 2. M viveka çru° B °shàṁ sau° BM °syatàṁ | . — 3. M eva duḥ° B evaṁ duḥ°. — 4. BM na te lo° M °kàhiṁti. — 5. M °kṛita bu ° gatàḥ | .

6. BM suratà° M °saṁvàso te°. — 7. M eshàṁ° B °vivarṇṇatà nàsti° M °jñànasasargate | B °rvagate | . — 8. B idaṁ° M imaṁ sutraṁ ca çru ° vishyaṁti sukhà naràḥ | . — 9. BM °buddheshu satva° M °sàragu° BM °kṛità | satkṛitya pû ° drà pra°.

11. M °ṇatàtmanà viçi° B °nà viçi ° jñànena naravaravarṇṇa° M °jñànena varṇaṁ çru ° tushṭo bhoṁti | B °tushṭha bhonti | . — 13. B yeshàṁm a° M yeshàṁ avikrarà satva çra° B °là satva çra° M °petà ya ‖ . — 15. BM ye ca dharayi dharmaṁ lujja-(M °jya)mànaṁ(B °ṇaṁ) mu° M °sanesmiṁ.

17. M °ddhanà ca amu° B °khalà abhû | anuki° M °bhût ‖ anuki° BM °vàcà su°. — 19. B sumukhiṁlavacanàmanenupeto jivaravarṇṇaṇitvà tu° M sukhikhacanà anupetà jinavarṇana çru ° tushṭo bhoṁti | .

21. M yeshàṁm api pari ° jñàna çirivajà ca anaṁtatulyo bodhi ye° B °jñàna riva(?)jà ca a ° dhi ye°.

एवं विरजा अनन्ततुल्यबोधि ।
ये च व्रतं चरन्ति अप्रमत्त
जिनवरज्ञान श्रुणित्वा तुष्ट भोन्ति ॥

अथ खलु भगवां सप्ताहस्यात्ययेन सिंहासनातो उत्थाय बोधिद्रुमं नागविलोकितेन विलोकयन्तो अनिमिषाये दृष्टीये प्रीतिसुखेन द्वितीयं सप्ताहं अनाहारो अस्थासि बोधिद्रुमं अनिमिषाये दृष्टीये निरीक्षन्तो इह मम बोधिद्रुमे अनवराग्रस्य जातिजरामरण[352ᵃ]संसारगहनकान्तारस्य पर्यन्तं कृतं इह मम क्लेशमारो भग्नो मृत्युमारो भग्नो स्कन्धमारो भग्नो देवपुत्रमारो भग्नो इह ममापरिमितमसंख्येयप्रणिहिता प्रणिधि समृद्धा इहाहं बोधिद्रुमे लोके अग्रतां प्राप्तः लोके श्रेष्ठतां प्राप्तो सत्वसारतां प्राप्तः ॥

भगवां सप्ताहं प्रीतिसुखेन बोधिद्रुमं अनिमिषाये दृष्टीये निध्यायित्वा तृतीयं सप्ताहं प्रीतिसुखेन दीर्घं चंक्रमं चंक्रमे ॥ तेन खलु पुनः समयेन मारो पापीमां भगवतो अविदूरे संनिषण्णो अभूषि दुःखी दुर्मनो विप्रतिसारी काण्डेन भूमिं विलिखन्तो अमणो मे गौतमो विषयातो उपातिवृत्तो अमणो मे गौतमो विषयातो उपातिवृत्तो ति ॥ अथ खलु तन्त्री च मारधीता अरती च मारधीता येन मारो पापीमांस्तेनोपसंक्रमित्वा मारं पापीमं गाथाये अध्यभाषति ॥

कामं त्वं दुर्मनो तात पुरुषं आनयाम्यहं ।
रागपाशेहि बंधित्वा अरण्यादिव कुंजरं ।
प्रबन्धित्वान आनेमि वशिको ते भविष्यति ॥

2. BM °taṁ carati(B °ti |) a° M °çrutvà tushṭo bhàṁti ‖ . — 4. M °siṁhàsanàno utthà° M °kayaṁto° B °yanto aminishà° BM °pritisukhaṁ dvi° M °sthàsi ‖ bo ° shàye nirikshyato iya ma° BM °saṁsàragrahaṇakàn(M °kàṁ)tà° M °ryaṁtaṁ° BM °kṛitaṁ | iha° B °çamàro bhagnà mṛi° M °çamàro bhagno devaputramàro bhagno ‖ iha mama asaṁkhye ° gratàṁ prapto lokaṁ çre° B °çreshṭatàṁ pràpto° M °sàratàṁ pràptàṁ ‖ .

11. M bhagavàn saptà ° shàya dṛi°. — 12. M °kha punaḥ ° to abhidûraṁ saṁnishasyo abhû° B °shi | duḥkhaṁ durma° M °rmanà vipra ° ri kaṇṭhena bhû ° BM °likhanto çramaṇà me gautta(M °khaṁto çravaṇo gauta)mo vi ° çramaṇo me(M °çravaṇo) gauttamo° M °upàttavṛitteti ‖ . — 15. M atha taṁci ca màradhitaro aparati° B °trî ca màradhità aparati° M °tvà màro pàpimàṁ gàthà adhya° B °raṁ pàpimàṁ gà°.

17. M kàma tvaṁ° B kâma tva du° B °tàta yadi purusho ânayâmanaṁ | M purusho àna°. — 18. M gàvapà° B °kuñjalaṁ pra°. — 19. M prabaṁdhitvâna ânema vasiko° B °âneme vaçikto bha°.

अथ खलु मारो पापीमां धीतरो गाथाये प्रत्यभाषति ॥

अरहां सुगतो लोके न रागेण सुवानयो ।
विषयो मे अतिक्रान्तो तस्माच्छोचाम्यहं भृशं ॥

अथ खलु ता मारधीतरो पितुर्मारस्य वचनं अकरित्वा येन भगवांस्तेनोपसंक्रमित्वा भगवन्तं चंक्रमन्तमनुचंक्रमेन्सुः । पादान्ते भगवन्परिचरेम्ह पादान्ते सुगत परिचरेम्ह ॥ भगवां तां न चित्तीकारये यथापीदं अनुत्तरे उपधिसंचये सम्यक्सुविमुक्तचित्तो ॥ अथ ता मारधीतरो एकान्तमुपसंक्रम्य मन्त्रा मन्त्रयेन्सुः उच्चावचं पुरुषाणां छन्दो उच्चावचं पुरुषाणां छन्दः यं नूनं वयं सय्यथापि नाम पंचदश्यवर्षदेशिका वा षोडशवर्षदेशिका वा एवंरूपा एवंरूपाणां एकशतं एकशतं ऋद्धा अभिनिर्मिणित्वा येन श्रमणो गौतमस्तेनोपसंक्रमित्वा श्रमणं गौतमं चंक्रमन्तमनुचंक्रमेन्सुः । पादान्ते भगवं परिचरेम्ह पादां ते सुगत परिचरेम्ह । न च सानं गमत्रां चित्तीकारये यथापीदं अनुत्तरे उपधिसंचये सम्यक्सुविमुक्तचित्तो ॥ अथ खलु ता मारधीतरो एकमन्तमुपसंक्रम्य मन्त्रा मन्त्रयेन्सुः उच्चावचं पुरुषाणां छन्दो उच्चावचं पुरु[352b]षाणां छंदो यं नूनं वयं सय्यथापि नाम एकप्रसूता वा द्विप्रसूता वा एवंरूपा एवंरूपाणां एकशतं एकशतं निर्मिणित्वा येन श्रमणो गौतमस्तेनोपसंक्रमित्वा श्रमणं गौतमं चंक्रमन्तमनुचंक्रमेन्सुः । पादान्ते भगवन्परिचरेम्ह । न च सानं भगवां चित्तीकारये यथापीदं अनुत्तरे उपधिसंचये सम्यक्सुविमुक्तचित्तो ॥ अथ खलु ता मारधीतरो एकान्तमुपसंक्रम्य मन्त्रा मन्त्रयेन्सुः उच्चावचं पुरुषाणां छन्दो उच्चावचं पुरुषाणां छन्दो यं नूनं वयं सय्यथापि नाम मध्यस्त्रियायो एवंरूपा एवंरूपाणां एकशतं एकशतं ऋद्धा अभिनिर्मिणित्वा येन भगवान्स्तेनोपसंक्रमित्वा भगवन्तं चंक्रमन्तमनुचंक्रमेन्सुः । पादान्ते भगवन्परिचरेम्ह पादान्ते सुगत परिचरेम्ह । न च सानं भगवां चित्तीकारये सय्यथापीदं अनुत्तरे उपधिसंचये सम्यक्सुविमुक्तचित्तो ॥ अथ खलु ता मारधीतरो एकान्तमुपसंक्रम्य मन्त्रा मन्त्रयेन्सुः अहो परमवयोवर्णनिभं अभिनिर्मिणन्ती अभिनिर्मिणेयं । यं नूनं वयं जीर्णा भवित्वा वृद्धिका भवित्वा स्थविरिका भवित्वा पलितिका भवित्वा कुब्जगोपानसीवंका दण्डमवलंब्य येन श्रमणो गौतमस्तेनोपसंक्रमित्वा श्रमणस्य गौतमस्य पादौ शिरसा वन्दित्वा श्रमणं गौतमं प्रत्येका प्रश्नं पृच्छेम ॥ अथ खलु ता मारधीतरो जीर्णिका वृद्धिका स्थविरिका पलितिका कुब्जगोपानसीवंका भवित्वा दण्डमवष्टभ्य येन भगवांस्तेनोपसंक्रमित्वा भगवतः पादौ शिरसा वन्दित्वा एकान्ते अस्थान्सुः ॥ एकान्ते स्थिता तन्वी मारधीता भगवन्तं गाथाये अध्यभाषति ॥

कथंविहारी बङ्गलीह भिक्षु
पंचोघतीर्णो तरतीह षष्टं ।

2. M °gena sa ânaye° B °ṇa sa âneyo vi°. — 3. M °tikrâmto ta° B °nto | ta ° câmahaṁ°. — 4. M °lu tâṁ mâra° B °tân mâra° M °yena bhagavânsteno° BM °tvâ bhagavataccaṁ(M °taḥ caṁ)krama(B °maṁ)taṁ caṁkrametsuḥ | . — 5. M pâdâṁ te bhagavan paricaramha yâda pâdaṁ ne su° B °n parivaramha pâha pâdan te su° M °riharaca bha° B °haṁ bha°.

6. M bhavan tâṁ na citrikâreye ya° B °vân sânaṁ citrikâleye ya° BM °thâdipaṁ anu° M °kshayaṁ sa° B °kshaye saṁmyaksaṁvi°. — 7. BM atha tâṁ mâradhi° M °ro ekâṁtam upasaṁkramâ maṁtrâ maṁtrayetuḥ uccâvacca purusho cchaṁde uccâvanaṁ purushâṇâṁ cchaṁdo yaṁ nû° B °ntrayetsuḥ uccâvaca purusho cchande uccâvaca pu ° ndaḥ ayaṁ nû° M °yaṁ ‖ sayyathîdaṁ nâ° BM °pañcadaçavarshaṁ deçikâ vâ sho° B °varsho de° M °nâṁ ekaçatam ekaçataṁ ridhyâ abhinirmitvâ yena çravaṇo gautamo teno° B °çataṁ ridhyâ abhi ° ṇo gauttamas te° M °mitvâ çravaṇaṁ gau° B °ṇaṁ gauttamaṁ° M °kramaṁtam anucaṁkrameyaṁ B °ntam aṇucaṁkrameye | .

11¹. M pâdâṁ te bhagavan paricarembhe ‖ B °vaṁ paricarehma pâdâṁ ° rehe na°. — 11². M °gavân citrikareyaṁ | ya° B °vâṁ citrikaraye | ya° BM °ttaraṁ u° M °padhisaṁ ° ksuvipukravicaḥ ‖ . — 12. M °lu tâṁ mâradhi° B °lu tân mâradhi° M °kamaṁtam u ° mya maṁtro maṁtraṁyetsuḥ ‖ uccâvacca purushâṇâṁ cchaṁdo yaṁ nûnâhaṁ cayaṁ sayya° B °ntrayetsuḥ uccâvacaṁ puruṇâṁ cchando | uccâvaca pu ° nûnaṁ cayaṁ sayya° M °nâma ekaprasatâ vâ dviprasutâ vâ evaṁ ° rûpâṇâṁ ekaçatam ekaçatâbhiḥ nirmi ° yena çravaṇaṁ gautamas temopa° B °ṇâṁ ekaḥ çataṁ ekaḥ çataṁ sa nirmi ° ṇo gauttamos teno° M °tvâ çravaṇa gautamaṁ caṁkramaṁtam anu° BM °metsuḥ | .

13. B °lu tân mâradhi° M °lu tâṁ mâradhi ° litikâ ca kubjagopâṇasicaṁkâ bhavitvâ daṁḍam avashṭhabhya ° gavâns teno ° sâ vaṁditvâ ekâṁte asthâtsuḥ | . — 15. M ekâṁte sthitâ tatri kumâra° B °ntri kumâra° M °gavaṁtaṁ gâthâya a°.

17. B °hulihi bhi° M °lihi bhikshuḥ paṁ ° tirṇâ ta°.

कथंध्यायी बङ्गली कामसंज्ञा
परिबाहितो भवति अलब्धगाढा ॥

अथ खलु भगवां तन्तीं मारधीतरां गाथाये प्रत्यभाषति ॥

अज्ञाय धर्मं अवितर्कध्यायी
नो रज्यते नो सरतीह थीनं ।
एवंविहारी बङ्गलीह भिचु
पंचोघतीर्णो तरतीह षष्टं ॥
प्रश्रब्धकायो सुविमुक्तचित्तो
स्मृतिमानकोथ्यो अपनीतमानो ।
एवंध्यायी बङ्गली कामसंज्ञा
परिबाहितो भवति अलब्धगाढा ॥

अथ खलु अरती मारधीता भगवन्तं गाथाये अध्यभाषति ॥

[353ᵃ] सोकाभितुन्नो व वनस्मिं ध्यायसि
चिताय जीवं अभिप्रार्थयन्तो ।
आसाद्य ग्राम्या न करोषि साख्यं
कस्माज्जने न करोषि साख्यं ॥

अथ खलु भगवां अरतीं मारधीतारं गाथाये अध्यभाषे ॥

शोकस्य मूलं परिखन्य सर्वं
सर्वं प्रहाय भवलोभमाप्स्ये ।

1. B °hulâñ kâ° M °li kâyasañ° B °paribâhiro bha° M °parivâro bhavañti a° BM °gâḍhañ ‖ . — 3. B °vâñ mantrin mâra° M °vâñ tañtri mâ ° taraṁ gâthâya pra°. — 4. BM anyâya dharmañ avita(M °tarkañ)kâyañ dhyâyino râjyatino saratina thinañ(M °tima thiraṁ) | .

6. M °liha vihâriha bhikshuḥ pañcâhati° B °cohati°. — 8. M °pyo aparetvamâno ‖ B °pyo apureptkamâno | . — 10. BM °hulâṁ kâ ° ribâhiro bha° B °gâho ‖ M °gâḍhe ‖ .

12. B °lu alati° M °gavañtañ gâ° B °ti so°. — 13. M çokâbhitunno vacana° B sokâhituṇḍo vacana ° cittâ ca ... jîvañ abhi° M °cittâva jîvañ ca abhiprârthayamto. — 15. BM °grâmyâ(B °mya) na karomi saṁkhyâṁ kasmâ ° romi saṁkhyâṁ ‖ .

17. B °lu arati mâradhîtâ bhagavantañ gâ° M °dhîtarâṁ gâ ° bhâshati ‖ . — 18. BM °mûlañ pali(M °mûlâ pari)khaniyâṁ na sarve(M °rveṇa) sarvâñ pra ° lobhajalpañ(M °lpaṁ ‖) a°.

अर्थस्य प्राप्तिं हृदयस्य शान्तिं
ध्यानानुयुक्तो सुखसारबुद्धिः ।
तस्माज्जने न करोमि साख्यं
साख्यं न संविद्यते तेन अस्मे ॥

अथ खलु अरती मारदेवी भगवन्तं गाथाये अध्यभाषे ॥

आच्छेत्व तृष्णां गुणसंप्रचारी
बहुच रक्ता करिष्यन्ति च्छन्दं ।
बङ्गं वतायं जनतां सुवेध
आच्छेत्व . . . . . मृत्युराज्ञो
नयिष्यति अच्युतपदमशोकं ॥

अथ खलु भगवां तां मारधीतरो गाथाये प्रत्यभाषति ॥

गिरिं नखेहि खनथ अयो दन्तेहि खादथ ।
पर्वतं शिरसा हनथ अगाढे गाढमेषथ ।
किमु अन्वेथ पापीयो अपि बुद्धासूया सदा ॥

अथ खलु ता मारधीतरो जानाति मां अमणो गौतमो ति दुःखी दुर्मना विप्रतिसारी येन पिता मारस्तेनोपसंक्रमित्वा पितरं मारं गाथाये अध्यभाषे ॥

अद्य मे वधं पि तात न रागेण स आनिये ।
विषयं मे अतिक्रान्तः तस्माच्छोचाम्यहं भृशं ॥

अन्यो व तात पुरुषो अवीतसंगो अस्माकं तेन रूपेण समन्वागतानां पश्चित्व

1. B °rthasyâprâ° M °yasya sâṁti dhyânâni yu° B °sukhamânabuddhiḥ | . — 3. M tasmâ jananañ karomi saṁkhyâṁ na saṁvidyate kena vismayañ ‖ B °jjane na karomi saṁkhyâ saṁkhyâ na saṁvidyate kena visma ‖ . — 5. M °ti yevi bhagavañtañ gâ°

6. B acche° M gacchetva° BM °shṇâñ gaṇa° B °pravâriṇi ba° M °câraṇi ba ° rishyañ-ti cchañdaṁ ‖ . — 8. BM mahavṛito(M °hagritâṁ) janatâñ suvedha acche(M °akshe)tva mṛityurâjasya bheshyati acyutapada(M °dam a)çokañ ‖ .

11. BM °vâñ tân mâra°. — 12. B giriṁ nakhalehi khanatha a° M °riṁ nakhalvehi khanatha amodaṁ te khândatha B °nte khâdatha pa°. — 13. M °haratha ‖ agâhe gâṁ eshatha B °hanatha | agâhe gâham eshatha | . — 14. M kimnum anvatha° B kimunvatha° M °piyi a° BM °ddhâsuyâ°. — 15. BM °lu tâṁ mâradhi° M °çravaṇo gotamo° B °gauttamo° M °pratimâri°.

17. B °pi tâto na râgeṇe sa ânaye vi°. M °pi tâto nabhageṇa sa âraye vi°. — 18. M °yañ se atikrâmto ta°. — 19. BM anyañ ca tâta(M °tâtañ) puru ° saṁgo ‖ asmâ° B °rûpe-

सो जितं मूर्छित्वा प्रपतिष्यद्वा उष्णं वास्य शोणितं मुखतो आगच्छे तेनैव च आबाधेन कालं अकरिष्यत् चित्तक्षयं वा प्रापुणे अमणो पुनर् तात गौतमो अरहो विगतरागो विगतदोषो विगतमोहो अभिभूय भूतो ॥

अथ मारो पापीमां येन भगवांस्तेनोपसंक्रमित्वा एकान्ते अस्थासि । एकान्तस्थितो मारो पापीमां भगवन्तं गाथाये अध्यभाषे ॥

इहागता हर्षयन्ती तन्वी च अरती रती ।
ता प्रणुदे महावीरो तूलं भ्रान्तं व मारुतं ॥

इत्यमुक्त्वा च मारो पापीमां दुःखी दुर्मना विप्रतिसारी तत्रैवान्तरहाये ॥

यदा भगवां प्रवृत्तप्रवरधर्मचक्रो भिक्षू भगवन्तमाहन्सुः ॥ कथं भगवं मारधीतरो भगवन्तमुपसंक्रान्ता अवतारार्थी अवतारं गवेषी अलभंता च अवतारं निर्विद्य प्रत्यवक्रान्ता ॥ भ[353b]गवानाह ॥ न भिक्षवः एतरहिमेव एता मारधीतरो मम उपसंक्रान्ता अवतारार्थी अवतारं गवेषी अलभंता च अवतारं निर्विद्य प्रत्यवक्रान्ता । अन्यदापि एते उपसंक्रान्ता मम अवतारार्थी अवतारं गवेषी अलभंता च अवतारं निर्विद्य प्रत्यवक्रान्ता ॥ भिक्षू आहन्सुः ॥ अन्यदापि भगवन् ॥ भगवानाह ॥ अन्यदापि भिक्षवो ॥

भूतपूर्वं भिक्षवः अतीतमध्वानं नगरे वाराणसी काशिजनपदे धर्मलब्धो नाम वाणिजो अभूषि ॥ स समुद्रजातिको सार्थवाहो महासमुद्रमवतरति सिद्धयानपाचो च आगच्छति ॥ तस्य ततो वाराणसीतो पंचमात्रा वाणिजशता उपसं-

na sa° M °çyishya so jitaṁ murcchi° B °çyisya so jidaṁ mû° BM °patishyaṁ vâ u° M °shṇaṁ vâ svaçoṇita mu° BM °karishyaṁ citta(M °cita)kshayaṁ(B °kshapaṁ) vâ° M °prâpuṇa çravaṇo punas tâta gau° B °bhibhûya abhibhûto ‖ .

4¹. M °gavâṁ teno ° ekâṁte a°. — 4². M ekâṁtasthi° B °mâra pâpi° M °gavaṁtaṁ gâ°.

6. M °gato harshayaṁti taṁtri ca a° B °arati rati ca°. — 7. B ca puṇu ° vira tulâṁ bhrântasvamâ° M ca pramude ca mahâcîra mulâṁ bhrâṁtasvamârutam i°. — 8. B itthaṁ catvâra mâro° M itthaṁ catvâra mâro° B °ri tantraivâ° M °ri tadaivâṁtarahâya ‖ . — 9¹. M athâ bhagavâṁ ° rmacakraḥ ‖ bhikshur bhagavaṁtam âhatsuḥ ‖ B °bhikshu bha°. — 9². M kathaṁ bhagavan mâradhi ° gavaṁtam upasaṁkrâṁto avatârârthi avatâraṁ gaveshi alabhaṁtâ ca târam ni° B °saṁkrânto | ava° M °tyavakrâṁto ‖ .

11². B °vaḥ etararhiṁm eva etân mâradhi° M °vaḥ etarhi esha me tâṁ mâradhitaro bhagavaṁtam upasaṁkrâṁtâ avatârârthi a ° veshi alabhaṁtâ ca târaṁ ni° B °saṁkrântâ | avatârâ ° tyakrântâ | M °tyakrâṁtâ ‖ . — 13. M °pi upasaṁkrâṁtâ mamâvastârârthi ° veshi nirvi ° vakrâṁtâ ‖ . — 14¹. B bhikshu â° M bhikshu âhatsuḥ. — 14². M °van bhaga°. — 15². M °dâ bhi° BM °vo bhû°.

16. M °kâçija° BM °nâma vaṇi° M °bhûshiḥ. — 17. M samudrajâ° B °rati | si° BM °cchati ta°. — 18. M °nasito paṁ ° saṁkrâṁtâ vayaṁ api ° shyâma ‖ .

क्रान्ता वयं पि त्वयैव सार्धं महासमुद्रमवतरिष्यामः ॥ धर्मलब्धो आह ॥ न यूयं शक्तास्तेन मार्गेण गन्तुं येनाहं गच्छामि ॥ अहं राक्षसीद्वीपस्य मध्येन गच्छामि । तायो च राक्षसीयो वाणिजानि उपायशतेहि लोभेन्ति । तत्र बहूनि वाणिजशतानि राक्षसीहि लोभिता अनयव्यसनमापद्यन्ति । न शक्यं युष्माभिः मया समानं गन्तुं ॥ सो दानि धर्मलब्धो सार्थवाहो तेषां पंचानां वाणिजशतानां न करोत्यवकाशं । मा तत्र राक्षसीहि लोभिता अनयव्यसनमापद्यथ ॥ ते दानि पंच वाणिजशतानि संनिपतित्वा आहन्सुः ॥ अयं धर्मलब्धो वाणिजको शोभनेन मार्गेण महासमुद्रं गच्छति क्षेमेन गच्छति क्षेमेनागच्छति लघुं चागच्छति सिद्धपाचो च आगच्छति । अस्माकं च न किंचिद्वकाशं करोति गमनाय । भवन्तो यादृशको एषो धर्मलब्धो वाणिजको पुण्यवन्तो पुण्यं संगृह्णाति तादृशकं यूयं पि संगृह्णथ यं वेलं एष इतो वाराणसीतो प्रतिष्ठति तं वेलं वयं पि प्रस्थास्यामः ॥ तेहि सर्वैहि यादृशं धर्मलब्धो पुण्यं संगृह्णाति तादृशं तेहि पि पंचहि वाणिजशतेहि पुण्यं संगृहीतं यत्र काले च धर्मलब्धो वाणिजको समुद्रं प्रस्थितो तत्र काले ते पि पंच वाणिजशता संप्रस्थिता धर्मलब्धेन सार्थवाहेन सार्धं गच्छन्ति ॥ यं कालं तत्र देशं प्राप्ता यत्र तायो रात्र[354a]सीयो ततो धर्मलब्धेन सार्थवाहेन सर्वे ते पंच वाणिजशता शब्दावियान बुध्यन्ति ॥ भवन्तो इमे सर्वे पंच वाणिजकशता मया सार्धं वाराणसीतो संप्रस्थिता इमं च तं राक्षसीभवनं अस्माभिरनुप्रापुणितव्यं । तायो च युष्माकं राक्षसीयो बहुप्रकारं प्रलोभयिष्यन्ति अन्या रूपेहि प्रलोभयि-

1². M °çaktâḥ tema mârgena gaṁtuṁ ye° B °ntuṁ | ye°. — 3¹. M °nijâti u ° lobhaṁ ti ‖ . — 3². B °bahuni vâṇijaçatani ° sihi paṁca vaṇijahi lo° M °sihi lohitâ° BM °tâ siddhayânapâtrâ(B °tro) ca â(M °câ)gacchati bhitâ ana(M °naya)vya° M °dyaṁti na° B °nti na ça°. — 4. M °naṁ gaṁtuṁ ‖ . — 5. M so dâni dha° B °çatâni ca karo°.

6¹. M °kshasihi° B °lohitâ° M °atayavya° B °m âdyatha ‖ . — 6². M tadâ paṁ° hatsuḥ ‖ .

7. B °siddhayâtro° M °siddhayânapâtrâto â°. — 9¹. M °d avatâraṁ ka° BM °nâya bha°. — 9². B bhagavanto | yâ° M bhavaṁto yâ ° ṇyavaṁto pu° BM °ṇyaṁ sâṁgṛihnâti (M °ti ‖) tâdṛiçaṁ(B °çakaṁ) yûyaṁ pi saṁgṛihnatha° M °esho i° BM °sito pratyasthâsi taṁ ° sthâpayishyaṁ(M °shyaṁ |) te°.

11. M °labdhaṁ pu° BM °saṁgṛihnâti | (B °hnânti) tâ° M °çaṁ tehi puṇyaṁ saṁgṛihnaṁti tâdṛiçaṁ tehi pi paṁcahi vâṇijaçatehi pu° B °çaṁ tehiṁ pi paṁ° BM °yatra kâlaṁ ca dharma° M °draṁ prasthitaḥ | tatra kâlaṁ tehi paṁcahi vâṇijaçatâni saṁprasthitâni ‖ dha° B °tatra kâlaṁ tehi paṁcahi vâṇi° M °gacchaṁti ‖ B °nti yaṁ°. — 14. B °siyo | tato° M °siyo tataḥ dha ° buddhyaṁti ‖ B °nti bha°.

16. M bhavaṁto ime ° sitâṁ saṁprasthitâ ‖ imaṁ° B °smâbhiç ca anu° M °puṇetavyaṁ tâ°. — 18. B °raṁ pralobhayishyanti | anyâ rû° M °raṁ pralobhayishyaṁti ‖ anyo rûpâhi

ष्यन्ति अन्या शब्देहि अन्या गन्धेहि अन्या रसेहि अन्या स्पर्शेहि तत्र मार्गे विविधानि नानाप्रकाराणि कामकल्याणानि अभिनिर्मिणिष्यन्ति आपणं च मार्गेषु प्रसारितं अभिनिर्मिणिष्यन्ति। यत्र तु सो कोचित्कामकल्याणं तत्र न पश्चिष्यथ। तत्र युष्माभिर्न केनचिल्लोभं कर्तव्यं न केनचित्किंचिद्गृहीतव्यं न केनचित्किंचित्प्राग्नितव्यं। वृक्षसहस्राणि नानाप्रकाराणि पुष्पफलोपेतानि अभिनिर्मिणिष्यन्ति मद्नपुष्पेहि च मद्नफलेहि च भरितानि मूलतो उपादाय यावत्पुष्पं पत्रफलभारभरितानि पुष्पं वा फलं वा न आनयितव्यं। पुष्किरिणीयो च नानाप्रकाराणि अच्छानि शुभानि शीतलजलानि सुवर्णवालिकासंस्तृतानि उत्पलपद्मकुमुदपुण्डरीकसौगन्धिकसंछन्नानि सुखोपतीर्थानि अभिनिर्मिणिष्यन्ति। तत्र भवन्तेहि न केनचिद्क्षीपितव्यं न च ततो केनचित्पुष्किरिणीहि उदकं वा पद्मं वा उत्पलं वा पुण्डरीकं वा बिसमृणालं वा स्वादयितव्यं॥ अन्यानि च नानाप्रकाराणि रत्नरतनानि अभिनिर्मिणिष्यन्ति। तत्र च युष्माभिर्न केनचित्कहिंचिल्लोभो उत्पादयितव्यः। यो युष्माकं तत्र लोभमुत्पादयिष्यति सो न भूयो जंबुद्वीपं गमिष्यति। तत्रैव अनयातो व्यसनमापद्यिष्यति। यो च ततो राक्षसीभवनातो सर्वतो निरपेक्षो अभिनिष्क्रमिष्यति सो सिद्धपात्रो स्वस्तिना पुनः आगतो स्वदेशं गमिष्यति॥

पुण्यं समुदानेत्वान जम्बुद्वीपातो वाणिजा।
महासमुद्रं प्रक्षिहेन्सुः यं धनरतनाकरं॥

pralobhayishyamti || anyâ çabdehi anyâ gamdhehi || anyâ rase° B °yishyanti | anyâ ça° M °ni kâmakalânâni abhinirminishyamti || â° B °nâni abhinirminishyanti â° M °nishyamti |.

3. B yatra na so ko° M yatra na so kvacit kâmakalânâm ta° B °lyânâyam ta°. — 4. BM °kenacid gri° M °hitavyam na kenaci prâçi° B °kimcin prâçi°. — 5. M °kârâni âyushpa ° nishyamti || yatra madanapushpe° B °shyanti | madanapushpe° M °tâni mulâto upâdâya yâvatpatrampushpam phala° B °pushpam patram phala°.

7. M °niye ca° BM °râni âgacchati çu° M °çitalâni ca suvarnavâlukâsamstrinâni utpalapadmaku ° saugamdhikasam ° nishyamti || . — 9. M °ca tatah kenacit pushkari° BM °biçamrinâlâm vâ sodâyitavyâ || .

11. M °tanâni ca abhi°. — 12. B tatra vah yushmâbhir na ke° M tatra vo yushmâbhih na kenacit karhicillobhe utpâdayishyati | so na° (*l.* 13) B °himcillâbho u ° vyah yo°. — 13¹. B °lobha utpâdayishyati | so° BM °dvipe ga° M °mishyamti || . — 13². M tatraivânapâto° B °traiva napâto ° padyekshyanti | M °shyati | . — 14. M °bhavanânâm sarva° B °sarveto° M °peksha abhi° B °peksho abhikramishyati | so siddhayâtro° M °ddhayânapâtro ° punah svade°.

16. BM °netvâ ja° M °pâno vâ° BM °jâ ma°. — 17. BM °dram prârthayetsuh (M °tsuh ||) dha° M °ratnâka° BM °ram te°.

तेन चाभिरुहित्वान ओगाहेत्वान सागरं।
द्वीपेषु रतनं गृह्य स्वस्तिना पुनरागता॥
तेषामासि सार्थवाहो पण्डितो अर्थचिन्तको।
धर्मलब्धो ति नामेन सो तेषां अनुशासति॥
इमस्मिं वाणिजा मार्गे राक्षसीयो भयानिका।
[354ᵇ] ऋजीये वशितां प्राप्ता मायाचारे च शिक्षिता॥
यस्तासु काहिति च्छन्दं बालो दुष्प्रज्ञजातिको।
न सो पुनर्जम्बुद्वीपं गमिष्यति आत्मनो घरं॥
यो च खु तासु अनपेक्षो भविष्यति इह वाणिजो।
स्वस्तिना सो जंबुद्वीपं गमिष्यति आत्मनो घरं॥
ते मार्गं प्रतिपद्येन्सुः यत्र राक्षसियो अभू।
ता च तानुपलभेन्सुः यथाधिमुक्तवाणिजां॥
रूपेहि अथ शब्देहि स्पर्शगन्धरसेहि च।
सुविचित्रेषु कामेषु उपलभेन्सु वाणिजां॥

तत्र ये रूपाधिमुक्ता वाणिजा ते रूपेहि लोभिता ये शब्दाधिमुक्ता वाणिजा ते मनोज्ञगीतवादितशब्देहि लोभिता ये गन्धाधिमुक्ता वाणिजा ते नानाप्रकारेहि सुमनोज्ञगन्धेहि लोभिता ये रसाधिमुक्ता वाणिजा ते पि नानाप्रकारेहि रसाग्रेहि लोभिता ये स्पर्शाधिमुक्ता वाणिजा ते नानाप्रकारेहि स्पर्शेहि लोभिता॥ सर्वे पंच वाणिजशता आहन्सुः॥ यस्यार्थाय वयं रात्रिं वा दिवा वा

1. BM tenâ câ(M °ca a)bhi ° ram dvi°. — 2. M °gato B °gato | . — 3. M °ho pâmdito arthavimnako B °ko dha°. — 4. M °shâm annaçâ°. — 5. B °kâ ri°.

6. M riddhiye° BM °ptâ | (M °ptâ) mayâcârye va çi°. — 7. M °su bhiticchamdaçca bâ° B °ko na°. — 8. M na so putra ja ° mishyamti â° BM °notparam | . — 9. M *omet les lignes 9 et 10*. B °jo sva°. — 10. B °ti | â ° ram te°.

11. B °mârgo pra° M °mârge pra° BM °dyetsuh ya° M °tra ca râkshasi abhût || B °kshasi abhû tâ°. — 12. M nâvad yathâ upalabhetsu rûpehi vi° B tâvannopalabhetsuh yathâ vimuktim si vânijam rû° M °nijâ || . — 13. M atha sparçaça° B rûpehi || atha sparçaça° BM °bdehi asparçagam° M °seshu ca || B °sehi ca su°. — 14. M °citrakâyeshu u° B °tre | shu° M °bhetsu vâ° B °bhetsuh vânijam ta°. — 15. BM °pehi lohitâ(M °lobhinâ) ye çabdâdhimuktâ(B °ktâ |) vânijâ(M °nivâ) te manojñagi ° bdehi lobhitâ | ye gandhâ(M °bhinâ yi gamdhâ) ° jñagandhe(M °gamdhe)hi lohitâ | ye ra(M °ye ca)sâdhimuktâ vânijâ te(B °te pi) nânâprakârehi rasâgrehi lobhitâ(B °lohitâ) | ye sparçâ(M °spaçâ)dhi° B °prakâre sparçe°.

19¹. B °nijâ ça° M °hatsuh || . — 19². BM °klishyamânâ nâ(M °mânâ)nâpra° M ka-

IMPRIMERIE NATIONALE.

परिक्लिश्यमाना नानाप्रकारां कर्मान्तां अनुतिष्ठियेम तान्यस्माभिरिहानुप्राप्ता रूपशब्दगन्धरसस्प्रष्टव्या । इमहिमेव वयं क्रीडिष्याम अभिरमिष्यामः न भूयो जंबुद्वीपं गमिष्यामः ॥ धर्मलब्धं सार्थवाहं संदिशन्ति ॥ अस्माकं वचनेन जम्बुद्वीपे मित्रज्ञातिसालोहितानां [आरोग्यं] पृच्छसि एते इमहिमेव वयं अभिरमिष्यामः ॥ सार्थवाहो तानाह ॥ भवन्तो न एता मानुषिका राक्षसीयो एता । तं मया युष्माकं आदित एवोक्तं । एते वयं शुवे तं राक्षसीभवनमतिक्रमिष्यामः ते च युष्माकं राक्षसीयो बऊप्रकारं लोभयिष्यन्ति । तत्र भवन्तेहि लोभं न कर्तव्यं । यदि इच्छथ क्षेमेन स्वदेशं गन्तुं मा भवन्तो राक्षसीहि मानुषिका ति चित्तं उत्पादेथ मा सर्वे अनयातो व्यसनमापद्यिष्यथ ॥ ते दानि धर्मलब्धेन सार्थवाहेन बऊप्रकारं वुच्यंता न शृणोन्ति मोहेन मोहिता ॥

ततः धर्मलब्धो सार्थवाहः स्वकेन परिवारेणातिक्रान्तो च तं सर्वं राक्षसीनिर्मितानि भवनानि अन्तरहितानि स्वप्नं व प्रतिभायेन्सुः ॥ ततो पंच वाणिजशतानि पंचहि राक्षसीशतेहि सर्वे खादिता अस्थीन्यवशेषितानि ॥ पंच वाणिजकशतानि भक्ष[355a]यित्वा सर्वं तं राक्षसीगणं सन्निपतितं । संनिपतित्वा आहन्सुः ॥ अयं धर्मलब्धो सार्थवाहो पुनर्पुनः इमेन मार्गेण महासमुद्रमवतरति लब्धलाभो च पुनःपुनश्चेमेण स्वदेशं गच्छति अन्यानपि वाणिजकां विग्राहेति मा एतेन मार्गेणागच्छथ मा राक्षसीहि खज्जियथ । का उत्सहति एतं धर्मलब्धं लोभेत्वा भक्षयितुं ॥ तत्र एका राक्षसी बऊमाया प्रविष्टा याये बह्वनि वाणि-

rmmâṁtâ avatishṭhaye çatâṁ ‖ yasyâbhi° B °ntâṁ avatishṭhiyesa tânya ° ptâ | rû° M °çabdaṁgaṁdhara°.

2. B imehi me vayaṁ° M imaṁhi evaṁ vayaṁ kṛidishyâmaḥ | abhiramishyâmaḥ dha°. — 3¹. M °diçani a°. — 3². M °jambûdvî° BM °nâṁ pṛi° M °cchati ‖ ete imaṁhi yavaṁ vayaṁ° B °imaṁhi e°. — 5¹. M °tâm âha ‖ . — 5². M bhavaṁto° BM °etâṁ mâ ° siyo etena°. — 5³. BM etena ma° M °ditam evo°.

6. M etena vayaṁ çuceta râkshasîbhava ° yishyaṁti | . — 7. M °bhavaṁtehi° B °bhavantohi lo°. — 8. BM yadi gaccha° M °kshemaṁ na svadeçaṁ gaṁtuṁ mâ bhavaṁto râkshasî mânushikâni ci° B °çaṁ gantu mâ bha ° detha mâṁ sarve° M °payishyâtha ‖ . — 9. M °dânim dha ° vucyaṁtâ na çriṇvaṁti mâhaivamohitâ ‖ B °nti mâhevamohitâ ‖ .

11. M °rthavâho svake ° ṇâtikrâṁto vayaṁ râksha ° nâni aṁtarhitâṇi sva ° yetsuḥ | B °yetsuḥ ta°. — 12. B tato tâni paṁcahi râksha ° asthinya° BM °çeshitâni paṁ°. — — 13. M °jaçatâ° B °sarve taṁ râ° M °yitvâ sarvâvaṁtaṁ râ ° ṇaṁ saṁnipa° BM °titaṁ saṁ°. — 14. M °hatsuḥ | B °nsuḥ a°. — 15. M °imena mârgeṇa mâsasamu ° naḥ punaḥ kshemena svadevâṁ gacchati | a ° etenâ mârgeṇâ ° khajjatha kâ°.

17. B kâ unsaha° M °ti ‖ evaṁ dha°. — 18. B °vishṭhâ yâ° M °vishṭo jâṁye bahû° B °kshitâ sâ°.

जशतानि उपलोभित्वा भक्षिता । सा ताहि राक्षसीहि उत्साहिता । धर्मलब्धं लोभेहि तव भक्षो भविष्यति ॥ सा तरुणाभिरूपां स्त्रीमात्मानं अभिनिर्मिणित्वा धर्मलब्धस्य गच्छंतस्य पृष्ठतो अनुबद्धा तस्य सार्थवाहस्य दर्शनपथेन पुनःपुनो अभिक्रामति न च सार्थवाहस्य तत्र स्त्रीयं मनं गच्छति ॥ सार्थवाहः तं पुणं समुद्रपत्तनमवतरित्वा नानाप्रकाराणि रतनानि गृह्य समुद्रातो क्षेमेण जंबुद्वीपं प्रत्युत्तीर्णो । सा राक्षसी तेन स्त्रीरूपेण तरुणाभिरूपेण सार्थवाहस्य धर्मलब्धस्य बऊप्रकारं प्रलोभेन्ती पृष्ठिमेन पृष्ठिमं अनुगच्छति ॥

यं वेलं धर्मलब्धो क्षेमेन वाराणस्यां जानपदं प्राप्तः तत्र राक्षसी धर्मलब्धस्य सार्थवाहस्य सदृशं दारकं अभिनिर्मिणित्वा सार्थवाहस्य उपनामेति । यदि त्वं मम उज्झित्वा गच्छसि इमं पुचकं गृह्णाहि को एतं त्वया गतेन उन्नेष्यति ॥ सार्थवाहो आह ॥ न एषो मम पुचो नापि मे त्वं भार्या अहं च मानुषो त्वं च राक्षसी बह्वनि वाणिजकशतानि ये युष्माभिः लोभिता अनयातो व्यसनमापादि ॥ सा ग्रामेहि च नगरेहि च निगमेहि च जानपदेहि च महाजनस्य गर्हति ॥ एषो मे धर्मलब्धो अमुकातो पत्तनातो प्रियशब्देहि आनेत्वा इह मे क्रुड्डेति । इमं पि पुचं न गृह्णाति ममापि न उन्नेति ॥ सो दानि सार्थवाहो महाजनेन स्त्रियाहि च पुरुषेहि ज उपलभ्यति । मा सार्थवाह एतां स्त्रियं समुद्रपत्तनातो आनेत्वा इमहिं मेल्लेहि एषो ते पुचो तव सदृशो ॥ सार्थवाह आह ॥ न एषो मम पुचो नाप्येषा भार्या मम राक्षसी एषा बह्वनि वाणिजकशतानि एताहि राक्षसीहि लोभेत्वा खादिता ॥ सापि राक्षसी तस्य जनस्याह ॥ एदृशा [355b] एते अर्थलब्धा पुरुषा यं वेलं स्त्रिय अनुरक्ता भवन्ति ततो गुणशतानि भाषन्ति यं

1¹. BM °tsâhitâ dha°. — 1². M °lobhahi taṁ bhaksho° B °tava bhakto bhavi° M °shyatha ‖ . — 2. BM °ṇâbhirû(M °ru)pâṁ strî âtmânaṁ abhiruhitvâ sâ dharma° M °naḥ punar akrâ° B °ca sârthavâhasya | tatra° M °hasya tata strî ° naṁ na gacchati ‖ B °cchati sâ°. — 4. M °vâhas taṁ pu ° drapenanevatari° B °ttanaivatari° M °ṇi ratnâni ° kshemena jaṁ°.

6. B °strirûpena taru ° lobhanti pṛishṭhimena pṛishṭimaṁ° M °lobhaṁti | pṛishṭimam anugacchaṁti ‖ . — 8. M °kshemaṁna vâ° BM °jânapado prâ° B °meti ya°. — 9. M °ko ekaṁ tva°.

11. M °me tva bhâ ° ṇijaça ° tâ ‖ anayâto vâsanâto pâditâ mâṁ° B °sanam opâdi mâ°. — 12. B mâ grâ° M mâṁ grâ°. — 13. B °labdhâto amu° M °priyaçatehi ânetvâ imehi° (*l.* 17) B °me cchoḍḍeti ‖ . — 14. B °gṛihnâti°. — 15. B so dâ sâ ° bhyati mâ°.

16. BM °imehi mille° M °putrâ tava çaḍriço ‖ . — 17². B °tro râpye° M °tro ra pyeshâṁ bhâ° B °bahuni vâ° M °ṇijaça ° kshasî lo°. — 19². M yedṛi° BM °rthalubdhâ° M °nuraktâḥ bhavaṁti ‖ ta° B °nuraktâ bhavanti | tato° M °bhâshaṁti yaṁ ° bhavaṁti taṁ° BM °niyâ ca kriyaṁ(M yâma) râksha° M °tena ca krusmâmaḥ | .

वेलं विरक्ता भवन्ति तं वेलं पिशाचनीयो च क्रियामो राक्षसी च अवर्णशतेन चाक्रुष्थामः ॥ एवं राक्षसी तं जनकायं पत्तीपयति ॥ एवं सार्थवाहो धर्मलब्धो क्षेमेण वाराणसी स्वगृहमनुप्राप्तो ॥

ततो च वाणिजा आऊः सार्थवाहं निरन्तरं ।
यस्यार्थाय वयं घट्टाम रात्रिंदिवमतंद्रिताः ।
कथं रूपानधिगच्छेम ते नो व्याधिगता इह ॥
आरोग्यं वार्य वदेसि जंबुद्वीपस्मि ज्ञातयो ।
इह एवं रमिष्याम नास्ति आगमनं तहिं ॥

सार्थवाह आह ॥

न खलु स्मृतिर्वो अस्ति विपर्यस्ताहो मारिष ।
राक्षसीनां तथ भक्षा नचिरेण भविष्यथ ॥
त्वचं वसां च मांसं च पीत्वान रुधिरं च वो ।
तुष्टा राक्षसी भविष्यन्ति आहारेण समर्पिता ॥
यो मे न काहिति वचनं पश्चात्तापी भविष्यति ।
अपरे वाणिजा आऊः सार्थवाहं तदनन्तरं ॥
यस्यार्थाय वयं घट्टाम रात्रिंदिवमतंद्रिताः ।
कथं शब्दानधिगच्छेम ते नो व्यधिगता इह ॥
आरोग्यं वार्य वदेसि जम्बुद्वीपस्मि ज्ञातयो ।
इहैव वयं रमिष्यामो नास्ति आगमनं तहिं ॥

2¹. M °yaṁ yattîyo yattîyati ‖ B °yaṁ pattimâpayati | . — 2². M °kshemena vâ ° prâptaḥ | . — 4. BM °jâ eke sârthavâham âha niranta(M °raṁta)raṁ | . — 5. M °vayaṁ dâtena râ° B °gharttena râ° M °m atamdritâ ‖ B °tâḥ ka°.

6. M kathaṁ rupân a ° ma taṁ sopâdhigajân iha ‖ B °rûpâm adhigacheme te so dyâ° ha â°. — 7. M ârogyâ cârya° B ârojñâ cârya° M °si jaṁbûdvipediyaṁ jñâ° B °pasmiṁ jñâ° BM °yo i°. — 8. M iham evaṁ ° shyâmima nâsti gamano tahiṁ ‖ B °sti gamanâ tahiṁ ‖ . — 10. M na khu mati vacanaṁ paçcâttâpi bhavishyati ‖ apare pi vâṇijâ âhuḥ na ca smṛi° B naṁ khu smṛiti nâsti | vi° M °ti nâsti vi° BM °sha râ°.

12. M tvacaṁ vartme ca mâṁsaṁ ca yitvâ ca ru° B tvacaṁ vatsaṁ ca mâṁ° BM °vo tu°. — 13. BM °siyo bha° M °vishyaṁti â°. — 14. M yo maṁ na kâhisi tâṁ vacanaṁ paçcâttâpi bhavishyati ‖ sâ° B yo mana kâṁhisi tâṁ va°. — 15. M sârtha ° danaṁtaraṁ.

16. M °rthâya ca vayaṁ ghartâma râ° B °gharttâma râ° M °dritâ ‖ . — 17. B kaṁ ça° BM °ma tenâpyadhi°. — 18. BM °gyaṁ vâryya ca(B °gyaṁ cârya va)desi jñâtayo (B °yo |). — 19. M °shyâno nâ° B °shyâmi nâ ° gamanâ tahiṁ ‖ M °gamanâṁ tarhi ‖ .

अपरे खु वाणिजा आऊः सार्थवाहं तदनन्तरं ।
यस्यार्थाय वयं घट्टाम रात्रिंदिवमतंद्रिताः ।
कथं गन्धानधिगच्छेम ते मं अधिगता इह ॥
आरोग्यं वार्य वदेसि जंबुद्वीपस्मि ज्ञातयो ।
इहैव वयं रमिष्याम नास्ति आगमनं तहिं ॥
अपरे खलु वाणिजाऊः सार्थवाहं तदनन्तरं ।
यस्यार्थाय वयं घट्टाम रात्रिंदिवमतंद्रिताः ।
कथं रसानधिगच्छेम ते नो व्यधिगता इह ॥
आरोग्यं वार्य वदेसि जंबुद्वीपस्मि ज्ञातयो ।
इह एव रमिष्यामो नास्ति आगमनं तहिं ॥

सार्थवाह आह ॥

तं खलु वो न स्मरथ विपर्यस्ताहो मारिष ।
राक्षसीनां तथ भक्षा नचिरेण भविष्यथ ॥
त्वचं च वसां च मांसं च पीत्वान रुधिरं च वो ।
तुष्टा राक्षसी भविष्यन्ति आहारेण समर्पिताः ॥
यं मे न कुर्वथ वचनं पश्चात्तापी भविष्यथ ।
अपरे खु वाणिजा आऊः सार्थवाहं तदनन्तरं ॥
यस्यार्थाय वयं घट्टाम रात्रिंदिवमतंद्रिताः ।
कथं स्पर्शानधिगच्छेम ते मं अधिगता इह ॥

1. BM °re khalu vâ° M °âha | sâ° B °huḥ ‖ sâ° M °vâha taranaṁtaraṁ B °raṁ ya°. — 2. BM °gharttâma râ° M °vasam atamdritâ ‖ . — 3. M °thaṁ gaṁdhân adhigacchâma te°. — 4. B sârogyaṁ cârya vede ° dvipasmiṁ jñâ° M °gyaṁ câryya vadesi jaṁbûdvipesmiṁ jâtayo i°. — 5. M ihaivaṁ vayaṁ ° shyâmi nâ° BM °gamanâ tahiṁ ‖ .

6. M °ṇijâ âha ‖ sâ° B °huḥ ‖ sâ° BM °vâha tadananta(M °naṁta)raṁ ya°. — 7. B °gharttâma râ° M °ghatti râtriṁ° M °tamdritâ ‖ . — 8. M °rasâṁ adhigacche° BM °ma tenâpya°. — 9. B °gyaṁ cârya vede° M °gyaṁ cârya vadesiṁ jaṁbûdvipesmiṁ jñâ° B °dvipasmiṁ jñâ°. — 10. M °evaṁ ramishyâmaḥ nâ° B °shyâmi nâ° BM °gamanâ tahiṁ ‖ .

12. BM taṁ khu vo° M °rishâ B °rishaḥ râ°. — 13. B °tha bhakshâ ci° M °shyasi ‖ . — 14. B tvacaṁ ca vartmaṁ ca mâṁ° M tvacaṁ vartma ca mâṁ° B °vo tu°. — 15. BM °siyo bha° M °vishyaṁti â ° rpitâ ‖ .

16. M yan me na ° çcâtâpi°. — 17. BM °re shu vâ ° huḥ ‖ sârthavâha tada° M °naṁtaraṁ. — 18. M yasyâya vayaṁ gharte râ° B °gharttema râ ° m atendri° M °m atamdritâḥ | .

आरोग्यं वार्यं वदेसि [356ᵃ] जंबुद्दीपस्मि ज्ञातयो ।
इहमेव रमिष्यामो नास्ति नो गमनं तहिं ॥

सार्थवाह आह ॥

तं खु न स्मृतिर्वो अस्ति विपर्यस्ताहो मारिष ।
राक्षसीनां तथ भक्षा नचिरेण भविष्यथ ॥
त्वचं च वसां च मान्सं च पीत्वान रुधिवं च वो ।
तुष्टा राक्षसी भेष्यन्ति आहारेण समर्पिताः ।
यं मे न कुर्वथ वचनं पश्चात्तापो भविष्यथ ॥
ततो च वाणिजका सर्वा राक्षसीयो भयानिका ।
आयसे नगरे घोरे प्रतितिष्ठे तदनन्तरं ॥
ता राक्षसीयो समागत्वा मतिं कुर्वन्सु तावता ।
अयं वाणिजको एको आगत्वान पुनर्पुनः ।
स्वस्तिना तरत पारं न तं शक्यति खादितुं ॥
ततो च राक्षसी एका पण्डिता अर्थचिन्तिका ।
बहवो वाणिजा ताय उपलोभेत्वान खादिता ॥
सा च तां अवच सर्वा मांसभक्षा सुदारुणां ।
अहं तं लोभयिष्यामि मम भक्षो भविष्यति ॥
वाणिजको सागरं तीर्णो सापि उत्तीर्ण राक्षसो ।
पृष्ठतो अनुबन्धेति अनुबद्धा पदंपदं ॥
अयं ते दहरो पुत्रो तव शोकेन मरिष्यति ।
गृह्ण त्वं किस्य उज्झयति ओरसो आत्मनो तव ॥

1. B °gyaṁ cârya vede° M °gyaṁ câryya vade ° dvîpesmiṁ jñâ° B °dvîpesmi°. — 2. M ihaiva ca ra° BM °shyâmi nâsti vo ga°. — 4. B °khu ra smaratha nâsti° M °khu na svaratha nâsti cipa ° ho mâstrisha(?) râ° B °risha râ°. — 5. BM °nâṁ tava bha° B °kshâya ci° M °shyati ‖ .

6. M tvacaṁ carmaṁ ca mânsaṁ ca rudhiraṁ ca pitvâ vo B °caṁ ca vartmaṁ ca mâ° vo tu°. — 7. M °siyo bhavishyati ‖ â ° rpitâ ‖ . — 8. M °kurvetha va° B °paçyâttâ° M °ttâpi bha°. — 9. B °vâṇikâ sa ° yânakâ | . — 10. M °ghora patishṭhe tadanaṁtaraṁ | .

11. BM tâṁ râ ° mati ku° M °kurvetsu tâvatâ° B °nsu tâgatâ | . — 12. M °tvâ ca punaḥ punaḥ | B °rpunaḥ sva°. — 13. BM °çaknoti°. — 14. M °eko paṁṇḍitâ arthaciṁtikâ ‖ B °ntitâ | . — 15. M °jâ tâye upalobhaṁna khâ°.

16. BM sâ ca taṁ ava° B °ca sarvâsâṁ mâṁ° M °ruṇâ ‖ . — 17. BM ahaṁ na lo° M °mi mama kshâ bhavishyatha ‖ . — 18. M vâṇijo sâga° B °rṇṇo so pi u°. — 19. M °nubaṁdheti anubaṁdhâ padaṁ° B °ti anubandhâ padaṁ°. — 20. M °çoke ma°.

21. B gṛihetva ki° M gṛihna tva kisya u – si âsare âtmanaṁ ta° B °ujhyosi o°.

धर्मलब्धो आह ॥

अप्येहि यस्य से भार्या अपुत्रे पुत्रं भाषसि ।
मानुषा न तुवं रक्षी न मां शक्ष्यसि खादितुं ॥
सा च ग्रामेषु निगमेषु राष्ट्रे जनपदेषु च ।
जनजनस्य आख्याति अयं उज्झति मे पति ॥
महाजनो समागम्य स्त्रियश्च पुरुषा पि च ।
पुरुषं परिभाषन्ति कस्मादुज्झेसि भार्यरां ॥
क्षत्रिया ब्राह्मणा वैश्या शूद्रा चात्र समागता ।
पुरुषं परिभाषन्ति कस्य उज्झेसि भार्यरां ॥

धर्मलब्धो आह ॥

न मे एषा मारिष भार्या राक्षस्येषा भयानिका ।
मनुष्यखादिका रौद्रा एवं जानेथनत्तवे ॥

यत्र कालं महाजनेन उपलभ्यमानो धर्मलब्धो न इच्छति नैव मे एष पुत्रो नैव मे एषा भार्या राक्षसी एषा निशाचरा राक्षसी तं जनकायं संज्ञापयति । एदृशा एते अर्थलब्धा पुरुषा तत्रैव सारज्यन्ति तत्रैव विरज्यन्ति । यत्र कालं अर्थिका भवन्ति स्त्रीभिः सततं प्रियशतानि मन्त्रेन्ति यत्र कालं विरक्ता भवन्ति ततः राक्षसीयो च क्रियाम पिशाचिनीयो च दुःकुलीना च क्रियाम अप्रियशतेन आक्रुष्यामः ॥ सा दानि स्त्री धर्मलब्धेन अनिच्छियति ॥ अमात्येहि राज्ञो ब्रह्मद-

2. B ayaṁ hi kasya se° BM °tre putra bhâ°. — 3. B mânusho na tuvaṁ pakshi mama çakshyati khâ° M mânusho na bhavaṁ pakshi mama çakyasi° — 4. M °râshṭa jana°. — 5. BM jane janasya° M °ayama-ti me patiḥ ‖ B °yaṁ rijuti me pati | .

6. BM °purusho pi°. — 7. B purusha pa° M °bhâshaṁti ka° BM °d ujhesi° B °bhâryân | M °bhâryâyâṁ ‖ . — 8. B kshetri° M °gatâḥ ‖ . — 9. M °bhâshaṁti ka° B °ujhyasi bhâryaraṁ ‖ M °bhâryyaraṁ ‖ .

11. M na maishâ° BM °kshasyaishâṁ bha° M °yânakâḥ | . — 12. M mânushâ khâditâ raudrâṁ e° B manushya khâditâ rau° M °netha hetave ‖ . — 13. M °rmalabdhena icchati ‖ naivaṁ me esha putro naivaṁ me eshâ bhâ° B °icchasi | naiva me esha° M °shâ piçâca râksha° B °çâcarâ | râksha°. — 14. M °driço ete ° shâ tatraivaṁ sâ rakshati ‖ yatra° B °sârakshyanti tatraiva virakshyanti | . — 15. BM °rthikâ bhavati stri° M °bhiḥ satato priyaçatâni maṁtreti yatra° B °ntreti | yatra° M °ktâ bhavaṁti ‖ tato râkshasiyo ca kriyâna piçâcaniyo ce duḥkulino ca kri° B °nti | tataḥ râkshasiyâ ca kriyâma pi° BM °priyaçate ca â°.

18¹. M °dânim stri° B °bdheṇa anicchayanti | M °anicchcyati. — 18². B °taṁ ma°.

त्तस्य निवेदितं ॥ [356b] महाराज धर्मलब्धेन महासार्थवाहेन समुद्रपत्तनातो स्त्री आनीता प्रासादिका दर्शनीया परमेण रूपेण समन्वागता समानरूपा न ज्ञायति ॥ धर्मलब्धो केनचि कारणेन नैव भार्यां इच्छति नैव तं पुत्रं ॥ राज्ञा अमात्या आणत्ता ॥ शब्दापयथ धर्मलब्धं सार्थवाहं ॥ सो दानि अमात्यै राज्ञो सकाशं शब्दापितो शब्दापिता अपि सा स्त्री ॥ राज्ञो ब्रह्मदत्तस्य तां स्त्रियं पश्यित्वा अभिरूपां दर्शनीयां उत्तमेन रूपेण समन्वागतां राज्ञो तत्र स्त्रियं अत्यर्थं अनुरागो उत्पन्नो ॥ सो दानि तं सार्थवाहं आह ॥ यदि तव एताये स्त्रिये नार्थो मम तां देहि ॥ धर्मलब्धो आह ॥ मा महाराज प्रमादं करोहि न एषा मम भार्या न ममैष पुत्रो । एषा समुद्रातो उपलोभेन्ती मम पृष्ठेन पृष्ठिमं समनुबद्धा प्रलोभनार्थं । न एषा स्त्री राक्षसी एषा मा महाराज अत्र मनं करोहि ॥ सो दानि राजा तत्र स्त्रियं अनुरक्तो तारुण्येन रूपेण च धर्मलब्धस्य न शृणोति । यथोक्तं भगवता ॥

रक्तो ह्यर्थं न जानाति रक्तो धर्मं न पश्यति ।
अन्धतमस्तदा भवति यं रागो सहते नरः ॥

तेन राक्षसी अन्तःपुरं प्रवेशिता ॥ ताये सार्धं राजा ब्रह्मदत्तो क्रीडित्वा रमित्वा प्रविचारयित्वा शयितो ॥ ताये राक्षसीये सर्वस्य राजकुलस्य ओस्वापनं कृतं । सपुत्रिकाये राजा खादितो ॥ राजानं भक्षयित्वा सो पुत्रः तत्र राक्षसीनां मूलं प्रेषितो । आगच्छथ शीघ्रं इमं राजकुलं भक्षयितव्यं ॥ आमुहूर्तस्य सो तं राक्षसीगणं गृह्यागतो ॥ ताहि ताये रात्रिये सर्वं तं राजकुलं साभ्यन्तरबाहिरं

1. M °diko da ° paramarupeṇa° BM °gatâ sagarbharûpâ°. — 3¹. BM °labdhena kena kâra° M °ṇena mahâsârthavâhena naivaṁ bhâryâm icchati naivaṁ taṁ°. — 3². M °tyâ âgatya ça° B °ttâ ça°. — 4¹. M °bdhaṁ câhaṁ ‖ . — 4². M so dâniṁ amâtyo râ° B °çaṁ çabdâpito apito | api sâ° M °çaṁ çabdâpitaḥ api sâ° BM °strî râ°. — 5. BM °sya taṁ striyaṁ pa° B °tâṁ râjñâ tatra striyo atya° M °jño na striyo atya ° tpannaṁ ‖ .

7². BM °di tâvad etâ ° rtho(B °rtho |) mama taṁ dehi ‖ . — 8². B °prasâdaṁ° M °esho mama bhâ° B °ryâ tava vâne na eshâ mama bhâryâ na mamai°. — 9. B eshâṁ samu° M °palobheṁni mama pṛishṭhe° B °nti mama pṛishṭena pṛishṭemaṁ sa°. — 10. B °si e mâ mahâ° M °si yushâ mâ°.

11. M °dâniṁ râ ° striyam anuyukto°. — 12. BM °vatâ ra°. — 13. M dakto hya° B raktâ hya ° jânâti rakto dha°. — 14. BM °ndhastamas ta° BM °bhavati(M °vani) yo râgaṁ sva sa° M °naro te°. — 15¹. M °si aṁtalpu°. — 15². M °hmadato kri°.

16. BM °osâpanaṁ° B °taṁ sa°. — 17¹. BM °to râ°. — 17². M °putra ta ° mûle pre° BM °to â°. — 18². M °gṛihvâga° BM °to te°. — 19. BM tehi tâ° M °sâbhyaṁtarebâhira sastri° B °ntaraṁ bâhiraṁ° M °sahasvi sâçva jñâye râ ° ditaṁ ‖ asthikaraṁkâni avaçeshitâni pra° B °kalaṁkâ vaçeshikṛi°.

सस्त्रीपुरुषं सकुमारीकं सहस्ति साश्वं ताये रात्रिये सर्वं खादितं अस्थिकरंकानि अवशेषीकृतानि ॥

प्रभाताये रात्रीये अमात्या राजकुलं गता पश्यन्ति द्वाराणि बद्धकानि । पुरोहिता पि आगता भटबलाग्रा आगता श्रेष्ठिनैगमा धर्मलब्धसार्थवाहप्रमुखो वाणिजग्रामो आगतो सर्वे सुखरात्रीपृच्छिका यथा अन्यदापि । पश्यन्ति तानि राजकुलद्वाराणि बद्धकानि ॥ ते अमात्या परस्परं पृच्छन्ति ॥ किमेवाद्य राजकुलद्वारा न मुंचन्ति । अन्यकालं राजकुलद्वाराणि मुक्तानि भवन्ति राजकुलं सिक्तसंमृष्टं भवति आसनप्रज्ञप्ती च कृता भवति । न कस्यचिच्छब्दं शृणीयति स्त्रीशब्दं वा पुरुषशब्दं वा हस्तिशब्दं वाश्वशब्दं वा एवं विस्तीर्णे राजकुले एवं महाजनकाये न कस्यचिच्छब्दो श्रूयति ॥ धर्मलब्धो [357a] सार्थवाहो आह ॥ भवन्तो यूयं न राजकुलातो शब्दं शृणिष्यथ । सा राक्षसी अत्र दारुणा मान्सशोणितभोजना प्रवेशिता । ताये अत्र महादीनवं उत्पादितं । मुंचापेथ एतानि द्वाराणि यावज्जानाम राजकुलस्य वर्तमानं ॥ अमात्येहि निश्रेणिं आनयित्वा पुरुषा आरोपिता गच्छथ द्वाराणि मुंचथ त्ति ॥ पुरुषा राजकुलं चारूढा पश्यन्ति च अत्र हस्तिकरंकानि चाश्वकरंकानि च । एते च निवेदयन्ति जनकायस्य ॥ सर्वं इमं राजकुलं खादितं करंकान्येवावशेषितानि ॥ ते दानि वुच्यन्ति ओतरित्वा मुञ्चथ एतानि द्वाराणि ॥ ततो ओतरित्वा द्वाराणि मुक्तानि अमात्या च भटबलाग्रा च नैगमा

3¹. M °triṇiye a ° paçyaṁti dvâ°. — 3². M °hitâmi âgatâ bhaṭṭabalâgrâ âgato çre° B °lâgrâ âgato | çreshṭinai ° mo âgamo | sarve° M °kharâtripṛi° BM °thâ | a(B °aṁ)nyadâpi pa°. — 5. M paçyaṁti tâ° M °ṇi buddha° B °ṇi ca baddhakâni ca te°.

6¹. M °pricchaṁti ‖ . — 6². B kiṁ revâ° M cire vâdya paja° BM °dvâraṁ na° M °muṁcaṁti ‖ . — 7. M °laṁ râjadvârâni muktâni bhavaṁti ‖ râjakula siktasaṁsṛishṭaṁ bhavati | na ka° B °shṭaṁ bhavati | â°. — 8. BM na kasyacicchabda çruṇi° M °striçabda purushaçabdaṁ ha ° stirṇo râ° BM °kâyo na° M °cicchabdaṁ çruya° M °bdo çruya°. — 10¹. B °sâthavâ° M °vâha âha bha°. — 10². M bhavaṁto yû° BM °yaṁ sâ râja°.

11. M °tra mahâdâ° B °tra câruṇâ mânsaçonitebho° M °bhojinâ°. — 12¹. M °tpâdinaṁ B °ditaṁ muṁ°. — 12². M puṁcâpayatha | yetâ ° sya carta° BM °naṁ a°. — 13. B °hi niḥçre° M °çreṇi âna° B °ânayetvâ ° shâ ârushitâ ga° M °shâ ârupitâ gacchaṁtha dvâ ° muṁcayaṁti B °muṁcathanti pu°. — 14. B °kulaṁ câruḍhâ° M °ḍhâ paçyaṁti ‖ tatra°. — 15¹. BM eteshâṁ ni° M °dayaṁti ja° BM °sya sa°. — 15². B sarve | i° M sarve i° B °çeshaṁtâni | .

16. M °dâniṁ buddhyaṁti o° B °ni budhyanti° BM °trâ jânatha e ° ṇi ta°. — 17. M °tyâ bhaṭṭaba° M °pravishṭo paçyaṁti° B °açvabâbiriye pi karaṁkâṇy a° M °vaçeshitâmi te° M °stimarâṭhânâṁ açvamarâṭhânâṁ pi asthim avaçeshitâni B °stimaṇṭhânâṁ açvamaṇṭhânâṁ pi°.

च बाहिरराजकुलद्वारं प्रविष्टाः पश्यन्ति च हस्तिबाहिरीये अस्थिकरंकानि अश्वबाहिरीये पि करंकान्यवशेषितानि तेषां हस्तिमेण्ढानां अश्वमेण्ढानां पि अस्थीन्यवशेषितानि । यथा श्मशानं एवन्तं बाह्यतो राजकुलं भयभैरवदुर्गन्धं ॥ अभ्यन्तरतो पि राजकुलद्वाराणि मुंचित्वा द्वारं प्रविष्टा तत्रैव राज्ञो पि देवीनां पि अस्थीन्यवशेषितानि । एवन्तं राजकुलं अभ्यन्तरबाह्यतो श्मशानभूतं भयभैरवदुर्गन्धं ॥

ततो तेहि अमात्येहि च नैगमेहि च महाजनकायं संनिपातेत्वा तं राजकुलं साभ्यन्तरबाहिरं शोधापितं सिक्तसंमृष्टं कारापितं धूपनधूपितं तस्य राज्ञो देवीनां च सर्वेषां शरीरे पूजा कृता समन्ततो नगरस्य गुप्ता स्थापिता चतुरंगबलकायं निवेशितं हस्तिकायं अश्वकायं रथकायं पत्तिकायं ॥ एवन्तं नगरं सजनपदं रक्षीयति मा कोचि राजा अपराध्येयाति ॥ ते दानि अमात्या च नैगमा च जानपदा च संनिपतित्वा मन्त्रं धारेन्ति परस्परं संमन्त्रेन्ति ॥ भवन्तो को इह अस्माकं वाराणसीये राजा भविष्यति यो शक्येय इमं राज्यं धर्मेण परिपालयितुं ॥ तेषां सर्वेषां राजामात्यानां नैगमजनपदानां च एतदभूषि ॥ नान्यो राजा योग्यो वाराणस्यां स्थापयित्वा धर्मलब्धं सार्थवाहं । एषो पुण्यवन्तो चाप्रमत्तो च । यक्षराक्षसा अपि न शक्नुवन्ति अवतारमधिगन्तुं । तत्र चिष्कुत्तं महासमुद्रं अवतीर्णः सिद्धपात्रो च सर्वकालं चेमेण प्रत्यागतो ॥ तेहि सो धर्मलब्धो सार्थवाहो सर्वसौवर्णमहासिंहासने निषीदापेत्वा राज्ये भिषिक्तो ॥

भगवानाह ॥ स्यात्खलु पुनः भिक्षवः युष्माकमेवमस्यादन्यः स तेन कालेन

3. M °çânam evañ bâhya° BM °râjakulasya bha° M °durgañdhañ B °ndhañ a°. — 4. M abhyatarato pi râjakuradvâṇi muci° BM °vishṭo tañ sarva(M °sañva)râjño pi devînañ pi asthi(B °sthiñ)nya° M °varopitâni | B °tâni e°. — 5. M evañ tañ râhulañ abhyañtara ° çânañ bhûta bha ° ravañ durgañdhañ ‖ .

7. M °tyehi nai ° pâtatvâ ° sâbhyañtara ° rañ sodhâyitañ si° B °dhâpitañ | siktasanmṛishṭañ° M °sañsṛishṭa kâraâpitañ dhupanadhûpitañ° B °dhûpakadhû° M °devipa sarve° B °vîkâya sarve° BM °çariraṁ pû° M °samañtañtaro naga° B °catulañgavarakâyañ ° çitañ | hastikâyam açva° M °stikâyam açvakâyañ e°. — 10. M evañ tañ na° BM °rañ so ja° M °mâ kvacid râjâ aparadhya yâ te° B °aparadhya yâto | .

11. M °tvâ mavañ dhâretti parasparañ samaceti ‖ B °mantreti | . — 12. M bhavañto iha ° shyati | yo çakoya imañ ° rimâlayatuṁ te° B °pâlayatuṁ ‖ . — 14¹. M teshâṁ râjâ°. — 14². M °râjâ yogyaḥ vâ ° sthâyetvâ°. — 15. M °ṇyavañto ca apramato ca.

16¹. M °kshasa api ° knuvañti ava ° dhigañtuṁ | . — 16². M tatra kṛishṇabhyavatirṇo siddhayânapâ ° tyâga tehi°. — 17. B °ho savasau° M °ho sauvarṇe siṁ ° dâyetvâ râjyâbhi° B °bhisikto ‖ . — 19². M °punar bhiksha°.

तेन समयेन धर्मलब्धो नाम सार्थवाह अभूषि । न एतदेवं द्रष्टव्यं । तत्कस्य हेतोः । अहं स भिक्षवः तेन कालेन तेन समयेन धर्मलब्धो नाम सार्थवाह अभूषि ॥ या सा राक्षसीमहत्तरिका एता सा मारधीता । (तदा राक्षसीनां महत्तरिका अभूत्सुः) तदापि एता ममावतारार्थी अवतारंगवेषी उपसंक्रान्ता [357ᵇ] न च मम शक्ता अवतारमधिगन्तुं एतरहिं पेता ममावतारार्थी अवतारंगवेषी उपसंक्रान्ता नो तत्र नाम मे शक्ता अवतारमधिगन्तुं ॥

अश्रोषीत्खलु यदा राजा महामात्राणमन्तिके ।
महासमुद्रपारां स्त्रीं धर्मलब्धो न इच्छति ॥
आणपेसि तदा राजा महामात्यां तदनन्तरं ।
सचे एष नेच्छति स्त्रीं प्रवेशेथान्तःपुरं मम ॥
अन्तरायं विजानित्वा न सानं खादि राक्षसी ।
सा तत्र पुत्रं प्रेषेति राक्षसीणां निवेदकं ।
भक्षितो खु मया राजा क्षिप्रं आगच्छथत्तवे ॥
राक्षसीनां गता पंच रौद्रा रुधिरभोजना ।
सर्वे राजकुलं गत्वा पराक्रमेन्सु यथागतं ॥
पूर्वे निवासं भगवान्पूर्वेजातिमनुस्मरं ।
जातकमिदमाख्यासि शास्ता भिक्षूणमन्तिके ।
ते स्कन्धा ते च धातवः तानि आयतनानि च ॥

1¹. M naitad e°. — 1². B tan kasya°. — 2. B °kâlena dha° M °vâho abhûshi ‖ tat kasya hetor ahañ bhikshavo tena kâlena tena samayena dharmalabdho nâma sârthavâho abhûshi | . — 3¹. M yâ so mahattarikâ râkshasi etâsâṁ mâra° B yâ sâṁ râ ° ttarikâ°. — 3². M °sinâ maha ° bhûshi ‖ tadâpi° BM °etâ mamâ(M °etâṁ a)vatârârthi(B °rthi |) avatâraṁgaveshi upasañkrântâ ca tâṁ(M °krâṁtâ na matâ) mama çaktitâ(M °saktito) avatâram adhigantuṁ | etarahiṁ pye(M °gaṁtuṁ etarhyapi e)tâ marârthi(B °mamâvatârârthi) avatâraṁgaveshi upasañkrântâ to(M °krâṁto) tatra nâma ma çaktitâ(B °ktito) avatâram adhigantuṁ(M °gaṁtuṁ) ‖ .

7. BM °râjâ mâtrâṇâm anti(M °m aṁti)ke ma°. — 8. B °pâraṁ striṁ° M °pâraṁ striçabdalabdho° B °ti â°. — 9. B °dâ mahâ ° dantaraṁ | M °naṁtaraṁ. — 10. M sarvesha necchañti stri praveçâṁ yathântaḥ° B sa caisha necchati stri praveço yathântaḥpure mama a°.

11. M aṁtarâyaṁ ° sâta khâ°. — 12. B °preshati° M °preshayati râkshasinâ niveçana B °kaṁ bha°. — 13. B °kshitâ khu° M °kshitâ shu mayâ° BM °thatave ‖ (M ve). — 14. M râççashinâṁ°. — 15. BM °krameshu ya°.

16. B pûrvaṁ ni° M °n pûrvaṁ jâti samanusmaran ‖ B °raṁ jâ°. — 17. M °khyâmi çâ° B °kshûṇâṁ santike | M °bhikshuṇam aṁtike | . — 18. M te skaṁdhâ te ca ° vaḥ tâṁny âya° B °tâny âyatanâni°.

आत्मानमधिकृत्य भगवां एतमर्थं वियाकरेत् ।
अनवराग्रस्मिं संसारे यत्र मे उषितं पुरा ॥
धर्मलब्धो अहं आसि वाणिजको अर्थचिन्तको ।
मारधीतरो राजसी एवं धारेथ जातकं ॥
एवमपरिमितं बज्रदुःखं
उच्चनीचं चरितं पुराणं ।
विगतज्वरो विगतशोको
भगवां भाषति भिक्षुसंघमध्ये ॥

धर्मलब्धस्य सार्थवाहस्य जातकं समाप्तं ॥

कालो नागराजा तहिं खु महाचंक्रमे भगवन्तं उपसंक्रान्तो ॥ सो दानि भगवतः पादौ शिरसा वन्दित्वा एकांशीकृतो प्रांजलीकृतो भगवन्तमेतदुवाच ॥ मम भगवं भवनो पुरिमकेहि सम्यक्संबुद्धेहि परिभुक्तो क्रकुच्छन्देन भगवता कोनाकमुनिना काश्यपेन साधु भगवानपि मम भवनं परिभुंजतु अनुकंपामुपादाय ॥ तत्रापि भगवां कालस्य नागराजस्य भवने चतुर्थं सप्ताहं प्रीतिसुखेन वीतिनामेति । ततो पि भगवां कालस्य नागराजस्य भवनातो चतुर्थस्य सप्ताहस्यात्ययेन उत्थितो ॥

मुचिलिंदो नागराजः पुरिमबुद्धदर्शावी भगवतः उपसंक्रान्तो ॥ सो पि भगवतः पादौ शिरसा वंदित्वा एकान्ते प्रांजलीकृतो भगवन्तं याचति ॥ मम भगवं भवनो पुरिमकेहि सम्यक्संबुद्धेहि परिभुक्तो भगवता क्रकुच्छन्देन कोनाकमुनिना काश्यपेन साधु भगवां पि मम भवनं परिभुंजतु अनुकंपामुपादाय ॥ भगवां मुचिलिंदस्यापि नागराजस्य भवने पंचमं सप्ताहं सुनिराहारः प्रीतिसुखेन

1. B cânmâna° M °gavân eta° B °rthaṁ vyâharet | M °rthaṁ vyâhare a°. — 2. M °varâgresmi saṁ ° tra u° B °tra me tushita purâ dha°. — 3. B °bdho 'haṁ° M °aham âsi vâ ° rthaciṁtako | . — 4. M °si etaṁ dhâraya jâ°. — 5. B °ṇaṁ vi°.

7. M °bhagavân bhâsha°. — 9. M iti çrimahâvastuavadâne dharma° B °sya sâthavâ° M °vâhajâ ° mâpta ‖ . — 10¹. M atha kâ° BM °hiṁ kumariṁ caṁ(B °ca)kra° B °nto so°. — 10². M °ni bhagavato pâ° B °çilasâ ° ekâçî°.

11. M mama bhagavan mavano ° bhuktehi kra° B °bhukte kra° M °ndena bhagavato ko° BM °bhuṁjâtu°. — 14. M °lasya nâgarasya bhavane caturtha sa ° khena vithinâ°. — 15. M °syâbhyayena utthitaḥ.

16¹. M mucilindo nâgarâjo pu ° vi bhagavato pâdau° B °nto so°. — 16². M °vanditvâ° B °ti mama°. — 17. M mama bhagavan bhavanâto pu° B °vaṁ bhavanâto pu° M °kto bhagavato kra° BM °bhuṁjâtu°. — 20. M bhagavân muci° BM °nirâhâra pri° M °vithinâ°.

वीतिनामेसि ॥ ततो पि तहिं सप्ताहिकं अकालवार्दलं उत्पन्नं सप्ताहं रात्रिंदिवं देवेन वर्षितं मुचिलिंदेनापि नागराज्ञा भगवतरर्धयोजनकपरिक्षेपेन सप्तकुत्तं भगवन्तं भोगेन परिक्षिपित्वा उपरि विपुलेन फणेनाच्छादेसि । यथा च भगवन्तं विषगंधेन किल्विषगन्धेन वा न व्याबाधेय त्ति मुचिलिन्दो नाम नागराजा स्वकातो भवनातो उत्तरित्वान भोगेन आछायेसि शिरिघनसुकृतेन फणेन सप्ताहं विपुलपुण्यं प्रसूतं । [358ᵃ] विनिपातेन नागराजेन च पुण्यं प्रसूतं परिक्षिपि हि महता परिभोगेन सप्ताहं ॥

यदा भगवान्सम्यक्संबुद्धः दुष्करं चरति नदीये नैरंजनाये तीरे तत्र भगवां दुष्करं चरन्तो अजपालकेन दृष्टो ॥ तस्य भगवन्तं उग्रतपं तप्यन्तं दृष्ट्वा प्रसादमुत्पन्नं ॥ तेन दानि प्रसन्नचित्तेन भगवन्तमुद्दिश्य न्यग्रोधपोतो रोपितो ॥ सो तं न्यग्रोधपोतं रोपित्वा भगवन्तमुपसंक्रम्य प्रांजलीकृतो आह ॥ भगवं इमो मया न्यग्रोधपोतो भगवन्तमुद्दिश्य रोपितो यदा एषो न्यग्रोधपोतो संवृद्धो भवेया भगवां संपूर्णकल्पो भवेया ति । ततो मे एतं न्यग्रोधं अनुग्रहार्थं परिभुंजसि ॥ भगवता तस्याजपालस्य तूष्णीभावेनाधिवासितं । सो दानि तूष्णीभावेनाधिवासनां विदित्वा तुष्टो आत्तमना प्रमुदितो प्रीतिसौमनस्यजातो संवृत्तो ॥ सो दानि तं न्यग्रोधपोतं कालेन कालं अनुखनेति परिखनेति परिकीलेति परिकुड्डालेति कालेन च कालं शीतलेन वारिणा अभिषंदेति परिषंदेति पर्याद्रेति परिघारेति ॥ सो दानि अजपालेन न्यग्रोधपोतो क्षिप्रं प्रशाखो संवृत्तो प्रासादिको दर्शनीयो भगवतो

1. BM tato pi bhagavâṁ ta(M °vân ta)hiṁ ° kâla(M °kâra)vardalaṁ utpaṁnaṁ(M °tparaṁ) saptahi râtriṁdivâṁ deve ° râjño bhagavatar a(M °vato a)rddhayo° B °kshemena° M °rikshapeṇa saptakṛityaṁ bha° BM °geṇa parikshi° M °pureṇa phalenâcchâditâcchâdesi | B °phaṇenocchâ°. — 3. BM °dhena khitkrisigadhe(M °khikisigandhe)na vânna-(M °vâṁna) vyavaheyanti ‖ mu° M °ndo nâgarâja svakâto u ° genâcchâye çrighanaṁ sukṛiteca pha° B °vesi çirighanaṁ su ° phaṇena sa° BM °puṇyaprasûtâ(B °tâ ‖).

6. M vivipâ° BM °jena yo sutaṁ parikshiptâ parikshipi(B °pi hi) maha°. — 8. M yadâ bhagavan dushkaraṁ caranti nadi° B °vân saṁmyaksaṁbuddhaḥ dushkaraṁ ca carati | nadi° M °tra bhagavân dushka ° japâran tena ajaṁcaranona dṛishṭvâ prasâdam u° B °japâlan tena ajâṁ vâlantena dṛisbṭvâ tasya°. — 9. B °prasannaṁ utpannaṁ tena°. — 10¹. M te dâni° BM °vantaṁm u ° to vâpito so°. — 10². B °vantaṁm upa° M °kṛitam âha | .

11. BM bhagavaṁ imo(M °van imâṁ) mayâ(B °yâ mayâ) nyagrodhapoto bhagava° M °gavân saṁpûrṇaṁka ° veyasi | B °lpo bhaveyâsi | . — 13¹. M °hârtha paribhuṁjesi | . — 13². M °tasya ajapârasya tû ° vâsanâṁ vi° B °sita so°. — 15. BM °parikhaneti pari(M °li)kileti parikude(M °kûḍye)ti kâlena ca° M °bhishyandeti parishyandeti paripra-bheti parighareti | B °rishyaṁdeti paripradeti parighareti so°.

17. BM °kshipraçâkho° M °tejonu° BM °vena ta°.

तेजानुभावेन ॥ तस्य दानि अजपालस्य न्यग्रोधपोतं ओशाखप्रशाखं प्रासादिकं प्रसादनीयं दृष्ट्वा अतिरिव चित्तं प्रसीदति ॥ सो दानि तेन चित्तप्रसादेन च कुशलमूलेन च कायस्य भेदात्त्रयस्त्रिंशदेवनिकाये उपपन्नो न्यग्रोधो नाम देवपुत्रो महर्द्धिको महानुभावो । सो पश्चादुपपंनो समानो अन्यां पूर्वोत्पन्नांस्त्रयस्त्रिंशकायिका देवपुत्रां दिव्येहि पंचहि स्थानेहि अभिभवति दिव्येनायुषा दिव्येन वर्णेन दिव्येन सुखेन दिव्येनैश्वर्येण दिव्येन परिवारेण ॥ तस्य समनन्तरोपपन्नस्य एतदभूषि । किं मया मनुष्यभूतेन कुशलं कर्म कृतं उपचितं कस्य कर्मस्य विपाकेन इह त्रायस्त्रिंशभवने उपपन्नो हं ॥ सो दानि न्यग्रोधो देवपुत्रो कुशलमूलं समन्वाहरन्तो पश्यति भगवन्तमुद्दिश्य न्यग्रोधं नदीये नैरंजनाये तीरे रोपितं ॥ सो दानि न्यग्रोधो देवपुत्रो अनेकदेवपुत्रसहस्रेहि परिवृतः अभिक्रान्तवर्णो अभिक्रान्तवर्णेन केवलकल्पं मुचिलिंदस्य नागराज्ञो भवनं उदारेण वर्णेन ओभासेत्व येन भगवांस्तेनोपसंक्रमित्वा भगवतः पादौ शिरसा वन्दित्वा एकान्ते अस्थासि ॥ एकांशीकृतो प्रांजलीकृतो भ[358b]गवन्तमेतदुवाच ॥ मया भगवन्मनुष्यभूतेन अजपालेनाजानि पालेन्तेन एषो न्यग्रोधो रोपितः भगवन्तमुद्दिश्य तेनाहं कुशलमूलेन मनुष्येषु च्यवित्वा भगवन्त्रायस्त्रिंशे देवनिकाये उपपन्नो । साधु भगवानेतं न्यग्रोधं परिभुंजतु अनुकंपामुपादाय यथा मे महाफलतरं भवेया ॥ अधिवासते भगवां तस्य देवपुत्रस्य तूष्णीभावेन ॥ अथ खलु सो देवपुत्रो तूष्णीभावेनाधिवासनां विदित्वा तुष्टो हृष्टो आत्तमनो प्रीतिसौमनस्यजातो भगवतः पादौ शिरसा वन्दित्वान तूष्णीत्वो प्रदक्षिणं कृत्वा तत्रैव अन्तरहाये ॥

भगवान्मुचिलिंदस्य नागराज्ञो भवनातो उत्थिहित्वा षडं सप्ताहं निराहारो प्रीतिसुखेनाजपालन्यग्रोधमूले वीतिनामेसि ॥ ततो अजपालस्य न्यग्रोधमूलातो

1. M °japârasya nya° BM °dikaṁ prâsâda° B °ttaṁ prasâdanta so° M °sîdanti ‖ . — 2. M °cittepra ° bhedâ trayastriṁçe de° B °bhedâs trayastriṁçâ de° BM °vo so°. — 4. M °d upapannaḥ sa ° nnâṁ trayastriṁ ° pañcahi kâmehi sthâ° BM °ti ‖ divyenâyu ° rṇṇe(M °rṇe)na divyena çâkhena divyenai° M °ryena di° BM °ṇa ta°.

7. M °striṁçe bha°. — 8. M °nyagrodha de° BM °gavato u°. — 9. M °trasahasrairhi pari° BM °taḥ atikrântavarṇṇo(M °rṇo) atikrântavarṇṇe(M °rṇe)na kevalaṁ kalpaṁ° M °cilindesya ° jño bhavanam udâ ° yena bhagavânsteno ° gavato pâ° B °nte âsi e°.

13¹. B °prâṁjalikṛito bha°. — 13². M °jâti cârante° B °jâni vârante° M °ropito bhagavanta° B °upanno sâ°. — 15. BM °bhuṁjâtu ° dâya | yathâ° M °phalaṁ bhavayo.

16. M °gavân tasya de° BM °bhâvenâ ‖ . — 17. BM °viditvâ citto hṛi(M °tto tu)shṭo° M °prîtisoma ° gavato pâ ° nditvâ trishkṛi° B °nditvâ ca tri° M °kshiṇikṛitvâ tatraivântarahâya ‖ . — 20. M °cilindesya ° to ucchihitvâ ° japâranyagrodhamule vithinâ°.

21. M °pârasya nya° B °grodhâmû ° kâvanakhaṇde ° devajake ce° B °ceti | ye° M °vithinâ°.

षष्ठस्य सप्ताहस्यात्ययेन चीरिकावनषण्डे बज्रदेवतके चेतिये निराहारो प्रीतिसुखेन सप्तमं सप्ताहं वीतिनामेसि ॥ एवं भगवां सप्तसप्ताहं एकूनपंचाशद्दिवसां निराहारो ॥

उत्तरापथे उक्कलं नामाधिष्ठानं । ततो उक्कलातो अधिष्ठानातो चपुसो च भल्लिको च नाम सार्थवाहा आढ्या महाधना महाभोगा पुण्यवन्तो महापरिवारा दक्षिणापथातो पंचहि धुरशतेहि तेन मार्गेण आगच्छन्ति ॥ तेषां मङ्गलीयानां बलीवर्दानां पुंगवा एको सुजाताये नचत्रे जातको अपरो कीर्तिके । तेषां एवं नचत्राणां नामेन सुजातकीर्तिकनामेन ह्वायन्ति ॥ सर्वस्य सार्थवाहस्य पुरतो सार्थवाहस्य यानकं वहन्ति । यत्र मार्गे किंचिद्भयो भवति सिंहभयो व्याघ्रभयो द्वीपिभयं वा गण्डकभयं वा हस्तिभयं वा वनदेवभयं वा उदकवाहभयं वा चौरभयं वा तत्र ते न गच्छन्ति ततः ते वाणिजका जानन्ति भयं भविष्यतीति तथा संहरित्वा चतुर्दिशं प्रधावन्ति समन्तेन अवलोकेत्वा ॥ ते दानि बलीवर्दा सुजातकीर्तिका तहिं चीरिकावनखण्डं चानुप्राप्ता । अत्र चपुषभल्लियानां च वाणिजानां पूर्वज्ञातिसालोहितेहि देवभूतेहि तहिं चीरिकावनखण्डे ऋद्धिये निगृहीता न शक्नोन्ति गन्तुं ॥ तेहि स्थितेहि सर्वे ते पुरुषा सार्थातो भीता तत्र संनद्धा ॥ तेषान्ते देवता पूर्वज्ञातिसालो[359a]हिता अन्तरीचगता घोषमुदीरयेन्सुः शब्दमनुश्रावयेन्सुः ॥ मा भायथ वाणिजा त्ति न भवति वो उपद्रवं । एष बुद्धो भगवानिह वनषण्डे प्रतिवसति सप्तहि असंख्येयकल्पेहि प्रादुर्भूतः बज्रजनहिताय बज्रजनसुखाय लोकानुकंपाय महतो जनकायस्यार्थाय हिताय सुखाय देवानां च

2. M °gavân sapta ° haṁ ekunamaṁcâ°. — 4¹. M °the kkalaṁ°. — 4². M tataḥ u° BM °trapusâ ca bha° BM °vâho âḍhyo mahâdhano mahâbhogo pu ° rivâro da° M °ṇâyathâto paṁcahi dhûraça° B °paṁcahi puraça°.

6. M °rddânâṁ puṅgalâ° B °puṁgalâ° M °ye nakshetriyena jâ° B °kshatriyena jâ° BM °ke te°. — 7. B °jâtaṁ kî° BM °rttinâme ° nti sa°. — 8. M °purato yâna ° vâhati | B °vâhati ya°. — 9. B °rge kiñcid bhavâ bhavati | siṁ ° ṇḍakabhayaṁ vâ hasti ° caurabhayaṁ vâ | tatra° M °cchanti | tato te° BM °titi | tathâ° M °saṁrahitvâ caturdiçaṁ saṁpra°.

12. M °prâptâḥ atra°. — 13. B atra ḍapu° M °pusabhallikâyânaṁ ca° B °llikâyânaṁ ca vâṇijâṇâṁ pû° BM °devabhûte tahiṁ° M °ṛiddhi nigṛihî° B °çakno gantuṁ te° M °knoti gantuṁ te°. — 15. B °bhitâto | tatra° M °tra sannaddhâḥ te° B °ddhâ te°.

16. M teshâṁ te de ° sârohito antarikshâga° B °hito antarikshâgato gho ° yetsuḥ ça° M °yetsuḥ ça° BM °vayetsuḥ mâ°. — 17¹. BM °ṇijânti(B °nti |) na vâ iti na vâ u°. — 17². M esho bu ° vanakhaṇde° BM °saptehi a° M °khyehi kalpe ° rbhûto ba ° to janakasyârthâ ° ekunapaṁcâ° BM °çaddi(M °çadi)vasam anâhârasya taṁ a°.

मनुष्याणां च तस्याद्य सप्तसप्ताहं एकूनपंचाशद्दिवसा अनाहारस्य । तमाहारेण प्रतिमानेथ ततो वः अप्रमेयं कुशलमूलं भविष्यति ॥ तेहि दानि चपुषभल्लिकेहि वाणिजेहि तानं देवतानां वचनं श्रुत्वा मधुसर्पिसंयुक्तं तर्पणं गृहीतं । ते देवता तेषां वाणिजकानां पुरतो गच्छन्ति । इतो आगच्छथ ॥ ते दानि वाणिजा तेहि देवतेहि भगवतो सकाशमुपनीता ॥ ते तं मधुतर्पणं गृह्य भगवन्तमुपसंक्रान्ता । इमं भगवन्मधुतर्पणं परिभुंजतु अस्माकमनुग्रहार्थं ॥ अथ खलु भगवतो एतदभूषि ॥ किं नु खलु पुरिमका सम्यक्संबुद्धा भाजनप्रतिग्राहका उताहो पाणिप्रतिग्राहका भाजनप्रतिग्राहका सम्यक्संबुद्धा ति ॥ सह चित्तोत्पादेनैव भगवतः चत्वारि महालोकपाला चत्वारि सुवर्णपात्राण्यादाय भगवन्तमुपसंक्रान्ता रतनपात्रा ति कृत्वा न प्रव्रजितसारूप्यानि भगवां न प्रतिगृह्णाति ॥ ते दानि रूप्यामयानि पात्राण्यादाय भगवन्तमुपसंक्रान्ता । तानपि भगवां रतनपात्राणीति कृत्वा न प्रतिगृह्णाति ॥ एवं मुक्तामयानि वैडूर्यामयानि स्फटिकमयानि मुसारगल्वमयानि लोहितिकामयानि तानपि भगवां रत्नपात्राणीति कृत्वा न प्रव्रजितसारूप्याणीति कृत्वा न प्रतिगृह्णाति ॥ ते दानि चत्वारो शैलपात्राणि आदाय भगवन्तमुपसंक्रान्ता ॥ अथ खलु भगवतः एतदभूषि । यदहमेकस्य लोकपालस्य पात्रं प्रतिगृह्णीष्यामि चयाणां भविष्यति चित्तस्यान्यथात्वं ॥ भगवता सर्वेषां चतुर्णां लोकपालानां चत्वारि पात्राणि प्रतिगृह्य अंगुष्ठेन आक्रान्ता एकपात्रो च अधिष्ठितो । ते दानि चत्वारो पात्रा एकं पात्रं सं[359b]जाता सर्वेषां चतुर्णां पात्राणां चत्वारि पात्रकोटीनि दृश्यन्ति । तत्र भगवता चपुसभल्लिकानां वाणिजानां मधुतर्पणं परिभुक्तं ॥

1. B tam anâbhâ° M °mânetha ‖ tato vo apra° B °meyaṁ aku° M °çalamulaṁ°. — 2. B °ni ḍapushe bha° M °trashusha° BM °devânaṁ va° B °hitaṁ te°. — 4¹. B °cchatha te°. — 4². BM °vâṇijâ(B °jâṁ) tehi devantebi bha° B °nitâ te°. — 5. M caitaṁ ma° B °krânto | .

6¹. B °smâkaṁm a°. — 7. BM °rimakâ saṁmyaksaṁbuddhâ bhâ(M °bhâṁ)janapratigrâhakâ(M °hatâ) u ° ṇipratigrâhato bhâ(B °hakâ bho)janapratigrâhakâ saṁmyaksaṁbuddhâ(M °ddho) ti saha°. — 8. B °tpâdo deva(M °vaṁ) bhagavataḥ(M °vato) catvâri mahâ° B °pâlo catvâri su ° saṁkrâṁtaḥ ra° M °ntâ ratnapâtrâṇi kṛitvâ ta pravra° B °trâ hi kṛi° BM °gṛihnâti | . — 10. B °krântân api°.

11¹. B napi bha° M °gavân ratnapâ° B °trâṇi ti kṛi° BM °gṛihnâti | . — 12. B °ryamayâni sphâṭi ° sâlagalva° M °sâgalva ° bhagavân ratna° BM °gṛihnâti ‖ . — 14. M ta dâni°. — 15¹. M °gavato e°. — 15². B °ham etasya lo°.

16. M °ṇi pratipratigṛihitvâ° B °gṛihnitvâ ° gushṭena akrâ° M °gushṭena aprakrâ°. — 18. B °ro pâtri e° M °ro pâtro ekapâtraṁ° BM °jâtaṁ sarve°. — 19. BM °bhuktaṁ bha°.

भगवां दानि चपुसभल्लिकानां वाणिजानां मधुतर्पणं पीत्वा प्रत्ययप्रणीतवर्णगन्धरसोपेतं दक्षिणामादिशति ॥

अनेकाकारसंपन्नं तर्पणन्ति प्रवुच्चति ।
वर्णेन चैव संपन्नं गन्धेन च रसेन च ॥
प्रत्ययं च प्रणीतं च एषणीयं च कल्पियं ।
तर्पणं प्रथमं शास्तु अदेन्सुः चपुसभल्लिया ॥
मधुसर्पिसंयुक्तं तं पिबे च पुरुषोत्तमः ।
तेहि संतर्पितो वीरो प्रतिसंलानउत्थितो ।
तर्पये धर्मवृष्टीये देवगन्धर्वमानुषां ॥
दिशे सोवत्थिकं दिव्यं मंगल्यं चार्थसाधकं ।
यं श्रुत्वा सुमना सर्वे सर्वार्था साधयिष्यति ॥
स्वस्ति वो द्विपदे भोतु स्वस्ति वो स्तु चतुष्पदे ।
स्वस्त्यस्तु व्रजतां मार्गे स्वस्ति प्रत्यागतेषु च ॥
स्वस्ति रात्रौ दिवा स्वस्ति स्वस्ति मध्यंदिने स्थिते ।
सर्वत्र स्वस्ति वो भोतु मा च पापं समागमत् ॥
श्रिरी वो दक्षिणे स्कन्धे श्रिरी वामे प्रतिष्ठिता ।
श्रिरी वो अंगमंगेषु मालेव सुप्रतिष्ठिता ॥
भद्रं वो भद्रश्रिरी वो वाणिजा भद्रमस्तु वो ।
येन केनचित्कार्येण गच्छथ पुरिमां दिशां ॥
नक्षत्राणि वो पालेन्तु ये तां दिशमधिष्ठिता ।
कृत्तिका रोहिणी चैव मृगार्द्रा च पुनर्वसु ॥
पुष्यं च वरनक्षत्रं अश्लेषा भोति सप्तमा ॥

1. M °gavân dâni tra ° tyagrâpaṇi° B °rṇṇagaṁdhâra° M °rṇṇagandhâra° B °diçanti | . — 3. M anekakâra ° vucyati | B °ccati va°. — 4. M °caivaṁ saṁ ° ndhena va ra° B °sena ca pra°. — 5. M °lpitaṁ | .

6. BM °adetsuḥ tatra trapusa(M °sha)bhalliyâ(M °llikâ) | . — 7. M °be purushottamaṁ | . — 8. BM te ca saṁ° M °tarppato vîraḥ pratisaṁsina u°. — 9. B °vrishiye de°. — 10. BM diçâṁ so° M °tthitaṁ di° BM °sâdhikaṁ | .

11. M °shyatha | . — 12. B °bhontu sva vo stu° M °bhontu svasti bhontu catupade | . — 14. M °trau svasti divâ°. — 15. M °bhontu mâ ca°.

16. BM çiri yo da ° ndhe çiri vâ ° B °tisthitâṁ | M °tisthitâ | . — 17. M °tisthitâ | B °tishṭitâ | . — 18. M °çiri vâṇi° B °çirî vâ vâṇi°. — 20. B °diça dhi°.

21. M °caivaṁ mṛigaçirodrâ ca pu° B °gâdrâ ca pu°. — 22. B °traṁ ca açlesho bhonti sa° M °bhontu saptamaḥ | .

IMPRIMERIE NATIONALE.

इत्येते सप्त नक्षत्रा लोकपाला यशस्विनः ।
आदिष्टा पुरिमे भागे एतेषां पुरिमा दिशा ॥
एते वो अधिपालेन्तु भूमीये भवनेन च ।
खेमा च वो दिशा भोन्तु मा च वो पापमागमे ।
लब्धार्था च निवर्तेथ तेहि नक्षत्रेहि रक्षिता ॥
पुरस्थिमे दिशोभागे अष्ट देवकुमारिका ।
नन्दोत्तरा नन्दिसेना नन्दिनी नन्दिरक्षिता ॥
जयन्ती विजयन्ती च सिद्धार्था अपराजिता ।
तेषामधिपती राजा धृतराष्ट्रो ति नामतः ॥
गंधर्वाधिपती राजा देवेहि स च रक्षितः ।
सो पि वो अभिपालेतु भूमीये भवनेन च ॥
खेमा च वो दिशो भोन्तु मा च वो पापमागमी ।
लब्धार्था च निवर्तेथ सर्वदेवेहि रक्षिता ॥
पुरिमस्सिं दिशोभागे चापलं व नाम चेतियं ।
नित्यं ज्वलति तेजेन नित्यं सत्योपयाचनं ।
सो पि वो अभिपालेतु भूमीये भवनेन च ॥
[360a] खेमा च वो दिशो भोन्तु मा च वो पापमागमी ।
लब्धार्था च निवर्तेथ सर्वचेतियसुरक्षिता ॥
येन केनचिदर्थेन गच्छथ दक्षिणां दिशं ।
नक्षत्राण्यभिपालेन्तु ये तां दिशामधिष्ठिता ॥
मघा चोभे च फाल्गुन्यौ हस्ता चित्रा च पंचमा ।

1. B °pâlo ya°. — 2. B adi° M adishṭo purime° BM °diçâm̃ | . — 4. BM kshemâ ca sadi°.

6. B °rikâm̃ | . — 7. B nam̃durânandise° M mandurânandinandisenânandivarasala-kshitâ | . — 8. B *omet cette ligne.* M nandirânandivarddhitâ ca siddhâ °jitâ | tâ pi ca adhipâlentu bhumiye bhavanena ca | kshemâ ca vo diço bhontu mâ gamo pâpam âgami | labdhâthâ ca nivarttetha devakanyâhi rakshitâ | te° (*l.* 9). — 9. M °dhipati râjâ dhṛita-râshṭreti° B °dhṛitaraâshṭreṇa nâ°. — 10. M gandharvâdhipati râjâ devehi ca rakshitâ | B °hi sa ca rakshataḥ | .

11. BM °pi to a°. — 12. B kshamâ ca vo di° M °gami ‖ . — 13. BM °sarve de° kshitam̃ | . — 14. M purimesmim̃° B °diçâbhoge câpâlam̃° M °ge pâlam̃ ° cetiye | . — 15. M °jvarati° BM °nityâ satyo(B °sasyo)payâ°.

16. BM °leti bhûmî(B °bhûri)ye°. — 17. B kshmâ ca vo pâ° M °gami | B °mi | la°. — 18. M °rthâya ni° BM °varttatha°. — 19. BM °kshiṇâ di°. — 20. M °ntu etâm̃ dim adhi°.

21. B °ghâ câbhe° M °ghâ vobhe ca phârgunyau°.

स्वाती चैव विशाखा च एतेषां दक्षिणा दिशा ॥
इत्येते सप्त नक्षत्रा लोकपाला यशस्विनः ।
आदिष्टा दक्षिणे भागे एतेषां दक्षिणा दिशा ॥
ते पि वो अभिपालेन्तु भूमीये भवनेन च ।
खेमा च वो दिशा भोन्तु मा च वो पापमागमी ।
लब्धार्था च निवर्तेथ तेहि नक्षत्रेहि रक्षिता ॥
दक्षिणस्सिं दिशोभागे अष्ट देवकुमारियो ।
लक्ष्मीमतो श्रीमती यशोमती यशोधरा ॥
शुभेष्ठिता सुप्रभाता सुविशुद्धा सुव्याकृता ।
ता पि वो अभिपालेन्तु भूमीये भवनेन च ॥
खेमा च वो दिशा भोन्तु मा च वो पापमागमी ।
लब्धार्था च निवर्तेथ देवकन्याहि रक्षिता ॥
तासामधिपती राजा विरूढको ति नामतः ।
कुम्भाण्डाधिपती राजा यमेन सह रक्षतु ॥
खेमा च वो दिशो भोन्तु मा च वो पापमागमी ।
लब्धार्था च निवर्तेथ कुम्भाण्डेहि सुरक्षिता ॥
दक्षिणस्सिं दिशोभागे अभिपश्यं नाम चेतियं ।
नित्यं ज्वलति तेजेन नित्यं सत्योपयाचनं ॥
सो पि वो अभिपालेतु भूमीये भवनेन च ।
खेमा च वो दिशा भोन्तु मा च वो पापमागमी ।
लब्धार्था च निवर्तेथ चेतियेन सुरक्षिता ॥
येन केनचिदर्थेन गच्छथ पश्चिमां दिशं ।

1. M °caivam̃ vi° BM °kshiṇâm̃ diçâm̃ | . — 3. B °diçâm̃ ‖ . — 4. M te pi ca a°. — 5. M °ntu mâ ga vo pâ°.

6. B labdhâ cârthâ° M °rthâ va ni°. — 7. BM °kshiṇesmim̃° M °kumârikâ | B °riye | . — 8. B lakshmipati çirimati yaçâmatvâ yaçodha° M lakshmipati çirimatâ yaçâmatî yaçodha°. — 9. B sudrasthitâ supra° M çubhesthitâ sapra ° kṛitâḥ | . — 10. M tâm̃ pi vo abhipâsentu°.

11. B °bhonti mâ ca°. — 12. M °devakaam̃nyâ°. — 13. M °virudha ° mata | . — 14. M kubhâṇḍâdhipatiḥ râjâ° B °mena sanena ca | . — 15. M so pi vâ adhipâlentu bhûmiye bhavanena ca | kshe° B °bhonti mâ°.

16. M °rthâya ni°. — 17. BM °kshiṇesmim̃° M °çyam̃ti cetiya | . — 18. M °jvarati tejena nityo sa° BM °tyopajâcano | . — 19. BM °pâlentu bhû°.

21. B °cetiye su° M °tiye ca su° B °kshitâ ye°. — 22. B ye kenaci° M ye keci yenad arthe° BM °çcimâ diçam̃ | .

नक्षत्रा वो भिपालेन्तु ये तां दिशमधिष्ठिता ॥
अनुराधा च ज्येष्ठा च मूलश्च दृढवीर्यवान् ।
उभे आषाढे भिजिच्च श्रवणा भवति सप्तमी ॥
ते पि वो अभिपालेन्तु भूमीये भवनेन च ।
खेमा च वो दिशा भोन्तु मा च वो पापमागमी ।
लब्धार्था च निवर्तेथ तेहि नक्षत्रेहि रक्षिता ॥
पश्चिमस्मिं दिशोभागे अष्टौ देवकुमारियो ।
अलंबुषा मिश्र[360b]केशी अरिष्टा सुप्रभायका ॥
. . . . . कृष्णा शुक्रा च द्रौपदी ।
ता पि वो अभिपालेन्तु आरोग्येन शिवेन च ॥
खेमा च वो दिशा भोन्तु मा च वो पापमागमी ।
लब्धार्था च निवर्तेथ देवकन्याहि रक्षिता ॥
तासामधिपती राजा विरूपाक्षो ति नामतः ।
स वो नागाधिपो राजा वरुणेन सह रक्षतु ॥
सो पि वो अभिपालेतु भूमीये भवनेन च ।
खेमा च वो दिशा भोन्तु मा च वो पापमागमी ।
लब्धार्था च निवर्तेथ सर्वनागेहि रक्षिता ॥
पश्चिमस्मिं दिशोभागे अस्तो नामेन पर्वतो ।
आवर्तो चन्द्रसूर्याणां अस्तो अर्थं ददातु वो ॥
सो पि वो अभिपालेतु भूमीये भवनेन च ॥
खेमा च वो दिशा भोन्तु मा च वो पापमागमी ।
लब्धार्था च निवर्तेथ सर्वे अस्तेन रक्षिता ॥
येन केनचिदर्थेन गच्छथ उत्तरां दिशां ।

1. B °dhishṭitâ ‖ M °shṭhitâḥ | . — 3. M °âkhâḍhe abhikshicca çravaṇe bha° B °çravaṇo bha° M °ptami ‖ . — 5. M °diço bho°.

7. B pacchimasmiṁ diçâbhâge ashṭaṁ de° M paççimesmiṁ ° ashṭa de ° riyaṁ | B °riye | . — 8. BM alaṁvarshâ mi° M °rishṭo suprabhâsvaraḥ | . — 9. BM ekâna(B °naṁ) vâtavamikâ kṛi° M °çuklamadopati | B °çukrama opati | . — 10. B °rogena çi° M °rogyaṁna çi°.

12. M °bdhârthâṁ ya ni ° devakaṁnyâ° B °kshikâ | . — 13. M °virupâksho°. — 14. M sarvanâgâ° B sarvarâjâdhipo nâgâ varu°. — 15. M °vo adhipâ° BM °lentu bhu°.

16. M °gami | . — 17. M °rthâya ni° B °sarvaṁnâ°. — 18. M paççimesmiṁ° B °diçâbhâ° M °ashṭanâme°. — 19. M °ndrasuryyânâṁ anto a° B °ṇâṁ anto arthaṁ dadâ bhuvo | M °dadatu me | . — 20. M °adhipâ° BM °lentu bhû°.

22. M °rthâya ni ° kshitâḥ | . — 23. BM ye kenaci ° ttarâ diçâṁ(M °çaṁ) | .

नक्षत्रा वो भिपालेन्तु ये तां दिशमधिष्ठिता ॥
धनिष्ठा शतभिषा चैव उभौ प्रोष्ठपदा पि च ।
रेवत्यश्विनी चैव भरणी भवति सप्तमी ॥
ता पि वो अनुपालेन्तु भूमीये भवनेन च ।
खेमा च वो दिशो भोन्तु मा च वो पापमागमी ।
लब्धार्थाश्च निवर्तेथ तेहि नक्षत्रेहि रक्षिता ॥
उत्तरस्मिं दिशोभागे अष्टौ देवकुमारियो ।
इला देवी सुरा देवी पृथिवी पदुमावती ॥
आशा श्रद्धा हिरी च श्री. . . . . समागता ।
ता पि वो अभिपालेन्तु भूमीये भवनेन च ॥
खेमा च वो दिशा भोन्तु मा च वो पापमागमी ।
लब्धार्थाश्च निवर्तेथ देवकन्याहि रक्षिता ॥
तासामधिपती राजा कुवेर इति नामतः ।
सर्वयक्षाधिपो राजा राक्षसेहि सह रक्षतु ॥
सो पि वो अभिपालेतु भूमीये भवनेन च ।
खेमा च वो दिशा भोन्तु मा च वो पापमागमी ।
लब्धार्थाश्च निवर्तेथ यक्षराक्षसरक्षिता ॥
उत्तरस्मिं दिशोभागे कैलासो नाम पर्वतः ।
आवासो यक्षसंघानां राक्षसानां निवेशनं ॥
सो पि वो अभिपालेतु भूमीये भवनेन च ।
खेमा च वो दिशा भोन्तु मा च वो पापमागमी ।
लब्धार्थाश्च निवर्तेथ यक्षराक्षसरक्षिताः ॥
अष्टाविंशति नक्षत्रा सप्तसप्त चतुर्दिशं ।

1. B °dhishṭitâ | . — 2. M dhanesha ça° B dhanishâ ça° BM °proshṭapa° B °pi câ | . 3. BM °thâçvajâ caiva bha(B °caiva ta)runi° M °ptamâ ‖ . — 4. M °vo adhipâ°. — 5. BM °bhonti mâ° M °gami | .

6. M °rthâ ca ni ° kshitâḥ | . — 7. M uttaresmiṁ° BM °ashṭade ° riye | . — 8. B hirîṁ devî su° M hirî devî su ° mâvati ‖ . — 9. M âsâ çârddhâ ahiriva çîtâm api samâgato | B °hirî çirî tâ pi°. — 10. M mâ ca vo a ° bhûmiye°.

11. M °gami | . — 12. M °rthâ ca ni ° devakaṁnyâ°. — 14. M °sihi sarakshitâ ‖ . 15. BM °pâlentu bhû°.

16. M °diço bho°. — 17. M °rthâ ca ni ° kshitâḥ | . — 18. M uttaresmiṁ° B °diçâbhâ° BM °kailâço nâ°. — 20. M °pâlentu bhû°.

22. B labdhâç cârthâ ni° M °kshitâ | . — 23. B ashṭaviṁ° M °trâ ca sapta sa°

सह चन्द्रमसूर्येहि त्रिंशद्भोन्ति अनून[361a]कं ॥
द्वात्रिंशद्देवकन्यावो अष्ट अष्ट चतुर्दिशं ।
चत्वारश्च महाराजा लोकपाला यशस्विनः ।
प्रज्वलमानवर्णेन रक्षन्ति ते चतुर्दिशं ॥
अष्ट श्रमणा ब्राह्मणा अष्ट जनपदेषु चचिया ।
अष्ट सहस्रका देवा सदा रक्षां करोन्तु वः ॥

तेषां दानि भगवता त्रीणि शरणगमनानि दिन्नानि । गच्छथ बुद्धशरणं गच्छथ धर्मशरणं गच्छथ अनागतं च भगवतो श्रावकसंघशरणं ॥ ते दानि बुद्धशरणं गता धर्मशरणं गता संघशरणं गता ॥ ते दानि आहन्सुः । वयं भगवं वाणिजका देशदेशानि च राज्यानि च अखाम । साधु मं भगवां कंचिद्देय धातुं यं वयं पूजयेम ॥ भगवता दानि तेषां शीर्षातो पाणिना केशानि ओतारित्वा दिन्नानि इमं केशस्तूपं कारयेथ नखानि च ओतारित्वा दिन्नानि इमं नखस्तूपं कारापेथ शिला च आगमिष्यन्ति तां च शिलां प्रतिष्ठापेथ ॥ तेहि दानि यत्र केशस्थाली नाम अधिस्थानो तहिं केशस्तूपं कारापितं । वालुचो नाम नगरं तहिं नखस्तूपं कारापितं । शिलुचं नामाधिष्ठानं तत्रापि शिला प्रतिष्ठापिता सा भगवता ऋद्धीये पाणिना चिन्ना ॥

भगवता दानि सप्तसप्ताहेहि एकूनपंचाशद्दिवसानि निराहारेण चपुषभल्लि-

1. M °masuryye ° bhoti anunakaṁ | . — 2. M °devakaṁnyâ vâ ashṭa a°. — 3. M °pâlo ya°. — 4. M °jvalanmânâ ° nti ca caturddiçaṁ | B °nti catuçaṁ | . — 5. BM purima(B °makâṁ) diçâṁ dhṛitarâshṭro paccimâṁ(M °çime ca) virupâksho(M °kshaḥ) dakshiṇâṁ ca virûḍhako kuvero u(M °ro co)ttarâṁ(B °râ) diçaṁ | ashṭa çrama(M °çrava)ṇâ ashṭa brâ° M °deshu ca | kshatriyo a° B °shu kshetriyâ | .

6. B °dâ rakshâ karantu° M °ntu vo | . — 7¹. M °dinâni | B °nnâni ga°. — 7². B gacchatha | buddhaṁ çaraṇaṁ gacchatha dharmaçaraṇaṁ gacchatha | anâ° M °dharmmaçaraṇaṁ gacchatha saṁghaçaraṇaṁ anâ° BM °bhagavatâ çrâ°. — 8. BM °buddhaçaraṇaṁ gatâ saṁgha°. — 9¹. M °hatsuḥ ‖ . — 9². B °bhagavâṁ vâ° M °bhagavan vânijakâ deçedeçâ° — 10. M °gavân kiṁci° B °vâṁ kiṁci° BM °d darçanahetu(M °heto) yaṁ vayaṁ pûje(B °yujaye)ma | .

11. BM ° pâṇi(M °ni)nâ keçâni otâritvâ dinnâni | imaṁ(M °nnâvi idaṁ) ke ° rayetha| na ° nnâni | i° M °kârâpetha çiro va âgamishyaṁti tâṁ° B °tâṁ ca çilâ pra°. — 13. B °dâni keça° M °dâni keçasthâri nâ ° dhisthânâto tahiṁ ° paṁ kârayetha kârâpitaṁ | B °taṁ çi°. — 14. *Omis par* B. M ° kâropitaṁ ‖ . — 15. M çilujvaṁ nâmâdhishṭhitaṁ tatrâ° B çilahvaṁ nâmâ ° naṁ | tatrâ° M °shṭhâpitâ so bha ° ṛiddhi pâ°.

17. M atha khalu bhagavân dâ° B bhagavâṁ dâ° M °ptâheti ekunapaṁ ° shabhallikânâṁ vâ ° rppaṇaṁ tilaṁ tena bha° B °rpaṇam pitena bha° BM °gavato tathâ abhishanditâ(M °ndinâ) | .

कानां वाणिजकानां मधुतर्पणं पीतं पीतेन भगवतो ते च अभिष्यन्दिता ॥ ततो शक्रेण देवानामिन्द्रेण भगवतो हरीतकी उपनामिता । धातूनां मुखं भविष्यति ॥ भगवता दानि सा हरीतकी परिभुक्ता तं च हरीतकीवृन्तकं भगवता तत्रैवोद्देशे रोपितं सा च तं दिवसमेव जातावशाखप्रशाखा महान्तं हरीतकीवृक्षं पुष्पफलोपेतं संवृत्तं । इमं भगवतो प्रथमं ऋद्धीवृक्षं । या च ततो वृक्षातो हरीतकीयो तानि अद्य चेतकीया हरीतकीप्रबाला ति बुध्यन्ति ॥

ततो भगवता उरुविल्वायां षड्वर्षाणि दुष्करं तपं चीर्णं ॥ तदा उरुविल्वायां सेनापतिग्रामातो नगरावलंबिकाये शाणपांसुकूलं भगवतो दुष्करचारिकां चरन्तस्य प्रसन्नचित्ताय उपनामितं । यदा भगवं परिपूर्णसंकल्पो [361b] भवेसि तदा इमं शाणपांसुकूलमनुग्रहार्थाय परिभुंजेसि ॥ भगवतो तूष्णींभावेनाधिवासनां विदित्वा तुष्टा आत्तमवा पांसुकूलं वृक्षशाखाये ओलंबित्वा भगवतः पादौ शिरसा वन्दित्वा त्रिष्कृत्वं प्रदक्षिणीकृत्वा प्रक्रमि ॥ सा दानि नचिरस्यैव कालगता भगवतो सन्तिका प्रसन्नचित्ता तं पांसुकूलदानं समनुस्मरन्ती समनन्तरकालगता चयस्त्रिंशे देवनिकाये उपपन्ना अन्यतरस्य महर्द्धिकस्य महानुभावस्य देवपुत्रस्य विमान अप्सरसां शतसहस्रप्रवरा ॥ सा दानि अप्सरा समन्वाहरति । किं मया मनुष्यभूताये कुशलमूलं कृतं केवरूपा च दक्षिणा प्रतिष्ठापिता येनाहं चयस्त्रिंशे देवनिकाये उपपन्ना ॥ सा दानि समन्वाहरन्ती पश्यति उरुविल्वायां सेनापतिग्रामके गवा नाम नगरावलंबिका आसि दुःखिता । तं मया मरणकाले बोधिसत्वस्य दुष्करं चरन्तस्य प्रसन्नचित्ताये शाणपांसुकूलं दिन्नं तेनाहं कुशलमू-

1. M °gavatâ hari°. — 2. BM °nâṁ sukhaṁ°. — 3. M °ni sâ haritaki pa ° ktâ taṁ ca haritakidvepikaṁ bha° B °ktâ taṁ ca haritakirddhaṁgakaṁ | bha° M °traiva udde° BM °sam eva(M °vaṁ) jâtâveçâkhâ pra° M °khâ mahatâṁ hari ° pushpaṁ pha ° vṛitto | B °vṛitta | . — 5¹. M °ṛiddhivṛikshaṁ | B °kshaṁ yâ°. — 5². M tato vṛi° B yâ ca ye tato vṛi° M °to haritakiyo ° ceṭiyâ haritaki pravânâti buddhyanti ‖ B °pravânâti | buddhyanti ‖ .

7¹. B °uluvilvâ° M °paṁ tiṛṇṇaṁ ‖ . — 7². B °dâ uluvilvâ° M °garâṁbikâyenâ çayâṁsukulaṁ° B °bikâyo çâ° M °ttâye upa° B °ttâya unnâmitaṁ | . — 9. B °gavâṁ paripû° M °gavân paripûrṇṇakalpo° BM °vesi | ta° M °sukulâṁ anu ° bhuṁjasi | . — 10. B bhagavatâ tû° M bhagavatâ tûshṇîbhâ° BM °tushṭo â° B °ttamanâ yâṁsu° M °ttamanâ pâṇḍukulaṁ vṛi ° olaṁghayitvâ bha° B °olaṁyitvâ bha° M °nditvâ tribhṛityaṁ prada°.

12. M °bhagavatâ santi° B °ttâ teshâṁ sukuladâ° M °taṁ pâṇḍukulaṁ dâ ° smaranti | samananta° B °ntaro kâlagatâ | tra° M °upapannâḥ anya° B °nnâ | anya° M °vimâne apsa ° sraparivârâ ‖ . — 15. BM so dâni apsara samanvâharati(B °nti) kiṁ°.

16. M °çalamulaṁ ° rûpâ va dakshiṇiye pra° B °kshiṇâye pra° M °upapannâḥ | . — 17. M so dâni ° haranti paçya° B °uluvilvâ° M °ke çavo nâma naga° BM °valaṁbikâ | âsi (M °kâ âsit ‖) duḥ° B °tâ taṁ° M °khitân taṁ ma°. — 18. M °cittasya çâṇapaṁçu° laṁ dinnaṁ | te° B °pâṁsukulaṁ ° lena mânu° M °nushya cyavi ° upapann° 12°.

लेन मनुष्येषु च्यवित्वा इह त्रयस्त्रिंशे देवनिकाये उपपन्ना । न च मे तं देयधर्मं भगवतामद्यापि परिभुक्तं । यदिममेव देयधर्मं भगवाननुग्रहार्थं परिभुंजेया तत् मम महत्फलतरं भवेया ॥ सा दानि अप्सरशतसहस्रपरिवृता महता देवानुभावेन महता देवऋद्धीये त्रयस्त्रिंशभवनातो वृक्षशाखातो तं शाणपांसुकूलं गृह्य भगवन्तमुपसंक्रान्ता ॥ इमं मया भगवन्तं शाणपांसुकूलं मनुष्यभूताये भगवतो दुष्करं चरन्तस्य प्रसन्नचित्ताये दिन्नं यदा भगवं परिपूर्णसंकल्पो भवेसि ततो भगवन् ममानुग्रहार्थं परिभुंजेसि तेनाहं कुशलमूलेन मनुष्येषु च्यवित्वा त्रयस्त्रिंशेषु देवनिकायेषु उपपन्ना । साधु मं भगवां इमं शाणपांसुकूलं परिभुंजतु अनुकंपामुपादाय यथा मे महत्फलतरो भवेया ॥ देवा अन्तरीक्षगता भगवन्तमाहन्सुः ॥ मा भगवानिमं शाणपांशुकूलं परिगृह्णातु । वयं भगवतो दिव्यां विकल्पदूष्याणि दास्यामः ॥ भगवान्तेषां देवतानां विकल्पदूष्यप्रदानानि नाधिवास[362a]यति । तं गवाये नगरावलंबिकाये शाणपांशुकूलं प्रतिगृहीतं देवताशतसहस्रेहि च अन्तरीक्षातो चेलक्षेपाणि च भगवतः कृतानि हक्कारकिलिकिलानि च अकरेन्सुः ॥ चक्रवर्तिराज्यं परित्यक्तं किं नो पांशुकूलेषु चित्तं रमति ॥

भगवां दानि शाणपांशुकूलं धोवितुकामो । उदकेन कार्यं ॥ अथ खलु शक्रेण देवानामिन्द्रेण पाणीहि नदी खता अद्यापि च पाणिखाता नाम नदी वुच्चति ॥ शिलापट्टेन कार्यं यत्र तं शाणपांशुकूलं धोविष्यति ॥ चतुर्हि महाराजेहि चत्वारि शिलापट्टा उपनामिता । भगवता एकत्र शिलापट्टे तं शाणपांशुकूलं धौतं ॥

1. M °vatâm ayâ pi° BM °ktaṁ ya°. — 2. BM °dimevaṁ de° B °rmaṁ ‖ bha° M °jeyâ taṁ mama maha° BM °tphalaṁtaraṁ bhâveyâ | . — 3. B so dâ° BM °vṛito mahatâ devânu° M °vena mahânto ṛi° B °devariddhi° BM °striṁçe bha° M °nâto âgatvâ tataḥ vṛi ° pâṁçukulaṁ° B °sukulaṁ° M °gavantaṁ upasaṁkrânto | . — 5. BM °ntaṁ çâṇapâṁsukûlaṁ mâ(M °pâṁçukulaṁ ma)nu° M °gavato duḥkaraṁ° BM °nnaṁ | yadâ bhagavâṁ pa(M °vân pa)ripû ° vesi | tato° B °gavâ ma° M °vân ma° B °ribhujesi | te° BM °lena mânu°.

8. BM sâdhû maṁ bha° M °gavân imaṁ çâ° B °çâṇaṁpâṁ° M °pâṁçukû° BM °bhuṁjâtu°. — 9. B °rikshe gatâ ‖ bha°. — 10¹. B °gavan emaṁ° M °gavân emaṁ çânapâṁçukulaṁ pratigṛihîtuṁ devatâçatasahasrehi pari° BM °gṛihnâtu | . — 10². BM °vikalpâṁ dushyâ°.

11. M °gavâṁ teshâṁ dâni de° BM °nâṁ kalpaṁ dushya°. — 12. B °çâṇaṁ pâṁ° M °çukulaṁ ° hituṁ de ° srehi cânta ° to caulâkshepâni ca bhaveyâ | kṛi° B °to calokshepâṇi ca bhaveyâ kṛi° BM °netsuḥ | . — 14. BM °varttirâ ° kiṁ vo pâṁçukule° M °shu vittaṁ°. — 15¹. M °gavân dâni sânapâṁçukulaṁ°. — 15². M pâṁçu uda°. — 15³. BM °ṇi(B °ṇi)hi nadi khanâ adyâpi ca pânikhâdâ nâma° M °vucyati çi°.

17¹. M °taṁ sânapâṁçukulaṁ° BM °ti ca°. — 17². B °lâpattaṁ u° M °lâpaṭṭa u° B °mitâ bha°. — 18. M °çânapâṁçukulaṁ°.

द्वितीये शिलापट्टे तं पांशुकूलं शोषितं ॥ तृतीयं शिलापट्टं भगवता चपुसभल्लिकानां शिलुचनामनिगम आवासितानां तत्र ऋद्धीये पुरतो उत्क्षिप्तं ॥ तेहि तं शिलापट्टं तत्रैव चेतिये प्रतिष्ठापितं । अद्यापि गन्धारराज्ये अधिष्ठानं शिलानामेन ज्ञायति ॥ चतुर्थे शिलापट्टे भगवता निषीदित्वा तं शाणपांशुकूलं सीवितं । यदपि तत्र शिलापट्टं भगवतो अनुसीवननामापद्ये ॥ सर्वे चत्वारो शिलापट्टा भगवता परिभुक्ता तानि च जम्बुद्वीपे सदेवमानुषस्य लोकस्य चेतियभूता ॥

भगवां दानि तं शाणपांशुकूलं धोवित्वा सीवित्वा च पाणिखातनदीस्नायको ओकस्नो । स्नायित्वा भगवां पाणिखाततो नदीतो उत्तरिष्यतीति अकिलन्तकाया बुद्धा भगवन्तो अकिलन्तचित्ता तहिं तीरे ककुभो नाम वृक्षो ओशाखप्रशाखो प्रासादिको दर्शनीयो यंनामो च वृक्षो तंनामा च वृक्षस्य देवता ककुभो नाम देवपुत्रो प्रतिवसति । सो देवपुत्रो भगवता ततो नदीतो उत्तरन्तेन आभाष्टो ॥ आहर ककुभ हस्तं ॥ वरविमलकुण्डलधरेण ककुभेन देवपुत्रेण भगवतो बाहा प्रणामिता । भगवां ककुभस्य देवपुत्रस्य बाहां गृह्य पाणिखाततो नदीतो उत्तीर्णो समं च भगवता ततो ककुभस्य देवपुत्रस्य बाहातो हस्तं स्वकं अपनीतं तत्र च वृक्षशाखायां भगवतो पंचांगुलस्य करतलस्य पद्मं दृश्यति [362b]॥ (यं दानि अहं बोधिं आहतहस्तो च सुंदरो ककुभो नदीका च पाणिखाता शिला च देवेहि निक्षिप्ता ॥)

ततो भगवां अजपालन्यग्रोधं गतो ॥ भगवानजपालस्य न्यग्रोधमूले विहरन्तो

1¹. M °ye pi çi ° çukulaṁ° B °laṁ soshitaṁ | . — 1². B °tiye çilâpaṭṭe bhagavato trapusa° M °yaṁ pi çilâpaṭṭe bhagavato trapushabhalli° B °kshaṇâmani° M °tra riddhi ° upakshiptaṁ ‖ . — 2. B °ttaṁ tatra taiva° BM °cetiyaṁ pra°. — 4. M °tvâ tâṁ sânapâṁçukulaṁ çobhitaṁ | B °vitaṁ ya°. — 5¹. BM yadyapi° BM °lâpaṭṭena bha° BM °anuçivanânâ(M °vanânâṁ)padye sa°. — 5². M °rve çilâpaṭṭâ catvâra bha° B °tvâra çilâpaṭṭo bhagavato pari°.

7. M °taṁ sânapâṁçukulaṁ gopitvâ çivitvâ ca pâṇishâtaṁ nadisnapako° B °çukulaṁ dhauvitvâ çivitvâ ca ° sto snâ°. — 8. M snâpitvâ° B °tvâ | bhagavâṁ pâṇikhidâto nadi° M °khâdâto nadi° B °ttarishya° BM °titi | akilantakâyâ° M °bhagavato akilantakacitto tahiṁ ° khapraçâkha prâ ° ca vṛikshâ taṁnâmo ca° B °rçaniyo ca vṛiksho taṁnâmo ca° BM °tâ kakubhe kakubho nâma de° B °ti so°.

11. M °uttiṛṇṇor âbhâ°. — 12¹. M âhaca kakubhas taṁ B °hastaṁ cala°. — 12². B calavi° bâhâṁ pra° M °bâhi praṇâmi | B °mitâ bha°. — 13. M bhagavân kaku ° hya pâṇishâdâto nadi ° tâ tataḥ kaku° BM °vṛikshâçâ° B °pañcakulasya kara° M °pañcapañcakulasya karatarasya pa ° B °çyati yaṁ dâ°. — 15. B ° bodhiṁ | â°. — 16. B °âha ca hasto ca suṁ° M °âha ca hastâ ca sundaro° BM °bho | nadi° M °kâ ra pâṇikhâdo çilo ca de°.

18¹. M °gavân ajapârasya nya° BM °to bha°. — 18². B °japâlapâlasya° BM °loka imâṁseti gaṁ°.

लोकं मीमांसेति ॥ गंभीरो अयं मम धर्मः अभिसंबुद्धो निपुणो सुखुमो दुरनुबोधो अतर्कावचरो पण्डितवेदनीयो सर्वलोकविप्रत्यनीको । आलयारामो खलु पुनरयं आलयरतो आलयसमुदितो आलयारामायां च प्रजायां आलयरतायां आलयसमुदितायां दुर्दृशमिमं स्थानं यदिदंहेतु इदंप्रत्ययः प्रतीत्यसमुत्पादः सर्वोपधिप्रतिनिःसर्गो पूर्वसंस्कारसमथधर्मोपच्छेदः तृष्णाक्षयो विगतरागो निरोधो निर्वाणं अहं च न परेषां देशयेयं परे खु मे न विभावयेन्सुः सो मे स्या विघातः ॥ यं नूनाहं एको अरण्यपर्वते तूष्णीभूतो विहरेयं । इमा च गाथावो भगवतो ताये वेलाये प्रतिभायेन्सुः ॥

प्रतिश्रोतगामिनं मार्गं गम्भीरं दुर्दृशं [मम] ।
न रागरक्ता द्रक्ष्यन्ति अलं दानि प्रकाशितुं ॥
कृच्छ्रेण मे अधिगतो अलं दानि प्रकाशितुं ।
अनुश्रोतं हि वुह्यन्ति कामेषु ग्रसिता नराः ॥

भगवां उरुविल्वायां विहरे नैरंजनायास्तीरे अजपालन्यग्रोधमूले अचिराभिसंबुद्धो ॥ अथ खलु भगवतो एकस्य रहोगतस्य प्रतिसंलीनस्य अयमेवरूपश्चेतसः परिवितर्को उदपादि ॥ अधिगतो यदयं मया धर्मो गम्भीरो निपुणो सूक्ष्मो दुरनुबोधो अतर्कितो अतर्कावचरो पण्डितवेदनीयो सर्वलोकविप्रत्यनीको अहं चे परेषां देशयेयं परे खु च न आजानेन्सु सो मे स्या परमं विघातं । यं नूनाहं

1. M gambhira ayaṁ dharma mamâbhisaṁbuddho purimasukhu° B °dho atakâva° M °rkâvacarâ paṇḍi ° yo sarve loke pra° B °loke pratyanîyo a°. — 2. BM alayorâ(M °yo nâ)mâ khalu punar ayaṁ âlayato âlaya(M °âtmacarato âra)samuditâ âlayârâmâyaṁ ca prajâyâṁ âlaya(B °yâṁ ârayara)tâyâṁ âlayasamuditâyâṁ du° M °sthânaṁ yam idaṁ hetuṁ imaṁ pratya ° tpâdo sarvo praṇidhiḥ pratiniḥ pûrva° B °dhi pratiniḥ pûrva° BM °ccheda tṛi° B °gatarogo° M °haṁ ca taṁ pareshâṁ° BM °yaṁ pareshu me na ° vayetsuḥ so me (M °ma) syâ vighâtaḥ(M °ghâto) | .

7¹. M °ṇyapavane tû° BM °reyâ i°. — 7². BM imâṁ ca gâthâ(M °thâṁ) ca bha° B °gavatâ tâye ve° BM °bhâshetsuḥ | . — 9. M °rgaṁ ṇastriraṁ du° B °dudṛiçaṁ na° M °çaṁ ca râ°. — 10. BM °tuṁ kṛi°.

12. M °çrotrehi vubyati kâ°. — 13. M atha bhagavân uru° BM °yâṁ hare nai° M °janâyâ tire ajapâlasya grodhamule ° buddhâ ‖ . — 14. BM °pratisaṁlayanasya ° m evarû(M °ru)pa cetasaḥ°. — 15. M °dhigataṁ yad a° BM °mbhiro nipuno çûkshmo duranu(B °rani)bodho atarkito(M °avitarko) atakâvacaro paṇḍi° M °lokavitarkaniyo a° BM °haṁ ca pare ° yaṁ pareshu(M °shu va)ca naṁ ajânetsu(M °tsuḥ) | so° M °syâ pareshu vacanaṁ vighâtaṁ B °ghâṭaṁ | .

17. M yan nunâ°.

एको अरण्यायतने तूष्णीं विहरेयं ॥ अथ खलु महाब्रह्मा भगवत इदमेवरूपं चेतसो परिवितर्कमाज्ञाय येन शक्रो देवानामिन्द्रो तेनोपसंक्रमित्वा शक्रं देवानामिन्द्रमेतदवोचत् ॥ एतन्मारिष कौशिक भगवता अल्पोत्सुकतायै चित्तं नमेति न धर्मचक्रप्रवर्तने । किं पुनर्वयं मारिष कौशिक येन भगवान्स्तेनोपसंक्रमित्वा भगवन्तं याचेम धर्मचक्रप्र[363ᵃ]वर्तनाय ॥ साधु मारिषेति शक्रो देवानामिन्द्रो महाब्रह्मणो प्रत्यश्रोषीत् ॥ अथ खलु महाब्रह्मा शक्रो देवानामिन्द्रो सुयामो देवपुत्रो सुनिर्मितो च देवपुत्रो वसवर्ती च देवपुत्रो चत्वारश्च महाराजानो इत्येते दश यक्षाधिपतयो दश यक्षमहत्तरका अनेकयक्षशतपरिवारा अतिक्रान्तायै रात्रीये केवलकल्पं न्यग्रोधमूलं वर्णेनोभासयित्वा येन भगवान्स्तेनोपसंक्रान्ता भगवतः पादौ शिरसा वन्दित्वा एकमन्ते अस्थान्सुः ॥ एकान्ते स्थितो महाब्रह्मा शक्रं देवानामिन्द्रमेतदवोचत् ॥ याच मारिष कौशिक भगवन्तं धर्मचक्रप्रवर्तनाय ॥

अथ खलु शक्रो देवानामिन्द्रो एकांसमुत्तरासंगं कृत्वा येन भगवांस्तेनोपसंक्रमित्वा भगवन्तं गाथाये अध्यभाषे ॥

उत्येहि विजितसंग्राम पूर्णभरो त्वं अनृण विचर लोके ।
चित्तं हि ते विशुद्धं यथ चन्द्रो पंचदशराचे ॥

अथ खलु भगवां तूष्णी अभूषि नाधिवासेति शक्रस्य देवानामिन्द्रस्य धर्मचक्रप्रवर्तने ॥ अथ खलु महाब्रह्मा शक्रं देवानामिन्द्रमेतदवोचत् ॥ न खलु मारिष कौशिक भगवन्तो अर्हन्तः सम्यक्संबुद्धा एवं याचीयन्ति धर्मचक्रप्रवर्तनाये न च पुनस्तथागता अर्हन्तः सम्यक्संबुद्धा एवं याचिता धर्मचक्रं प्रवर्तयन्ते ॥ एवमुक्ते शक्रो देवानामिन्द्रो महाब्रह्ममेतदवोचत् ॥ त्वं मारिष महाब्रह्म तेषां पुरिमकानां

1. M °hmâ bhagavato i° B °cetasâ pari° M °jñâpa yena çakro ° ndro tenâpasaṁ ° kraṁ devânâṁ indro e°. — 3. B eta mâ° M °meti ra dha°. — 4. B °gavâṁs te° M °saṁkrasitvâ°.

6. M °mo ca devaputro sunirmi ° jânâ i° M °dhipatayo daça yakshâ mahattarako | anekayakshaçatâparivâro ati° B °ttarakâ | anekayakshaçatâpari° BM °kevalaṁ kalpaṁ (B °lyaṁ) nyagrodhamû(M °mu)le varṇṇenâbhâ° M °saṁkrânto bhagavato pâ ° sthâsuḥ B °sthânsuḥ e°. — 10. BM °çakram indra°.

11. BM °cakraṁ pra°. — 12. B °kâṁçam u° M °kṛitvâ yena bhagavâns teno° B °mitvâ bhagavanta gâ° M °bhâsheṇa u°. — 14. M °grâmo pûrṇṇatyara atûṇo vi° B °rṇṇabhâra abhûṇo vi° BM °ke ci°. — 15. BM °ttaṁ ca te° BM °yathâ candro° M °râtra ‖ .

16. M °gavân tûshṇî ° dhivâsati ça°. — 17². BM °bhagavanto(M °vato) arhantaḥ saṁmyaksaṁbuddho evaṁ yâci° M °nâye | ye ca pu ° thâgato rhasamya° B °ntaḥ saṁmya° M °buddho e ° rmacakra pravarttante | B °rttante e°. — 19. B °brahmâm e°. — 20. BM tvaṁ mârisha mahâbrahmâ teshâṁ° M °kânâṁ saṁmya ° brahmaṁ yâvad bhaga° BM °rma(M °rmma)cakraṁ pra° M °nâya ‖ .

सम्यक्संबुद्धानां दर्शावी तेन हि मारिष महाब्रह्म याच भगवन्तं स्वयमेव धर्मचक्रप्रवर्तनाये ॥ अथ खलु महाब्रह्मा एकांसमुत्तरासंगं कृत्वा येन भगवां तेनांजलिं प्रणामयित्वा भगवन्तं गाथाये ध्यभाषे ॥

उत्येहि विजितसंग्राम पूर्णभरो त्वं अनृण विचर लोके ।
देशेहि सुगत धर्मं आज्ञातारो भविष्यन्ति ॥

अथ भगवां तूष्णी अभूषि ॥ अथ खलु महाब्रह्मा शक्रो देवानामिन्द्रो सुयामो च देवपुत्रो संतुषितो च देवपुत्रो निर्मितो च देवपुत्रो वशवर्ती च देवपुत्रो चत्वारो महाराजा अनेकयक्षशता अनेकयक्षशतपरिवारा भगवतो अनधिवासनां विदित्वा धर्मचक्रप्रवर्तनाय दुःखदौर्मनस्यजाता भगवतः पादौ शिरसा वन्दित्वा भगवंतं प्रदक्षि[363b]णीकृत्वा तत्रैवान्तरहायेन्सु ॥

एत्यमेतं श्रूयति ॥

भगवां उरुविल्वायां विहरति नद्या नैरंजनाया तीरे अजपालन्यग्रोधमूले अचिराभिसंबुद्धो ॥ अथ खलु महाब्रह्मा अतिक्रान्तवर्णो अतिक्रान्तायां रात्र्यां केवलकल्पं अजपालन्यग्रोधमूलं वर्णेनोभासयित्वा येन भगवांस्तेनोपसंक्रमित्वा भगवतः पादौ शिरसा वन्दित्वा भगवन्तं प्रदक्षिणीकृत्वा एकान्तस्थितो महाब्रह्मा भगवन्तं गाथाये अध्यभाषे ॥

उत्येहि विजितसंग्राम पूर्णभरो त्वं अनृण विचर लोके ।
देशेहि सुगत धर्मं आज्ञातारो भविष्यन्ति ॥

अथ खलु भगवान्महाब्रह्मं गाथाये प्रत्यभाषे ॥

प्रतिश्रोतगामिको मार्गो गम्भीरो दुर्दृशो [मम] ।
रागरक्ता न द्रक्ष्यन्ति अलं ब्रह्मे प्रकाशितुं ॥

2. M °ekâsam u° B °kâmçam u° M °sañga kṛitvâ yena bhagavâns tenâmjaliṁ kṛitvâ praṇâ° thâye adhya°. — 4. B °jisaṁ° BM °pûrṇṇa(M °rṇṇaṁ)bhâra ta anûna(M °anuçâsi) vica° M °loka da° B °ke de°. — 5. M daçehi°.

6¹. M °gavân tûshṇî°. — 6². M °ndro supâmâ ca devaputro saṁtushitâ ca devaputro nirmito ca devaputrâ vaça ° hârâjânâ anekayakshaçatâ anekayakshaçataparivâro bhagavato adhivâ° B °rivâro bhaga° M °jâtâ bhagavato pâdau ° bhagavantaṁ pra° M °trairvântarhâyasi ‖ B °hâyasi ‖ .

11. BM °çruyati bha°. — 12. M °gavân uru ° ti | nadyâṁ nai ° yâs tire ° lasya nya°. — 13. B °kevalaṁ kalpaṁ° M °kevalaṁ aja ° mûlâṁ varṇṇenâbhâsayitvâ yena bhagavân tenopa ° mitvâ bhagavatâ pâ ° ekânte asthâd ekântasthi°.

17. B °rṇṇabhâre tâ anûṇo vica° M °rṇṇabhârato aruṇo vica° BM °ke de°. — 18. M °dharma âjñâtârâ bha°. — 19. B °hâbrâhma gâ° M °brahmâ gâ°. — 20. BM °rdriço anurâga°.

21. M °rakto na dra° B °ktâ na ukshya°

अथ खलु महाब्रह्मा भगवतरजपालस्य न्यग्रोधमूले प्रतिक्षेपं विदित्वा धर्मचक्रप्रवर्तनाये दुःखदौर्मनस्यजातो भगवतः पादौ शिरसा वन्दित्वा भगवन्तं प्रदक्षिणीकृत्वा तत्रैवान्तरहाये ॥

एत्यमेतं श्रूयति ॥

भगवां उरुविल्वायां विहरति नद्या नैरंजनायास्तीरे अजपालस्य न्यग्रोधमूले अचिराभिसंबुद्धो ॥ तेन खलु पुनः समयेन मागधकानां ब्राह्मणगृहपतिकानां इमानि एवरूपाणि पापकानि अकुशलानि दृष्टिगतान्युत्पन्नानि ॥ वातो न वायेया सरितो न स्यन्दिन्सुः गर्भिणीयो न प्रजायेन्सुः पक्षिणो न वीतिपतन्ति अग्निर्न ज्वलेया चन्द्रमसूर्याणां उन्नमना न प्रज्ञायेन्सुः अंधकारघट्टितं लोकसंनिवेशं भवेय ॥ अथ खलु महाब्रह्मा मागधकानां ब्राह्मणगृहपतिकानां इमान्येवरूपाणि पापकान्यकुशलानि दृष्टिगतानि उत्पन्नानि विदित्वा अतिक्रान्तवर्णो अतिक्रान्तायां रात्र्यां केवलकल्पं अजपालस्य न्यग्रोधमूलं वर्णेनोभासयित्वा येन भगवां तेनोपसंक्रमित्वा भगवतः पादौ शिरसा वन्दित्वा एकान्तस्थितो इमां गाथां प्रत्यभाषत् ॥

प्रादुरहोसि समलेहि चिन्तितो
धर्मो अशुद्धो मगधेषु पूर्वं ।
अपावृतं ते अमृतस्य द्वारं
शृणोन्तु धर्मं विमलानुबुद्धं ॥

अथ खलु भगवां महाब्रह्मणो याचनां विदित्वा सामं च प्रत्यात्मं बोधीये ज्ञा-

1. M °hmâ bhagavato aja ° ksheyaṁ vidi ° syajâtâ bhaga ° vântarhâyaḥ | B °ntarahâyo ‖ . — 4. M etthem e° BM °çruyati bha°. — 5. M °gavân uru° B °ti ‖ nadyâ° M °ti nadyâṁ nai° B °yâttire° BM °ddho te°.

6. BM °nnâni vâto°. — 7. BM °vâyeyâ | (M °yeyaṁ) sarito na syanditsuḥ(M °syaṁti a) garbhaṇi ° yetsuḥ pakshi° M °vithipata° BM °ndramasûryâṇâṁ u(M °suryyâṇâṁ u)dgamanaṁ na prajñâ(B °jñâpa)yetsuḥ aṁdhakâradyutayaṁ lo°. — 10. M °ny evarupâṇi° M °viditvâ atikrântamânushavarṇṇo° BM °kevalaṁ kalpam° M °pâlanyagrodhamule varṇṇenâbhâ° B °mûle varṇṇenâbhâ° M °yena bhagavân teno°.

15. B °durahe sa° M °ho samayehi cintito armo° BM °ddho masa(M °maça)theshu pûrvaṁ a°.

17. BM °vritam amri° M °çriṇvantu dharma vi° B °ṇonti dha° BM °malenânu° M °nubaddhaṁ ‖ . — 19. M °bhagavân mahâbrâhma° B °ṇo yâcanaṁ vidi° M °ditvâ somaṁ° BM °tyâyaṁ bo° B °nto adrâkshit | satvâ u° M °nto adrâkshit satva u° BM °hinâ(M °no) praṇitâṁ adrâkshit sa(M °t | sa)tvâ durnâ(M °rmanâ)kârâ du ° rviçodheyâ adrâkshit

नेन सर्वावन्तं लोक[364ª]मनुत्तरेण बुद्धचक्षुषाभिविलोकयन्तो अद्राक्षीत्सत्वा उच्चावचां हीनप्रणीतां अद्राक्षीत्सत्वा दुराकारा दुर्विनेया दुर्विशोधेया अद्राक्षीत्सत्वा स्वाकारां सुविनेयां सुविशोधेयां अद्राक्षीत्सत्वां उद्घटिताज्ञा विपंचिताज्ञानेया पदपरमां अद्राक्षीत्सत्वां तीक्ष्णेन्द्रियां मृदुन्द्रियां । सत्वानां त्रयो राशीयः सम्यत्कनियतं राशिं मिथ्यात्वनियतं राशिं अनियतं राशिं ॥ सद्यथापि नाम चक्षुष्मां पुरुषो पद्मिनीतीरे स्थित्वा अल्पकिशरेण पश्येत उत्पलानि पद्मानि वा पुण्डरीका वा अन्यानि अन्तोदकानि अन्यानि समोदकानि अन्यानि उदकातो अभ्युद्गतानि एवमेव भगवां अनुत्तरेण बुद्धचक्षुषा सर्वावन्तं लोकमभिविलोकयन्तो अद्राक्षीत् ॥ अथ खलु भगवतो एतदभूषि ॥ देशेयं वाहं धर्मं न वा देशेयं मिथ्यात्वनियतो राशि अभव्यो एतं धर्मं आजानितुं । देशेयं वाहं न वा देशेयं सम्यत्कनियतो राशि आज्ञास्यत्येव एतं यं देशेयं । अनियतो राशि सचास्य धर्मं देशेयं आज्ञास्यति नो चे देशेयं न जानिष्यति ॥ अथ खलु भगवां अनियतं राशिमारभ्य मागधानां च ब्राह्मणगृहपतिकानां इत्येवंरूपाणि पापान्यकुशलानि दृष्टीगतानि उत्पन्नानि विदित्वा महाब्रह्मणो चाभियाचनां विदित्वा सप्तासंख्येयकल्पसमुदानीतसमुत्पन्नं चात्मनः प्रणिधानं विदित्वा सत्वेषु च महाकरुणां ओक्रामेत्वा इमे च मे महेशाख्या देवाधिपतयो लोकेश्वरा उपसंक्रान्ता आर्यधर्मचक्रप्रवर्तनं

stavâsyâkârâñ suvine(M °vive)yâñ suviçodheyâñ(M °dheyâ) adrâkshit satvâñ ughiṭṭitavyâ(M °t ‖ satvâ ugghidvitajñâ) vipañcittajñâne(M °citajñâneyâ) padaparamâñ | adrâ° M °kshṇendriyâñ madhyendriyâñ ṛiddhendriyâñ B °ddhîndriyâñ sa°.

4. M °yo râçiyo sañmyakparipatañ râçi mithyâtvaniyatañ râçiñ ânipatañ râçiñ ‖ B °myaksañbuddhaniyatañ râçi mithâtvaniyatañ râçiñ ‖ . — 5. B °tvâ alvakiçareṇe paçyema utparâni padu° M °lpakiçalena paçyame utpalâni vâ padmâni vâ pu° BM °rikâ vâ(B °vâ |) anyâni antodakâni anyâ(B °kâni anyâni) mo° M °gavân anu ° ntañ lokam abhilo° B °ntañ lokañ abhibhilo°.

9¹. B °gavâñ eta° M °gavataita° B °shi de°. — 9². BM deçaya vâhañ dharmañ (B °dhamañ) na vâ de° B °thyâsvaniyatañ râçi ‖ abha° M °vyo esho dha° BM °rmañ deçayituñ ajâ° B °tuñ de°. — 10. B deçaya vâhañ sañmyaktaniyato râçi âjñâtam eva etâya yaḥ alveyañ ani° M deçaye câhañ dharmañ na câyaṁ samya ° râçiñ âjñâtam eva etopayaḥ svasvemañ ni°.

11. M niya° BM °rmañ deçeyaṁ ajâ(M °ja)nishyati | nâ ca deçyaṁ vâ janishyati ‖ . — 12. M °dṛishṭigatâni utpannâni viditva ma° BM °hâbrâhmaṇâ câbhiyâ ° saptâ(M °pta)-saṁkhyeyakalpa(M °lpe) samudâ ° tpannaṁ(M °nnaṁ |) yataḥ praṇi° M °ditvâ sarveshu ° ruṇâ o ° ime ca mamaheçâkhyo de° B °çvaro upa° BM °saṁkrântâ(B °nto) âryaṁ dharma(M °ryyaṁ dharmma)cakraṁ pravarttanaṁ yâcanti | atha° M °gavân mahâbrâhma° B °hâbrâhma° BM °kârshit | ârya(M °ryya)dha° B °cakraṁ pra° BM °nâya tâ ye°.

याचन्ति अथ खलु भगवां महाब्रह्मणो अवकाशमकार्षीत् आर्यधर्मचक्रप्रवर्तनाय ॥ ताये वेलाये भगवान्महाब्रह्माणं गाथाये ध्यभाषे ॥

अपावृतं मे अमृतस्य द्वारं
ब्रह्मेति भगवन्तं ये श्रोतुकामा
अद्धां प्रमुंचन्तु विहेठसंज्ञां ।
विहेठसंज्ञो प्रगुणो अभूषि
धर्मो अशुद्धो मगधेषु पूर्वं ॥

अथ खलु भगवता महाब्रह्मणे अवकाशे कृते अनुत्तरधर्मचक्रप्रवर्तनाय भूम्या देवा घोषमुदीरयेन्सुः ॥ एवं मारिष ब्रह्मणे भगवतावकाशो कृतो अनुत्तरधर्मचक्रप्रवर्तनाय । तं [364ᵇ] भविष्यति बहुजनहिताय बहुजनसुखाय लोकानुकंपाय महतो जनकायस्यार्थाय हिताय सुखाय देवानां च मनुष्याणां च हायिष्यन्ति आसुराः कायाः दिव्या काया अभिवर्धिष्यन्ति ॥ भूम्यानां देवानां घोषं श्रुत्वा चतुर्महाराजकायिका देवा त्रयस्त्रिंशा देवा यामा तुषिता निर्माणरती परनिर्मितवशवर्ती देवा घोषमुदीरयेन्सुः शब्दमनुश्रावयेन्सुः ॥ एवं मारिष भगवता महाब्रह्मणो अवकाशो कृतो धर्मचक्रप्रवर्तनाय । तं भविष्यति बहुजनहिताय बहुजनसुखाय लोकानुकंपाय महतो जनकायस्यार्थाय हिताय सुखाय देवानां च मनुष्याणां च हायिष्यन्ति आसुराः कायाः दिव्याः कायाः अभिवर्धिष्यन्ति ॥ इति हि तेन कालेन तेन समयेन यावद्ब्रह्मलोकं घोष अभ्युद्गतो ॥

एत्थमेतं श्रूयति ॥

2. BM °hâbrâhmaṇaṁ° M °thâye pratyabhâ°. — 3. B °hmeti | bhagavâñ ye çrotuñkâ° M °gavân ye çro ° çraddhâye muñ° B °çraddhâ muñcati | vihekramañ sañ° M °vihekramañ sañ°.

6. B sañjñânapûre kañ vihethakasañjñânapûre abhâshi dharmañ a° M sañjñânapure kam avakâçaṁ akâshit vihethakasañjñânapure abhâshi dharmaḥ açu ° shu dharmaṁ pûrvañ ‖ . — 8. B °gavato mahâbrâhma° M °kṛita anu° BM °bhûmyâñ de ° yetsuḥ ‖ . — 9. M °sha mahâbrâhmaṇo bha° B °sha brâhma° M °tâ cakrâço ° rttaṇâya tañ°. — 10. BM °ti | bahujanahitâya bahujana(M °nahi)sukhâya lo° B °nti asurâḥ° M °âsurâ kâyâḥ divyâ kâyâḥ abhi°.

12. BM bhûmyâ(M °myâñ) devânâñ° M °yikâ devâs trayastriñço yâmâ ° ṇarati pa° B °ṇaratiya pa° BM °dirayetsuḥ ça ° vayetsuḥ | . — 14. BM etañ mâ ° hâbrâhma° B °dharmañ cakra ° ya tañ°. — 15. B °vishyati | bahujanahitâya ba° M °to janakasyâ° B °yishyati â° M °yishyati ‖ âsurâ kâyâḥ divyâ kâyâḥ a°.

17. BM °ghosham abhyu° M °dgataṁ e° B °dgato e°. — 19. B etañ atthañ çruya° M etam arthañ çruya°.

अथ खलु भगवां प्रवर्तनस्य समये केवरूपा सत्वा आर्यधर्मचक्रं प्रवर्तयन्तीति ॥ ये ते सत्वा पूर्वयोगसंपन्ना भवन्ति ते आर्यधर्मचक्रं प्रवर्तैन्ति । अहं खलु पूर्वयोगसंपन्नो तेनारहाम्यहं आर्यधर्मचक्रं प्रवर्तयितुं । ये ते सत्वा अनुत्तराचारसंपन्ना भवन्ति एवंरूपा सत्वा आर्यधर्मचक्रं प्रवर्तैन्ति । अहं खलु पुनः अनुत्तराचारसंपन्नो अरहाम्यहं आर्यधर्मचक्रं प्रवर्तयितुं । ये ते सत्वा निवासानुत्तर्यसंपन्ना भवन्ति एवंरूपा सत्वारार्यधर्मचक्रं प्रवर्तैन्ति । ये ते सत्वा आवेणिका भवन्ति एवंरूपाः सत्वा आर्यधर्मचक्रं प्रवर्तैन्ति । ये ते सत्वा च्युतिसंपन्ना भवन्ति एवंरूपाः सत्वा आर्यधर्मचक्रं प्रवर्तैन्ति । ये ते सत्वा गर्भावक्रान्तिसम्पन्ना भवन्ति एवंरूपाः सत्वा आर्यधर्मचक्रं प्रवर्तैन्ति । ये ते सत्वा गर्भस्थितिसम्पन्ना भवन्ति ये ते सत्वा जातिसम्पन्ना भवन्ति ये ते सत्वा लक्षणसंपन्ना भवन्ति ये अनुव्यंजनसम्पन्ना भवन्ति ये कुशलसंपन्ना भवन्ति ये धृतिसंपन्नाः स्मृतिसंपन्नाः ये प्रत्यु[365a]पस्थितधर्मसंपन्नाः ये दुष्यधर्मसम्पन्नाः ये लोके अग्रा भवन्ति ये लोके लोकप्रविचयसम्पन्नाः सत्वसारसंपन्ना भवन्ति ये स्थानं च स्थानतो अस्थानं चास्थानतो सम्यक्प्रज्ञया प्रजानन्ति ये सर्वत्रगामिनीप्रतिपद्दान्तत्रतत्रगामिनीप्रतिपद्दां यथाभूतं सम्यक्प्रज्ञया प्रजानन्ति ये नानाधातुका च लोके अनेकधातुका च लोके यथाभूतं सम्यक्प्रज्ञया प्रजानन्ति ये परसत्वानां परपुद्गलानां इन्द्रियवीर्यवैमात्रतां यथा-

1. BM °bhagavâṁ pra(M °vân pra)vacanâyasta(M °ste)samaye kevalarû(M °laṁru)pâ° M °pravarttenti ‖ ahaṁ° (*l.* 2²). — 2¹. B °pûrvaṁ yo ° bhavanti | evaṁrûpâ satvâ âryadharmacakraṁ pravarttayaṁtiti ‖ ye ca satvâ pûrvayogasaṁpannâ bhavanti te âryadharma°. — 2². M °lu purva° BM °saṁjanetavyâ antarhi a(M °rhâ)smâkaṁ â°. — 3. B °câne saṁ° M °câro sampannâ° BM °vanti | e°. — 4. M °punar anunâcâ° B °naḥ anunâcâ° BM °pannâ ara° M °rmacakrapra°. — 5. B °ttarârya ° bhavanti | e° M °pravarttati | .

6. M °evaṁrupâ satvâḥ âryyedha° B °pravarttanti | . — 7. M °rûpâ satvâḥ âryya° B °pravarttənti | . — 8. M ye te satvâḥ ga ° krântâsa° B °bhavanti | e° M °bhavanti | evaṁrupâḥ satvârâryya° BM °dhamaca°. — 9. BM °rbhasthitisam(M °saṁ)pannâ bhavanti | ye te satvâ jâtisam(M °saṁ)pannâ bhavanti | ye te satvâ lakshaṇasaṁpannâ bhavanti | ye (M °ye te satvâ) anuvyaṁjanasam(M °saṁ)pannâ bhavanti | ye (M °ye te satvâ) ku° M °çalasaṁpannâ bhavanti | ye te satvâ dhṛi ° sthitâdharmasaṁpannâḥ ye dushpradharmasampannâḥ ye° B °grâ bhavanti | ye loke lokapravi° M °vicayasaṁpannâḥ satva° BM °sarasaṁpannâ(M °nnâḥ) bhavanti(B °nti |) ye sthânaṁ(M °sthâsaṁ) ca sthânato asthânaṁ vâ(M °sthânam a)sthânato saṁmyakprajñâya prajânanti | ye sarvatragâminipratipadân(M °dâṁ) tatratatragâmini(M °niṁ) pratipadâṁ yathâbhûtaṁ saṁmyakprajñâya prajânanti | ye nânâdhâtukâ(M °ke) ca loke anekadhâtuke ca (B °ca loke) ya ° jânanti | ye parasatvânâṁ parapuṁ(M °puṅ)galâ° B °viryaṁ vaimâtrâṇâṁ ya° M °vîryyaṁ vaimâtrânâṁ ya ° taṁ saṁmyakprajânâti | te evaṁ dha°.

भूतं सम्यक्प्रजानन्ति ते एव धर्मचक्रं प्रवर्तैन्ति । ये नानाधिमुक्तिका च लोके अनेकाधिमुक्तिका च लोके यथाभूतं सम्यक्प्रज्ञया प्रजानन्ति ते एव धर्मचक्रं प्रवर्तैन्ति । ये ते सत्वाः सर्वेषां कर्मणां कर्मसमादानानां अतीतानागतानां प्रत्युत्पन्नानां कृतानामुपचितानामविपक्वानां विपाकप्रत्युपस्थितानां आयतिविपाकवैमात्रतां यथाभूतं सम्यक्प्रजानन्ति ते एव धर्मचक्रं प्रवर्तैन्ति । ये ते सर्वेषां ध्यानसमाधिविमोक्षसमापत्तीनां च सक्लेशव्यवदानं यथाभूतं संप्रजानन्ति ये दिव्येन चक्षुषा विशुद्धेनातिक्रान्तमानुष्यकेन सत्वां पश्यन्ति च्यवन्तां उपपद्यन्तां सुवर्णां दुर्वर्णां सुगतां दुर्गतां हीनां प्रणीतां यथाकर्मोपगां सत्वां संप्रजानन्ति एवंरूपाः सत्वा आर्यधर्मचक्रं प्रवर्तैन्ति । ये अनेकविधं पूर्वनिवासं समनुस्मरन्ति ये चाश्रवाणां क्षयादनाश्रवां चेतोविमुक्तिं प्रज्ञाविमुक्तिं च यथाभूतं संप्रजानन्ति ये चापि दीर्घायुष्का भवन्ति आजीवसंपन्ना भवन्ति शीलसंपन्नाः समाधिसंपन्ना विमुक्तिसंपन्ना विमुक्तिज्ञानसंपन्ना नैष्क्रम्यसंपन्ना महाकरुणाप्रतिलाभसम्पन्ना बोधिसंपन्नाः चेतःपर्यायसंपन्नाः ऋद्धिप्रातिहार्यसंपन्ना आदेशनाप्रातिहार्यसंपन्ना अनुशासनीप्रातिहार्यसंपन्नाः सर्वकुशलधर्मसमन्वागता ये चार्थप्रतिसंविद्प्राप्ता धर्मप्रतिसंविद्प्राप्ता निरुक्तिप्रतिसंविद्प्राप्ताः प्रतिभानप्रतिसंविद्प्राप्ता ये चार्यपंचाङ्गिकसमाधि[365b]संपन्नाः पंचज्ञानिकसमाधिसंपन्ना आर्यमहापंचाङ्गिकसम्यक्समाधिसं-

1. B ye nânadhi ° aneka'dhi° BM °taṁ saṁmya° M °k prajânanti te evaṁ dha° B °nanti | te° M °kraṁ niva° B °varttanti ye°. — 3. M ye te satvâ sa° B °karmâṇâṁ° dâyanânâṁ ati° M °dânânâm ati° BM °bhûtaṁ saṁmya° M °nanti | tam evaṁ dha° B °te evaṁ dhamaca°. — 5. B °dhyânasamâdhiṁ vimo° M °dhivimâkshasamâpattinâṁ ca saṁkle° B °ttinâṁ ca saṁkleçaṁ vya° M °dâna yathâ° BM °taṁ saṁprajânanti | ye di° M °kena satvâ paçyanti cyavantâ u° BM °suvarṇṇâṁ(M °rṇṇâ) duvarṇṇâṁ° M °hinâṁ prahinâṁ praṇi ° gâṁ satvâ saṁ° B °jânanti | e° M °rûpâ sa° BM °pravarttanti | .

9. BM °smaranti | ye câ° M °çravânâṁ ksha° BM ° vâṁ cetovimukti prajñâ° B °jânanti | ye câ ° shkâ bhavanti | âji° BM °çilaṁsaṁpannâḥ sa° M °mâdhisaṁpannâḥ vimuktisaṁpannâḥ vimuktijñânadarçanasaṁpannâḥ naishkramyasaṁpannâḥ ma ° mpannâḥ bo° cetapa° BM °nnâḥ riddhiprâtihâryasaṁpannâ(M °nnâḥ) â° M °ryyasaṁpannâḥ anu° B °dharmasamatvâga° BM °pratisaṁpra(M °saṁpapa)vidapraptâ(M °ptâḥ)° M °dapraptâḥ ni° BM °pratipratisaṁ ° bhâna(M °bhâṇa)pratisaṁvida(B °daṁ)prâptâ | M °prâptâḥ ye câṅgikasa° BM °dhisamâpannâḥ paṁ° M °dhisaṁpannâḥ âryya° BM °ṅgikasya samyaksa(M °ksaṁsa)mâ° M °dhisaṁpannâḥ ye° BM °ya câpyâ(M °ye pyâ)ryamahâpaṁcâjñâtikasya saṁmyaksa° M °dhisampannâḥ balasampa° BM °shṭâye ane(B °ana)lakaṭâye artha° M °vyâkaraṇaṁ saṁpannâḥ yaṁ pratibalâ pa° B °mpannâ | yaṁ pratibalasaṁpannâḥ pareshâṁ viçâ° BM °cchedo vikartuṁ° M °hiteshiṇâṁ° BM °ṇa nigra(M °rgra)hetuṁ | ye pratibalâ(M °lâḥ) pare° M °khânupradâtuṁ pradânaṁ | evaṁrûpâ satvâḥ âryyadha° B °kraṁ pravarttati | .

IMPRIMERIE NATIONALE.

पन्ना ये चाप्यार्यमहापंचज्ञानिकसम्यक्समाधिप्राप्ताः बलसंपन्नाश्च इन्द्रियसंपन्नाश्च ऋद्धिसंपन्नाश्च ये चापि पौरिये वाचाये समन्वागता विस्पष्टाये अनेलकाये अर्थस्य विज्ञापनीये समन्वागताः प्रश्नव्याकरणेन सम्पन्ना ये प्रतिबलाः परेषां वैशारद्ये पि च्छेदं विकर्तुं प्रतिबलाः परेषां अहितेषिणां सह धर्मेण निग्रहेतुं ये प्रतिबला परेषां सुखानुप्रदानं प्रदातुं एवंरूपाः सत्वा आर्यधर्मचक्रं प्रवर्तैन्ति । ये ते सत्वाः सर्वबुद्धधर्मैहि समन्वागता भवन्ति एवंरूपाः सत्वा आर्यधर्मचक्रं प्रवर्तैन्ति ॥ अहं खलु पुनः सर्वबुद्धधर्मैहि समन्वागतो अरहाम्यहं धर्मचक्रं प्रवर्तयितुं ॥

अथ खलु भगवां इममेवरूपमात्मनो गुणसमादानं विदित्वा एतदभूषि ॥ यं नूनाहमार्यमनुत्तरं धर्मचक्रं प्रवर्तयेयं । को नु खलु मे प्रतिबलो प्रथमं धर्मं देशितं आजानितुं न च मे विहिंसये यमिदं धर्मदेशनाये ॥ अथ खलु भगवतो एतदभूषि ॥ उद्रको रामपुत्रो शुद्धो अल्परजो अपरोक्षजातीयो सो च दूरगतो अतिक्रान्तगतो नैवसंज्ञानासंज्ञायतनसहव्रताये धर्मं देशयति । अद्य सप्ताहं कालगतो उद्रको रामपुत्रो महाहानिरुद्रको रामपुत्रो ॥ कतमो पि खल्वन्यो पि सत्वो शुद्धो अल्परजो अपरोक्षजातीयो यो मे प्रतिबलो प्रथमं धर्मं देशितमाजानितुं न च मे विहेठेया यमिदं धर्मश्रवणाय ॥ आराडो कालामो शुद्धो अल्परजो अल्परजस्कजातीयो यो मे प्रतिबलो प्रथमं धर्मं देशितमाजानितुं न च मे विहेठये यमिदं धर्मश्रवणाय । महाहानिरारादस्य अद्य त्र्यहं कालगतो आराडो कालामो ॥ कतमो पुनरन्यो पि सत्वो शुद्धो अल्परजस्कजातीयो यो मे प्रतिबलो प्रथमं धर्मं देशितमाजानितुं न च मे विहेठये यमिदं धर्मश्रवणाय ॥ अथ खलु भगवतो एतदभूषि ॥ पंचका भद्रवर्गिया शुद्धा अल्परजा अल्परजस्कजातीयास्ते

6. B °ddhadharmahi ° bhavanti | e° M °rûpâ satvâḥ âryya ° varttanti ‖ . — 7. M °gataḥ a° B °cakra pra° M °varttituṁ ‖ B °tuṁ a°. — 8¹. M °gavân i° BM °imâm evarûpâṁ âtma°. — 9. B °maṁ dharma deçi° M °çayeyaṁ ‖ . — 10. B °shi u°.

11. M uddako nâmapu° B °ko nâmapu° M °tiye so ° nâsaṁjñâyatena saha°. — 12. M adye saptâhaṁ kâlaṁ gataṁ uddako nâmaputro mahâ ajino uddako nâmaputro B °to udrako nâmaputro mahâjino udra nâmaputro ka°. — 13. B katamâpi kha° M katamâpi khalvaṁnya pi satvâ çu° B °nyo pi satvâ çu° BM °tiyo me° M °maṁ dharma deçitaḥ âjâ° BM °hetḥayâ° B °çramaṇâya | . — 15. M ârâdo kâ° BM °mo çrâddho ° lparaska° B °tiyo | yo me° M °maṁ dharmam âjâ° B °çitaṁm âjâ° M °ṭhaye yaṁm i ° çramaṇâye B °çramaṇâya ma°.

17. B mahâjino ârâḍa° M mahâtino ârâḍa° BM °tryaha kâla° B °âlâḍo kâlâ° BM °mo ka°. — 18. M °punaḥ anye pi ° lparaskajâ° B °maṁ dharma deçi ° ṭhaye yaṁm i ° çramaṇâya ‖ . — 19. B °shi paṁ°. — 20. M °dravargiyâ çu° BM °ddhâ alparajâ alparaska(B °jâ alparajaka)jâti ° bolo pratha° B °tuṁ na [f° 366°] na ca ° yetsuḥ yam i° M °yetsuḥ ‖ yem i° B °çramaṇâya ‖ .

मे प्रतिबला प्रथमं धर्मं देशितं आजानितुं [366°] न च मे विहेठयेन्सुः यमिदं धर्मश्रवणाय । पूर्वमेव दुष्करं चरन्तस्य अनुबंधेन्सुः । ते च वाराणस्यां विहरन्ति ऋषिपतने मृगदावे ॥ यं नूनाहं वाराणसीं गत्वा वाराणस्यां ऋषिपतने मृगदावे पंचानां भद्रवर्गियानां प्रथमं धर्मं देशयेयं ॥

अथ खलु संबहुला महेशाख्या शुद्धावासकायिका देवा येन भगवान्स्तेनोपसंक्रमित्वा भगवतः पादौ शिरसा वन्दित्वा एकान्ते अस्थान्सुः । एकान्तस्थितास्ते भगवन्तमेतदुवाच ॥ यं भगवतो अन्तेवासिनां अभिज्ञातं परिज्ञातं प्रतिबलास्च पुनर्वयं भगवतो विविधानि विचित्राणि ऋद्धिप्रातिहार्याणि कर्तुं । येन भगवान्मार्गेण बोधितो वाराणस्यां गमिष्यति ऋषिपतनं मृगदावं अनुत्तरं धर्मचक्रं प्रवर्तयितुं ततो वयं भगवतो यावच्च बोधि यावच्च वाराणसी मार्गं प्रतिजागरिष्यामः समं असमविषमं पाणितलजातं विततवितानं चित्रदूष्यपरिच्छिन्नं ओसक्तपट्टदामकलापं सिक्तसम्मृष्टं धूपितधूपनं मुक्तपुष्पावकीर्णं सुवर्णवालिकासंस्तृतं दिव्यमुक्ताचूर्णसंस्तृतं दिव्यस्फटिकचूर्णसंस्तृतं दिव्यमुसारगल्वचूर्णसंस्तृतं दिव्यलोहितिकाचूर्णसंस्तृतं । तत्र च वयं भगवं मार्गं यावच्च बोधिर्यावच्च वाराणसी दिव्या तालपंक्तियो अभिनिर्मिनिष्यामः अच्छा समा सैकता सुखोपनीता चित्राणि दर्शनीयानि सप्तानां वर्णानां सुवर्णस्य रूप्यस्य मुक्ताया वैडूर्यस्य स्फटिकस्य सुसागल्वस्य लोहितिकाया । तत्र च वयं भगवं मार्गं वामदक्षिणतो दिव्यायो नद्यो

2¹. BM °baṁdhetsuḥ | (M °tsuḥ). — 2². B °nti | ṛi° M °shipattane° BM °ve yaṁ°. — 3. M °shipattate mṛi° B °dharma de°. — 5. M °hulo maheçâkhyo çu ° sakâyi devâ yena bhagavân teno ° gavato pâ ° sthâsuḥ e° B °sthâtsuḥ e°.

6. M °sthitâ te bha°. — 7. BM yaṁ bhagavatâ(M °to)ntevâsino abhijñâta parijñâtuṁ pra° B °ṛiṛddhiprâ ° ryâni kartuṁ ye°. — 8. BM °syâṁ(M °siṁ) gamishyati | ṛishipata-(M °tta)naṁ ° tuṁ | tato(M °tataḥ) va° M °vato yâvacca vârâṇasiṁ mârgaṁ ° BM ° maḥ | samaṁ asamaṁ vishamaṁ pâṇitala(M °laṁ)jâtaṁ ° tradushya ° osapta(M °oçakta)patta ° siktasanmṛi(M °saṁsṛi)shṭaṁ dhûpita(B °taṁ)dhû° M °rṇṇavârikâsaṁstṛitaṁ divyamuktâvakîrṇṇaṁ saṁstṛitaṁ divyasphaṭikacûrṇṇaṁ saṁstṛitaṁ divyamusâgalva° B °likâsaṁskṛitaṁ divyamuktâcûrṇṇaṁsaṁskṛitaṁ °ṭikacûrṇṇasaṁskṛitaṁ ° musâracûrṇṇasaṁskṛitaṁ° M °loditikacû° B °hitakacûrṇṇaskṛitaṁ | .

14. M °bodhi yâvacca vârâṇasîyo divyatâlapaṁktiyo abhi° B °ṇasi yâ divyâ ° ktiyâ abhinikâsaṁskṛitaṁ divyamuktâcûrṇṇaṁ saṁskṛitaṁ divyasphaṭikacûrṇṇasaṁskṛitaṁ divyamusâracûrṇṇasaṁskṛitaṁ divyalohitikacûrṇṇasaṁskṛitaṁ tatra ca vayaṁ bhagavaṁ abhi° M °rmiṇishyâmaḥ ci° B °maḥ ‖ acchâ ° vaiḍuryya° M °tikâyâḥ | .

17. M °yaṁ mârge° B °vaṁ yaṁ mârge° M °kshiṇâto di° B °vyâyâ nadî° M °rmiṇishyâmaḥ | acchâṁ samâ° B °maḥ | acchâ sasâ saika sukho° BM °nitvâ suvarṇṇa(B °rṇṇaṁ) vâlu° B °saṁskṛitâ° M °lparapadma° BM °kucapata(B °pana)sanâlikelapâle(M °pâre)vatakâbha° B °vyadâtrimavṛi° M °ḍimaṁṛiddhikâpracchannâḥ.

अभिनिर्मिनिष्यामः अच्छा समा सैकता सुखोपनीता सुवर्णवालुकासंस्तृता उत्पल-पद्मकुमुदपुण्डरीकनलिनीसौगन्धिकआम्रजम्बुकलकुचपनसनारिकेलपालेवतकभव्य-दाडिमवृद्धिकप्रच्छन्ना । तत्र च वयं भगवन्मार्गे याव च बोधिर्याव च वाराणसी दिव्यानि च्छत्त्राणि अभिनिर्मिनि[366b]त्वा दिव्यानि ध्वजानि अभिनिर्मिनिष्या-मः । दिव्यानि कूटागाराणि अभिनिर्मिनिष्यामः चित्राणि दर्शनीयानि सप्तानां रत्नानां सुवर्णस्य रूप्यस्य मुक्ताया वैडूर्यस्य स्फटिकस्य मुसागल्वस्य लोहितिकाया ॥ भगवतो गच्छन्तस्य गमिष्यन्ति तिष्ठन्तस्य तिष्ठन्ति पुरतो च वर्षवलाहका देवपुत्रा दिव्यानि पुष्पाणि प्राकिरिष्यन्ति मन्दं मन्दं च देवा प्रसारयिष्यन्ति ॥

भगवति बोधितो वाराणसीमृषिपतनं मृगदावं प्रस्थिते अनुत्तरं धर्मचक्रं प्रव-र्तयितुं शुद्धावासेहि देवेहि मार्गो प्रतिजागृतो । महतीं चतुरंगिनीसेनामभिनिर्मि-णित्वा महान्तं हस्तिकायं महान्तमश्वकायं रथकायं पत्तिकायं भगवन्तं वाराणसीं गच्छन्तं पुरस्करेन्सुः ॥ यावत्सुवर्णानामधिपतयो सुवर्णराजानो अण्डजा वा जरायुजा वा औपपादुका वा संस्वेदजा वा ते महान्तं चतुरंगिनीसेनां ऋद्धीये अभिनिर्मिणित्वा भगवन्तं गच्छन्तं पुरस्करेन्सुः । याव नागानां नागाधिपतयो नागराजानो अण्डजा वा जरायुजा वा संस्वेदजा वा औपपादुका वा ते महतीं चतुरंगिनीसेनामृद्धीये अभिनिर्मिणित्वा भगवन्तं वाराणसीं गच्छन्तं पुरस्करेन्सुः । चतुर्महाराजिका देवा त्रयस्त्रिंशा यामास्तुषिता निर्माणरति परनिर्मितवशवर्ति ब्रह्मकायिका देवा महान्तं चतुरंगिनीसेनामृद्धीये अभिनिर्मिणित्वा भगवन्तं काशिं गच्छन्तं पुरस्करेन्सुः ॥ अथ खलु भगवां महतीये परिषाये अनेकशताये अनेकस-हस्राये अनेकशतसहस्राये पुरस्कृतो परिवारितो उरुविल्वातो गयां गच्छति गयातो अपरगयां गच्छति ॥ अपरगयायां सुदर्शनो नाम नागराजा । तेन भगवां

